काद‍ंबरी पूर्वार्द्ध · पत्रे १८७ समग्र

॥पुस्तकमदो द्रावुत्रोपनाम्नो रामचंद्रस्य॥

का॰पू॰ ॥ ॥श्रीगणेशायनमः॥ ॥अविघ्नमस्तु॥ ॥रजोजुषेजन्मनिसत्त्ववृत्तयेस्थितौप्रजानांप्रलयेतमःस्पृशे॥अजाय
१ सर्गस्थितिनाशहेतवेत्रयीमयायत्रिगुणात्मनेनमः॥१॥जयंतिबाणासुरमौलिलालितादशास्यचूडामणिचक्रचुंबिनः॥
सुरासुराधीशशिखांतशायिनोभवच्छिदस्त्र्यंबकपादपांसवः॥२॥जयत्युपेंद्रःसचकारदूरतोविभित्सयायःक्षणलब्ध
लक्ष्यया॥दृशैवकोपारुणयारिपोरुरःस्वयंभयाद्भिन्नमिवास्रपाटलं॥३॥नमामिभर्वोश्चरणांबुजद्वयंसशेखरैर्मौख
रिभिःकृतार्चनं॥समस्तसामंतकिरीटवेदिकाविटंकपीठोल्लुठितारुणांगुलि॥४॥अकारणाविष्कृतवैरदारुणाद राम
सज्जनात्कस्यभयंनजायते॥विषंमहाहेरिवयस्यदुर्वचःसुदुःसहंसंनिहितंसदामुखे॥५॥कटुक्वणंतोमलदायकाः १

२

शय्यातल्पेशाद्वगुंफेंद्रतिविश्वः ३

खलास्तुदंत्यलंबंधनशृंखला इव॥मनस्तुसाधुध्वनिभिःपदेपदेहरंतिसंतोमणिनूपुराइव॥६॥सुभाषितंहारिवि
शत्यधोगलान्नदुर्जनस्यार्क... रिपोरिवामृतं॥नदेवधत्तेहृदयेनसज्जनोहरिर्महारत्नमिवातिनिर्मलं॥७॥स्फुर
त्कलालापविलासकोमलाकरोतिरागंहृदिकौतुकाधिकं॥रसेनशय्यांस्वयमभ्युपागताकथाजनस्याभिनवा
वधूरिव॥८॥हरंतिकंनोज्ज्वलदीपकोपमैर्नवैःपदार्थैरुपपादिताःकथाः॥निरंतरश्लेषघनाःसुजातयोमहा
स्रजश्चंपककुड्मलैरिव॥९॥बभूववात्स्यायनवंशसंभवोद्विजोजगद्गीतगुणोऽग्रणीःसतां॥अनेकगुप्तार्चितपा भार
दपंकजःकुबेरनामांशइवस्वयंभुवः॥१०॥उवासयस्यश्रुतिशांतकल्मषेसदापुरोडाशपवित्रिताधरे॥सरस्वती

र

का॰प्र॰ सोमकषायितोदरे समस्तशास्त्रस्मृतिबंधुरे भुरवे ॥२१॥ जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः ससारिकैः पंजरवर्ति
२ भिः शुकैः ॥ निगृह्य मारानबटवः पदे पदे यजूंषि सामानि च यस्य शंकिताः ॥२२॥ हिरण्यगर्भो भुवनांडकादिव क्ष
पाकरः क्षीरमहार्णवादिव ॥ अभूत्सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः ॥२३॥ विदूरवर्त्तीय
राम स्यतिसारिवाङ्मयं दिने दिने शिष्यगणा नवा नवाः ॥ उपस्सु लग्नाः श्रवणाधिकां श्रियं प्रचक्रिरे चंदनपल्लवा
इव ॥२४॥ विधानसंपादितदानशोभितैः स्फुरन्महा वीरसनाथमूर्त्तिभिः ॥ मखैरसंख्यैरजयत्सुरालयं सुखे २
नयेऽरूपकरैर्गजैरिव ॥२५॥ सचित्रभानुं तनयं महात्मनां सुतोत्तमानां श्रुतिशास्त्रशालिनां ॥ अवापमध्ये सम

३ रिकोपलामलं क्रमेणकैलासमिवस्मसूतां ॥१६॥ महात्मनोयस्यसुदूरनिर्गताःकलंकमुक्तेंदुकला
मलत्विषः ॥ द्विषन्नतः प्राविविशुःकृतांतरागुणानृसिंहस्यनखांकुराइव ॥१७॥ दिशामलीकालकभंगतांग
तस्त्रयीवधूकर्णतमालपल्लवः ॥ चकारयस्याध्वरधूमसंचयोमलीमसःशुक्लतरंनिजंयशः ॥१८॥ सरस्वती
पाणिसरोजसंपुटप्रमृष्टहोमश्रमसीकरांभसः ॥ यशोंशुशुक्लीकृतसप्तविष्टपात्ततःसुतोबाणइतिव्यजाय
त ॥१९॥ द्विजेनतेनाक्षतकंठकौंठ्ययामहामनोमोहमलीमसांधया ॥ अलब्धवैदग्ध्यविलासमुग्धयाधियानि
बद्धेयमतिद्वयीकथा ॥२०॥ आसीदशेषनरपतिशिरःसमभ्यर्चितशासनःपाकशासनइवापरश्चतुरुदधिमाला
२१

का॰६ मेखलायाम्भुवोभर्त्ताप्रतापानुरागावनतसमस्तसामंतचक्रश्चक्रवर्त्तिलक्षणोपेतश्चक्रधरइवकरकम
२ लोपलक्ष्यमाणशंखचक्रलांछनोहरइवजितमन्मथोगुहइवाप्रतिहतशक्तिःकमलयोनिरिवविमानीकृ
तराजहंसमंडलोजलनिधिरिवलक्ष्मीप्रसूतिःगंगाप्रवाहइवभगीरथपथप्रवृत्तोरविरिवप्रतिदिवसोपजा
यमानोदयोमेरुरिवसकलभुवनोपजीव्यमानपादच्छायोबृहस्पतिरिवसकलशास्त्रार्थतत्त्वज्ञोदिग्गजइवा
नवरतप्रवृत्तदानार्द्रीकृतकरःकर्त्तामहाश्चर्याणामाहर्त्ताक्रतूनामादर्शःसर्वशास्त्राणामुत्पत्तिःकलानांकु २
लभवनंगुणानामागमःकाव्यामृतरसानामुदयशैलोमित्रमंडलस्योत्पातकेतुरहितजनस्यप्रवर्त्तयिता --

५ गोष्ठीबंधानामाश्रयो रसिकानां प्रत्यादेशो धनुष्मतां धौरेयः साहसिकानामग्रणी विदग्धानां वैनतेय इव वि
नतानंदजननो वैण्य इव वरचापकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम॥ ॥नाम्नैव यो
विनिर्भिन्नारातिमंडलो विरचितनरसिंहरूपाडंबरमेकविक्रमाक्रांतसकलभुवनतलो विक्रमत्रयायासि
च४ तं जहासेव वासुदेवं। अतिचिरकाललग्नमतिक्रांतकुनृपतिसंपर्ककलंकमिव क्षालयंती यस्य विमले
कृपाणधाराजले चिरमुवास राजलक्ष्मीः। यश्च मनसि धर्मेण कोपे यमेन प्रसादे धनदेन
भुजे भुवा दृशिं सरस्वत्या मुखे शशिना बले मरुता प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा

क्रियावाचि १

का॰प्र॰ चनिवसत्ता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भ॰गवतो नारायणस्य ।। यस्य च मदकल
४ करिकुंभपीठपारनमाचरतो लैःस्थूलमुक्ताफलेन दृढमुष्टिनिःपीडनान्निःसृतधाराजलबिंदुदंतुरे रो
चकुपारोनाकृष्यमाणा सुभटोरःकपाटपुटविघटितकवचसहस्रांधकारमध्यवर्त्तिनी करिकरट॰ तट
गलितमदजलासारदुर्दिनांधमिसारितसमरनिशासु समीपमसकृदाजगाम राजलक्ष्मीः ।। यस्य च
हृदयस्थितानपि [illegible] पतीन्रिपुरिव प्रतापानलो विनिर्दहनाम पिरिपुसुंदरीणां मंतर्जनितदाहे
दिवानिशं जज्वाल ।। यस्मिंश्च राजनि जितजगति महीं परिपालयति चित्रकर्मसु वर्णसंकराः सुरते ४

सं२

षुकेशग्रहाःकाव्येषुदृढबंधाःशास्त्रेषुचिंतास्वप्नेषुविप्रलंभाःछत्रेषुकनकदंडाःध्वजेषुप्रकंपागीतेषुरा
5 गविलसितानिकरिषुमदविकाराश्चापेषुगुणच्छेदागवाक्षेषुजालमार्गाःशशिकृपाणकवचेषुक
लंकारतिकलहेषुदूतप्रेषणानिसार्यक्षेषुशून्यगृहानप्रजानामासन्।यस्यचपरलोकाद्भयमंतःपुरिका
लकेषुभंगोनूपुरेषुमुखरताविवाहेषुकरग्रहणमनवरतमखाग्निधूमेनाश्रुपातस्तुरगेषुकशाभि
घातोमकरध्वजेचापध्वनिरभूत्।तस्यचराज्ञःकलिकालभयपुंजीभूतकृतयुगानुकारिणीत्रिभुवन
प्रसवभूमिरिवविस्तीर्णामज्जज्जनमालवविलासिनीकुचतटास्फालनजर्जरितोर्मिमालयाजलावगाह

मि३

का-पू नायातजयकुंजरकुंभसिंदूरसंध्यायमानसलिलयोन्मदकलहंसकुलकोलाहलमुखरितकूलया

५ वेत्रवत्यासरितापरिगता विदिशाभिधानानगरीराजधान्यासीत् । सतस्यांच विजिताशेषभुवनमंडलतयावि

गतराज्यचिंताभरनिर्वृत्तोद्वीपांतरागतानेकभूपालमौलिमालालालितचरणयुगलोवलयमिवलील

याभुजेनभुवनभारमुद्वहन्नमरगुरुमपिप्रज्ञयोपहसद्भिःसकृदालोचितनीतिशास्त्रनिर्मलम

नोभिरलुब्धैःस्निग्धैःप्रबुद्धैश्चामात्यैःपरिवृतःसमानवयोविद्यालंकारैरनेकमूर्द्धाभिषिक्तपार्थिवकु ५

लोद्भूतैरखिलकलाकलापालोचनकठोरमतिभिरतिप्रगल्भैःकालविद्भिःप्रेमातुरैरसैरग्राम्यपरि

रनेककुलक्रमागतै३

6

नाका^ पीठ२ मतिचिर३

हासकुशलैरिंगिरवेदिभिःकाव्यनाटकनाटिकाख्यातकाख्यायिकालेख्यव्याख्यानादिक्रिया निपुणैरतिकठिनपीवर
स्कंधोरुबाहुभिरसकृद्वदलितसमदरिपुगजघटाबंधैःकेसरिकिशोरकैरिवविक्रमैकरसैरपिविनयव्यवहारिभिरात्मनः
प्रतिबिंबैरिवराजपुत्रैःसहरममाणःप्रथमेवयसिसुखमुवास।तस्यचविजिगीषुतयामहासत्वतयाचतृणमिवलघुवृत्ति
स्त्रैणमाकलयतःप्रथमेवयसिवर्तमानस्यापिसंतानार्थिभिरमात्यैरपेक्षितस्यापिसुरतसुखस्योपरिद्वेषइवासीत्।स
त्वपिरूपविलासोपहसितरतिविभ्रमेलावण्यवतिविनयवत्यनूपवतितद्धृदयहारिणिचावरोधजने।कदाचिदनवर
तदोलायमानबाहुवलयोगर्गरिकास्फालनप्रकंपरणरणायमानमणिकर्णपूरःस्वयमारब्धमृदंगवाद्यःसंगी
तकप्रसंगेनकदाचिदनवरतशरासारशून्यीकृतकाननोमृगयाव्यापारेणकदाचिदाबद्धविदग्धमंडलःकाव्य

मुक्त१ रूपवतोपि४ प्रवं५

चरण२ र२ च३

का॰रू त्वनेनकदाचिद्विद्याभ्यासेपेनकदाचिदाख्यायिकेतिहासपुराणाकर्णनेनकदाचिदालेख्यविनोदेनकदाचिद्वीणयाक
६ दाचिद्दर्शनागतमुनिजनशुश्रूषयाकदाचिदक्षरच्युतकमात्राच्युतकबिंदुमतीगूढचतुर्थपादप्रहेलिकाप्रदानादिभि
र्वनितासंभोगपराङ्मुखःसुहृज्जनपरिवृतोदिवसमनयत्।यथैवंदिवसमेवमेवावर्जितविविधक्रीडापरिहासचतुरैःसुहृ
द्भिरुपेतोनिशामनैषीत्॥एकदातुनातिदूरोदितेनवनलिनदलसंपुटभिदिकिंचिदुन्मुक्तपाटलिम्निभगव
सहस्व३ तिमरीचिमालिनिराजानमास्थानमंडपगतमंगनाजनविरुद्धेनवामपार्श्वावलंबिनाकौक्षेयकेणसंनिहि
तविषधरेवचंदनलताभीषणरमणीयाकृतिरविरलचंदनधूलिधवलितस्तनतटतयोन्मज्जदैरावतकुंभमंडले ६
वमंदाकिनीचूडामणिसंक्रांतप्रतिबिंबछलेनराजाज्ञेवमूर्तिमतीराजभिःशिरोभिरुह्यमानाशरदिवकलहंस

धवलांबराजामदग्न्यपरशुधारेववशीकृतराजहंसमंडला विंध्यवनभूमिरिववेत्रलतावती राज्याधिदेवतेवविग्रहिणीप्रतीहारी
समुपसृत्यक्षितितलविनिहितकरकमलासविनयमिदमब्रवीत्।देवद्वारिस्थितासुरलोकमारोहतस्त्रिशंकोरिवकुपित
शतमखहुंकारनिपातिताराज्यलक्ष्मीर्दक्षिणापथादागताचंडालकन्यकाकाचित्पंजरस्थंशुकमादायदेवंविज्ञापय
ति।सकलभुवनतलेसर्वरत्नानामुदधिरिवैकभाजनंदेवोविहंगश्चायमाश्चर्यभूतःसकलभुवनतलरत्नमितिकृत्वा
देवपादमूलमेनमादायागताहमिच्छामिदेवदर्शनसुखमनुभवितुमित्येतदाकर्ण्यदेवःप्रमाणमित्युक्त्वाविरराम।।
समुपजातकुतूहलस्तुराजासमीपवर्तिनांराज्ञांमुखमालोक्यकोदोषःप्रवेश्यतामित्यादिदेश।अथप्रतीहारी
नरपतिवचनानंतरमुत्थायतांमातंगकुमारींप्रावेशयत्।प्रविश्यचसानरपतिसहस्रमध्यवर्तिनमशनिभयपुंजीभूत

सर

का·पू·
७

कुलशैलमध्यगतमिवकनकशिखरिणमनेकरत्नासरणकिरणजालकांतरितावयवमिंद्रायुध सहस्रसंछा
दिताष्टदिग्विभागमिवजलधरसमयदिवसमवलंबितस्थूलमुक्ताकलापस्यकनकशृंखलानियमितमणिदंडिकाच
तुष्टयस्यगगनसिंधुफेनपटलपांडुरस्यांशुकवितानस्याधस्तादिंदुकांतमणिपर्यंकिकानिष
ण्णमुद्धूयमानकनकदंडचामरकलापमुन्मु खमुखकोतिविजयघराभ्रवप्रणतेशशिनीवस्फटिकमणिपा
दपीठेविन्यस्तवामपादमिंद्रनीलमणिकुट्टिमप्रभासंपर्कश्यामायमानैःप्रणतरिपुनिश्वासमलिनीकृतैरिवचर
णनखमयूखजालकैरुपशोभमानमासनोच्छलितपद्मरागमणिकिरणपाटलीकृतेनाचिरहतमधुकैटभ ७
रुधिरारुणेनहरिमिवोरुयुगलेनविराजमानममृतफेनधवलेगोरोचनालिखितहंसमिथुनसनाथपर्यंतेचारु

खरिण२ = चर्चातुचार्चिक्यंस्थासकश्च्यम

8

चामरपवनानर्त्तितदशंदुकूलवसानमतिसुरभिचंदनानुलेपनधवलितोरस्थलमुपरिविन्यस्तकुंकुमस्थासकमं
तरांतरानिपतितबालातपछेदमिवकैलासशिखरमपरशशिशंकयानक्षत्रमालयेवहारलतयाकृतमुखपरिवेष
मतितरलराजलक्ष्मीबंधननिगडकरशंकामुपजनयतेंद्रनीलकेयूरयुगलेनमलयजरसगंधलुब्धेनभुजं ज३
गमद्वयेनेववेष्टितबाहुशिखरमीषदालंबितकर्णोत्पलमुन्नतघोणमुत्फुल्लपुंडरीकलोचनममलकलधौताय
तमष्टमीचंद्रशकलाकारमशेषभुवनराज्याभिषेकपूतमूर्णासनाथंललाटदेशमुद्वहंतमामोदिमालतीकु
सुमशेखरस्रुषक्षिप्तपर्यस्ततारकापुंजमिवपश्चिमाचलममरगणप्रभापिशंगितांगतयाखमहरहुताश नमिवमक
रध्वजमासन्नवर्त्तिनीभिःसर्वतःसेवासंगताभिरिवदिग्वधूभिर्वारविलासिनीभिःपरिवृतममलमणिकुट्टिमसं

शिखर२ = ऊर्णामेषादिलोम्निस्यादावर्त्तेचान्तराभ्रुवोरित्यमरः ३

सकल१ जर्दि२

का॰पू॰ कांतदेहप्रतिबिंबतया प्रतिप्रेम्णा वसुंधरया हृदयेनेवोह्यमानमशेषनरपतिभोग्यतामुपनीतयाप्यसाधा
८ रणया राज्यलक्ष्म्या समालिंगितमपरिमितपरिवारमप्यद्वितीयमनंतगजतुरगसाधनमपि खड्गैकसहा यमे
कदेशस्थितमपि व्याप्तसकलभुवनतलमासनगतमपि धनुषि निषण्णमुपशमिताशेषविद्विषमपि प्रज्वल
त्प्रतापानलमायतलोचनमपि सूक्ष्मदर्शनं महादोषमपि सकलगुणाधिष्ठानं कुपतिमपि कलत्रवल्लभमवि
रतप्रवृत्तदानमप्यमदमतिशुद्धस्वभावमपि कृष्णचरितमक रमपि हस्तस्थितसकलभुवनतलं राजान
मद्राक्षीत्॥ ॥आ लोकयन्न सादूरस्थितैव प्रचलितरत्नवलयेन रक्तकुवलयदलकोमलेन पाणिनाऽजर्जरि ८
तमुखवंशागां वेणुमादाय नरपतिप्रबोधनार्थं सकृत्सभाकुट्टिममाजघान। येन सकलमेव तद्राजकमेक
लता

पदेवनकरिस्थयमिवतालशाहृनतेनवेणुलताहृनिनायुगपदावलितवदनमवनिपालमुखादाकृष्यचक्षुस्तत्सभि
मुखमासीत्। अवनिपतिस्तुदूरादालोकयेत्यभिधायप्रतीहार्यानिर्दिश्यमानौवयःपरिणामपांडुरशिरसारक्ता
जावेक्षणापांगेनानवरतकृतव्यायामतयायौवनापगमेप्यशिथिलशरीरसंधिनासत्यपिमातंगत्वेनातिनृशंसा
कृतिनागृहीतार्यवेषेणधवलवाससापुरुषेणाधिष्ठितपुरोभागामाकुलाकुलकाकपक्षधारिणाकनकशलाका
कानिर्मितमप्यंतर्गतशुकप्रभाश्यामायमानंमरकतमयमिवपंजरमुद्वहताचंडालदारकेणानुगम्यमानामसु
रगृहीतामृतापहरणकृतकपटपटुविलासिनीवेषस्यश्यामतयाभगवतोहरेरिवानुकुर्वतींसंचारिणीमिवेंद्रनी
लमणिपुत्रिकामागुल्फावलंबिनानीलकंचुकेनावच्छन्नशरीरामुपरिरक्तांशुकरचितावगुंठनांनीलोत्पल

कुपितहरनयनहुताशन२ किरण

का॰पू॰ स्थलीमिवनिपतितसंध्यातपामेककर्णावसक्तदंतपत्रप्रभाधवलितकपोलमंडलामुद्यदिंदुबिंबछुरितमुखी
८ मिवविभावरीमाकपिलगोरोचनातिलकरचिततृतीयलोचनामीशानरचितानुरचितकिरातवेषामिवभवानी
मुरस्थलनिवाससंक्रांतनारायणदेहप्रभाश्यामलितामिव श्रियंदह्यमानमदनधूममलिनीकृतामिवरतिमु
न्मदहलिहलाकर्षणभयपलायितामिवयमुनामतिबहलपिंडालक्तकरसपल्लवितपादपंकजामचिरमृदितमहिषासु
ररुधिररक्तचरणामिवकात्यायनीमालोहितांगुलिप्रभापाटलितनखमयूखामतिकठिनमणिकुट्टिमस्पर्शमसहमा
नांतयाक्षितितलेपल्लवभंगानिवनिधायसंचरंतीमापिंजरेणोत्सर्पिणानूपुरमणीनांप्रभाजालकेनानुरंजितशरीरतया ८
भगवतापावकेनेवप्र जापतिमप्रमाणीकुर्वताजातिसंशोधनार्थमालिंगितदेहामनंगवारणशिरोनक्षत्रमालायमा

राग ४

10

नेनरोमराजिलतालवालकेन मेखलादामपरिगतजघनस्थलामतिस्थूलमुक्ताफलहारितेनस्तुचिना हारेणगंगास्रोत
सेव कालिंदीशंकया कृतकंठग्रहां शरदमिव पुंडरीकलोचनां प्रावृषमिव घनकेशजालां मलयमेखलामिव कृतचंदनपल्लवा
वतंसां नक्षत्रमालामिव चित्रश्रवणाभरणाभूषितां श्रियमिव करस्थितकमलशोभामनोहरामरण्यस्थलीमिवाश्लतरुपसंप
न्नां रक्षयोषितमिवांकुलीनां निद्रामिव लोचनग्राहिणीं मूर्छामिव मनोहारिणीमरण्यकमलिनीमिव मातंगकुलदूषितामं
मूर्त्तामिव स्पर्शवर्जितामालेख्यगतामिव दर्शनमात्रफलां मधुमासकुसुमसमृद्धिमिव विज्ञातिमनंगकुसुमचापलेखामि
व मुष्टिग्राह्यमध्यां यक्षाधिपतिलक्ष्मीमिवालकोद्भासिनीमतिरोपारूढयौवनामतिशयरूपाकृतिमनिमिषलोचनो
ददर्श। समुपजातविस्मयस्य चास्य मनसि नरपतेः अहो विधातुरस्या नेरूपनिष्पादनप्रयत्नः। तथाहि। यदि नामेयमात्म

का॰ भू॰ रूपापहसिताशेषरूपसंपदित्यादिना किमर्थमपगतस्पर्शसंभोगसुखे कृतं कुले जन्म मन्ये च मातंगजातिस्पर्शदोषस्य भ
१० यादस्पृशतेयमनेनोत्पादिता प्रजापतिना अन्यथा कथमियमक्लिष्टता लावण्यस्य न हि करतलस्पर्शक्लेशितानामवयवा
नामियमीदृशी भवति कांतिः सर्वथा धिग्विधातारमसदृशसंयोगकारिणमतिमनोहराकृतिरपि क्रूरजातिर्जायेनेयमसु
रश्रीरिव सततनिंदितसुरतारमणीया पुंडरीकजपतीत्येवमादि चिंतयत एव मे, वराजानमीषद्गलितकर्णपल्लवावतंसा प्रगल्भ
वनितेव साप्रणामाकृतप्रणामायां च तस्यां मणिकुट्टिमोपविष्टायां स पुरुषस्तं विहंगममादाय पंजरगतमेव किंचिदुपसृ
त्य राज्ञे न्यवेदयदब्रवीच्च देव विदितसकलशास्त्रार्थो राजनीतिप्रयोगकुशलः पुराणेतिहासकथालापनिपुणो वेदिता गीतश्रु १०
तीनां काव्यनाटकाख्यायिकाप्रभृतीनां सुभाषितानामध्येता स्वयं कर्ता परिहासालापपेशलो वीणावेणुमुरजप्रभृतीनां वाद्य

ख्यानक॰ मपरिमितानां

पुरुषस्त्री२
रा४

मुदधिरिव२

विशेषज्ञानामसमः श्रोता नृत्यप्रयोगदर्शननिपुणः चित्रकर्मणि प्रवीणो द्यूतव्यापारे प्रगल्भः प्रणयकलहकुपितकामिनी
प्रसादनोपायचतुरो गजतुरगलक्षणाभिज्ञः सकलभुवनतलरत्नभूतोयं वैशंपायनो नाम शुकः सर्वरत्नानां देवो भाजनमि
ति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमियमायाता। तदयमात्मीक्रियतामित्युक्त्वा नरपतेः पुरो निधाय पंजरमसावप
ससार। अपसृते च तस्मिन्स विहंगराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणमतिस्पष्टवर्णसंस्कारया गिरा कृतजयशब्दो
राजानमुद्दिश्यार्यामिमां पपाठ। स्तनयुगमश्रुस्नातं समीपवर्ति हृदयशोकाग्नेः। चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणां। रा
जा तु तच्छ्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनमतिमहार्हासनोपविष्टममरगुरुमिवाशेषनीतिशास्त्रपारगमतिपरिणत
वयसमग्रजन्मानमखिलमंत्रिमंडलप्रधानममात्यं कुमारपालितनामानमब्रवीत्। श्रुतो भवद्भिरस्य विहंगमस्य स्पष्टता व

नर३ हेमा२ स्वर४

मात्र४ माधुर्य ३ यम ~ वि ~ संस्कार १

का॰ ६ ओङ्कारोऽस्वरेण मधुरता प्रथमं तावदिदमेव महदाश्चर्यं यदेषं कीरवरो भागाममिव क्रमात्रानुस्वारसंयोगामतिपरिस्फुटां
१२ गिरमुदीरयति तत्र पुनरपरमपि महदाश्चर्यं यत्स्फोऽपभिमतविषयमनुजस्येव संस्कारवतो बुद्धिपूर्वा वर्णप्रवृत्तिरस्त
यात्वनेन समुत्क्षिप्य दक्षिणं चरणं स्तुत्वार्यजय शब्दं मान्यष्ठिया ति परिस्फुट सरंगीना। प्रायेण हि पशवः पक्षिणश्च भयाह
रमैथुननिद्रावेदिनो भवंती हन्तु महदिदं निमित्तमत्वेति भर्तुर्जिकुमारपालितः किं विस्मितत्वा च यमब्रवीत्। देव किमत्र चित्र
मेते हि शुकसारिकाप्रभृतयो विहंगम विशेषा यथाश्रुतां वाचमुच्चारयंतीत्यधिगतमेव देवेन तत्रान्यजन्मोपात्त संस्कारा
नुबंधेन वा पुरुषप्रयत्नेन वा संस्कारातिशयो जायत इति नातिचित्रमन्यदेतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटावा १९
गासीदग्निशापात्तु परिस्फुटालापता शुकानामुपजाता करिणां च जिह्वापरिवृत्तिरित्येवमुच्चारयति तस्मिन्न शिशिर

प्प२

12

किरणमंबरतलस्यमध्यमध्यास्तछमावैयन्नालिकाछेदप्रहारपटहनादानुसारीमध्याह्नशंखध्वनिरुदतिष्ठत्।तमाकर्ण्यस
मासन्नस्नानसमयइति।विसर्जितराजलोकःक्षितिपतिरास्थानमंडपादुत्तस्थौ।।अथचलतिनरपतावन्योन्यमतिरभससंघट्टन
चलितांगदपत्रमकरकोटिपाटितांशुकपटानामास्फेयदोलायमानकंठदाम्नामंसस्थलोल्लसितकुंकुमस्थासकेधूलिधूसरि
तदृश्यशिखामाल्लोच्चलकुसुमशेखरोत्पतदलिकदंबकानामर्धवलंबिभिःकर्णोत्पलैश्चुंबद्भिर्नर्तितगंडस्थलानामहमहमिकयागम
नप्ररणामलालसानांवक्षःस्थलप्रेंखोलितहारलतानामुत्तिष्ठतामासीदतिमहासंभ्रमोमहीपतीनां।।इतस्ततश्चनिःपततां
नांस्कंधदेशावसक्तचामराणांचामरग्राहिणीनांकमलमधुपानमत्तजरत्कलहंसनादजर्जरेण।पदेपदेरणितमणीनांमणिनूपुरा
राणांनिनादेनवारविलासिनीजनस्यसंचरतोजघनस्थलास्फालनरसितरत्नमालिकानांमेखलानांमनोहारिणागंकां
नूपुररवाकृष्टानांचधवलितास्थानमंडपसोपानफलकानांभवनदीर्घिकाकलहंसानांकोलाहलेनरसनारसितोत्सुकानां
रेण

नां३

स

का॰पू॰ चतारतरविराविणास्तुङ्खिरव्यमानकांस्यकेंकारदीर्घेणगृहसारसानांकूजितेनसरभसप्रचलितसकलसामन्तचरणातला
१२ हतस्यचास्थानमंडपस्यनिर्घातनिर्घोषगंभीरेणप्रकंपयतेववसुमतींध्वनिनाप्रतीहाराणांचपुर:ससंभ्रमसमुत्सारितजान
पदानांदंडिनांसमाबद्धहेलसुद्धैरुच्चारयतामालोकयालोकयेतिताररतरशब्दैरा भवनप्रासादकुंजेषूत्थितप्रतिशब्दतयादी
र्घतरतामुपगतेनालोकशब्देनराज्ञोचससंभ्रमावर्जितमौलिलोलचूडामणीनांप्रणमतामवनिपालमणिशलाकांकुराभि:
किरीटकोटिभिरुल्लिख्यमानस्यमणिकुट्टिमस्यनिस्वनेनप्रणामपर्यस्तानामतिकठिनमणिकुट्टिमनिपतनरणरणा
यितानांचमणिक र्णपूराणांनिनादेनमंगलपाठकानांचपुरोयायिनांजयजीवेतिमधुरवचनानुयातेनपदानांदि
गंतव्यापिनाकलकलेनप्रचलितजनचरणशतसं क्षोभभयादपहायकुसुमप्रकरमुत्पततांचमधुलिहांझंकारेणासं २१
क्षोभादितित्वरितपदप्रसरैरवनिपतिभि:केसरकोटिताडितानां क्रीडानूपुरस्वर[illegible] मणिस्तंभानांरणितेनस

चै

सकर ३ सम्रह २

र्वतः कुसुमितमिव तदास्थानमंडपमभवत्॥ अथ विसर्जितसकलराजलोको विश्रम्यतामिति स्वयमेवाभिधाय तां चंडा
लकन्यकां वैशंपायनः प्रवेश्यतामभ्यंतरमिति। ततो ह्लकरंकवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्य
तरं प्राविशत्। अपनीताशेषभूषणश्च विगलितांशुजालइव दिवसकरो चंद्रतारकाशून्यइव गगनाभोगः समुपहितसमुचितव्या
यामोपकरणां व्यायामभूमिमयासीत्। स तस्यां च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः श्रमवशादुन्मिषंती
भिः कपोलयोरीषद्दलितसिंदुवारमंजरीविभ्रमाभिरुरसि निर्दयरतिविमर्दच्छिन्नहारविगलितमुक्ता...फलप्रक
रानुकारिणीभिर्ललाटपट्टकेऽष्टमीचंद्रशकलतलोद्गसदमृतबिंदुबिंदुकिनीभिः स्वेदजलकणिकासंततिभिरलंक्रि
यमाणमूर्त्तिरितस्ततः स्नानोपकरणसंपादनसत्वरेण पुरः प्रधावता परिजनेन तत्कालविरलपरिजनेपि राजकुले समु
त्सारणाधिकारसूचितमाचरद्भिर्दंडिभिरुपदिश्यमानमार्गो विततसितवितानामनेकचारणगणानुबध्यमानमंड

स्तत ५

13

मो१ स्प२ सु३

का॰पू॰ सांसृकेरेरुणीकनकमयजलद्रोणीसनाथमध्यास्तुपस्थापितस्फाटिकस्नानपीठमेकांतनिहितैरतिसुरभिगंधसलि
१३ लपूर्णैः परिमलावकृष्टमधुकरपटलांधकारितमुखैरातपभयान्नीलकर्पटावगुंठितैरिवस्नानकलशैरुपशोभितांस्ना
नभूमिमगच्छत्।अवतीर्णंचजलद्रोणींवारविलासिनीकरमृदितामलकोपलिप्तशिरसोराज्ञःसमंतात्समुन्नतस्तुरं
शुकाः निबिडनिबद्धस्तनपरिकराः दूरसमुत्सारितवलयबाहुलताः समुत्क्षिप्तकर्णाभरणाः करोत्सारितालकागृ
हीतजलकलशाःस्नानार्थमभिषेकदेवताइववारयोषितः।ताभिश्चसमुन्नतकुचकुंभमंडलाभिर्वारिमध्यप्रविष्टोवनक
रिणीभिरिववनकरीपरिवृतस्तत्क्षणंराजारराज।जलद्रोणीसलिलादुत्थायस्नानपीठमच्छस्फटिकधवलंवरुण
इवराजहंसमारुरोह।ततस्ताःकाश्चिन्मरकतकलशप्रभाश्यामायमानानलिन्यइवमूर्तिमत्यःपत्रपुटैःकाश्चिद्र १३
जतकलशहस्तारजन्यइवपूर्णचंद्रमंडलविनिर्गतेनज्योत्स्नाप्रवाहेणकाश्चित्कलशोपश्लेषश्रमस्वेदार्द्रशरीर

जलदेवताइवस्फाटिकैः कलशैस्तीर्थजलेन काश्चिन्मलयसरितइवचंदनरसमिश्रेण सलिलेन काश्चिदुत्क्षि
प्तकलशपार्श्वविन्यस्तहस्तपल्लवाः प्रकीर्यमाणनखमयूखजालकाः प्रत्यंगुलिविवरविनिर्गतजलधाराः सलिलयं
त्रदेवताइवकाश्चिज्जाह्नवमपत्नेनुमाश्रिम्रबालातपाइवदिवसश्रियः कनककलशरुक्ता कुंकुमजलेनवारांगनाः क
मेणराजानमभिषिषिचुः। अनंतरमुदपादि च स्फारयन्निवश्रुतिपथमनेकप्रहतपटुपटहझल्लरीमृदंगवेणुवीणा
गीतनिनादानुगतोबंदिवृंदकोलाहलाकुलोभुवनविवरव्यापी मानशंखानामापूर्यमाणानामतिमुखरोध्वनिः
एवंच क्रमेण निर्वर्तिताभिषेकक्रियो विषधरनिर्मोकपरिलघुनीधवलेधौतेवाससीपरिधायशरदंबरैकदे
शइवजलक्षालनविमलतनुरतिधवलजलधरच्छेदशुचिनादुकूलपल्लवेनतुहिनगिरिरिवगगनसरित्स्रो
तसाकृतशिरोवेष्टनःसंपादितपितृजलक्रियोमंत्रपूतेनतोयांजलिनादिवसकरमभिप्रणम्यदेवगृहम

गमनाउपरचितमस्नूयतिस्म जलेभ्यश्च निष्क्रम्य देवगृहागतो निर्वर्तितार्थिकार्यो विलेपनभूमौ झंकारिभिरलिकदंबकैर
नुबध्यमानपरिमलेन मृगमदकर्पूरागुरुकुंकुमवाससुरभिणा चंदनेनानुलिप्तसर्वांगो विरचितामोदिमालती
कुसुमशेखरः कृतांबरपरिवर्त्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूमिपतिभिराहारमभिमतरसा
स्वादजातप्रीतिरवनिपो निर्वर्तयामास। परिपीतधूमवर्त्तिरुपस्पृश्य गृहीतताम्बूलस्तस्मात्प्रमृष्टमणिकुट्टिमप्रदे
शादुत्थाय नातिदूरवर्तिन्यासंभ्रमप्रधावितया प्रतीहार्या प्रसारितंमवलंब्यानवरतवेत्रलताग्रहणात्प्रसंगा
दनतिदृढकिसलयानुकारि करतलं करेणाभ्यंतरसंचारसमुचितेन परिजनेनानुगम्यमानो धवलांशुकप्रावारि
कापरिगतपर्यंततया स्फटिकमणिमयमिव बद्धमिवोपलक्ष्यमाणोमितिसुरभिणा मृगनाभिपरिगतेनामोदि २७
नाचंदनवारिणासिक्तशिशिरमणिभूमिमंदिरलब्धविप्रकीर्णेनाविमलमणिकुट्टिमगगनतलतारागणेनेव

विगलित२

15

कुसुमोपहारेण निरंतरनिचितमुत्कीर्णशालभंजिकानिबहेन संनिहितगृहदेवतेनेव गंधसलिलक्षालितेन
कलधौतमयेन स्तंभसंचयेन विराजमानमतिबहलकुंकुमागुरुधूपपरिमलमरविवलैडलनिवहधवलज लघ
रहेहस्तुविना कुसुमवासितप्रच्छदपटेन पट्टोपधानाध्यासितशिरोभागेन मणिमयपादुकाप्रतिष्ठितपादेन पा
र्श्वनिहितरत्नपादपीठेन तुहिनगिरिशिलातलसदृशेन शयनीयेन सनाथीकृतवेदिकं तुल्कास्थानमंडपमया उ क्रा ४२
सीत्। तत्र च शयनतलनिषण्णः क्षितितलोपविष्टया शनैः शनैरुत्संगनिहितौ सिलततयोरकज्जवाहिन्यानवननिनर
त्कोमलेन करसंपुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः
कुर्वन्मुहूर्तमिवासांचक्रे॥ ततो नातिदूरवर्तिनीमंतःपुरादेशं पायनमाद्याया गच्छेति समुपजाततवृत्तांतप्रश्नकुतूह

मि२

का॰रू॰ स्रोराज्ञांप्रतीहारीमादिदेश। सा क्षितितलविनिहितजानुकरतला यथाज्ञापयति देव इति शिरसि कृत्वाज्ञांय
२५ आदिष्टमकरोत्। अथमुहूर्तादिव वैशंपायनः प्रतीहार्या गृहीतपंजरः कनकवेत्रदंडावलंबिना किंचिदवनतपूर्वका
येन सितकंचुकावच्छन्नवपुषा जराधवलितमौलिना गद्गदस्वरेण मंदसंचारिणा विहंगजातिप्रीत्या जरत्कलहंसे
नेव कंचुकिनानुगम्यमानो राजांतिकमाजगाम। क्षितितलनिहितकरतलस्तु कंचुकी राजानं व्यज्ञापयत् देव दे
व्यो विज्ञापयंति देवादेशाद्वैशंपायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्यानीतः इत्यभिधाय गते तस्मिन् राजा
वैशंपायनमपृच्छत्। कच्चिदभिमतमास्वादितमभ्यंतरे भवता किंचिदशनजातमिति। सतु प्रत्युवाच। देव किं ना
मनास्वादितम् आमत्तकोकिललोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जंबूफलरसः। हरिनखरभिन्नम २५
त्तमातंगकुंभमुक्तार्द्रमुक्ताफलच्छवीनि खंडितानि दाडिमीबीजानि। कदलीदलहरिंति हरितानि च स्वेच्छया

देशा॥

नात्मनोजन्म ३ कौ ते माता व क्व पिता २

वा ४

प्राचीनामस्वकीफलानि। किं वा प्रलपितेन बहुना सर्वमेव देवीभिः स्वयंकरतलोपनीतममृतायतइत्येवंवादि
नो वचनमाक्षिप्य नरपतिरब्रवीत्। आस्तां तावत्सर्वमेतदपनयतु नः कुतूहलं भवानादितः प्रभृति का
त्स्न्येन कस्मिन्देशे भवाञ्जातः केन वा नाम कृतं कथं वेदानामागमः कथं शास्त्राणामधिगमः कुतः कलाः समासा
दिताः किं जन्मान्तरानुस्मरणमुत वरप्रदानमथवा विहगवेषधारी कश्चिच्छन्नं निवससि क्व पूर्वमुषितं कियद्वा
वयः कथं वा पञ्जरबन्धः कथं चण्डालहस्तगमनमिह वा कथमागमनमिति। वैशम्पायनस्तु स्वयमुपजातकुतूह
लेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत्। देव महतीयं कथा यदि कुतूहलमा
कर्ण्यतां॥ ॥अस्ति पूर्वापरजलनिधिवेलावलग्ना मध्यदेशालंकारभूता मेखलेव भुवो वनकरिकुलमदजल
सेकसंवर्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरु

का॰ १ पशोभितां मदकलकुररकुलकूज्यमानमरिचपल्लवां वनकरिकलभमृदिततमालकिसलयामोदिनीं मधु
२६ मदोपरक्तकेरलीकपोलकोमलच्छविभिः संचरद्वनदेवताचरणालक्तकरसरंजितेनेव पल्लवप्रचयेन संछादि
तां शुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपलकपिकुलकंपितकक्कोलच्युतफलशबलैरनवरत
निपतितकुसुमरेणुपांसुलैः पथिकजनविरचितलवंगपल्लवसंस्तरैरतिकठोरनालिकेरकेतकीपरिगतप्रां
तैस्तांबूलीलतावनद्धक्रमुकखंडमंडितैर्वनलक्ष्मीवासभवनैरिव विराजितां लतामंडपैरुन्मदमातंगकपोलस्थ
लगलितमदजलप्रस्रवणासिक्तेनेव निरंतरमेलालतावनेन मदगंधिनांधकारितां नखमुखविलग्नेभकुंभमुक्ता
फललुब्धैः शबरसेनापतिभिरभिहन्यमानकेसरिशतां प्रेतराजनगरीव सदासंनिहितमृत्युभीषणां महिषाधि १६
ष्ठितां च समरोद्यतपताकिनीव बाणासनारोपितशिलीमुखां विमुक्तसिंहनादां च कात्यायनीव प्रचलितखड्ग

भिष

कल्पांत १

=वारुणीगंडद्वीपं २= मृग १ परि ४ अंकुता २

भीषणा रक्तचंदनालंकृता च करालाशुककथेव संनिहितविपुलाचला शाशोपगता च प्रदोषवेलेव प्रकटनीलकंठा पल्लवारु
णा च अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च प्रावृडिव घनश्यामलानेकशतह्रदा च चंद्रमूर्तिरिव सतत
मृक्षसार्थानुगता हरिणाध्यासिता च राज्यस्थितिरिव चमरवालव्यजनोपशोभिता समदगजघटापरिपालिता
च गिरितनयेव स्थाणुसंगता मृगपतिसेविता च जानकीव प्रसूतकुशलवा निशाचरैर्गृहीता च कामिनीव चंदनमृगमद
परिमलवाहिनी रुचिरागुरुतिलकभूषिता च सोत्कंठेव विविधपल्लवानिलवीजिता समदना च बालेव व्याघ्रनखपंक्ति
मंडिता गंडैभरणा च पानभूमिरिव प्रकटितमधुकोशशतौघप्रकीर्णविविधकुसुमा च क्वचित्प्रलयवेलेव महावराह
दंष्ट्रोत्खातधरणिमंडला क्वचिद्दशमुखनगरीव चटुलवानरवृंदभज्यमानतुंगशाला क्वचिदचिरनिर्वृत्तवि
वाहभूमिरिव हरितसमित्कुशकुसुमशमीपलाशोपशोभिता क्वचिदुद्धतमृगपतिनिनादभीतेव कंटकिता क्वचि

का २ वि ३ ग्रीवे ४

२ नेत्रं मथगुणे वस्त्रे नरपूले विलोचने इति विश्वः २

का॰ म॰ मत्तवनकोकिलकलप्रलापिनी क्वचिदुन्मत्तेव वायुवेगकृततालशब्दा क्वचिद्विधवेवोन्मुक्ततालपत्रा क्वचित्स
२९ मरभूमिरिव शरशतनिचिता क्वचिदमरपतितनुरिव नेत्रसहस्रसंकुला क्वचिन्नारायणमूर्त्तिरिव तमालनी
ला क्वचित्पार्थरथपताकेव वानराक्रांता क्वचिदवनिपतिद्वारभूमिरिव वेत्रलताशतदुःप्रवेशा क्वचिद्विराटनगरी
व कीचकशतावृता क्वचिदंबरश्रीरिव व्याधानुगम्यमानतरलतारमृगा क्वचिद्गृहीतव्रतेव दर्भचीरजटावल्कलध क
ारिणी अपरिमितबहलपत्रसंचयापि सप्तपर्णोपशोभिता क्रूरसत्त्वापि मुनिजनसेविता पुष्पवत्यपि पवि
त्रा विंध्याटवी नाम॥ ॥तस्यां च दंडकारण्यांतःपाति सकलभुवनतलख्यातमुत्पत्तिक्षेत्रमिव भगवतो धर्मस्य
सुरपतिप्रार्थनापीतसकलसागरसलिलस्य मेरुमत्सरादंबरतलप्रसारितविकटशिखरसहस्रेणा दिवसकर २१
रथगमनपथमपनेतुमभ्युद्यतेनाचलेनापि सुरसंदेशवचसा विंध्यगिरिणा यस्य नु छेदिता इस्य जठरानलजीर्णा

सकल— ध्यं—

वातापिहानवस्यं सुरासुरमुकुटपत्रभंगकोटिचुंबितचरणारविंदो दक्षिणाशामुखविशेषकस्य सुरलोको
कादेकहुंकारनिपातितनहुषप्रकटप्रभावस्य भगवतो महामुनेरगस्त्यस्य पत्न्या लोपामुद्रया स्वयमुपरचि
ताल्ववालकैः करपुटसलिलसेकसंवर्द्धितैः सुतनिर्विशेषैरुपशोभितं पादपैस्तत्पुत्रेण च गृहीतव्रतेनाषाठिना
पवित्रभस्मविरचितत्रिपुंड्रकाभरणेन कुशचीरवल्कलमौंजीमेखलाकलितमध्येन गृहीतहरितपत्रपुटेन प्रत्युट
सुं ४ मटतामिध्मांदृष्टं नाम्नाय विचीकृतं यस्य चातिप्रभूतेध्माहरणाद् इध्मवाहस्ता इति पिता द्वितीयं नाम चकार
दिशि दिशि शुककुलहरितैश्च कदलीवनैः श्यामलीकृतपरिसरं सरिता च कलशयोनिपरिपीतसागरमार्गानुग
नयेव बद्धवेणिकया गोदावर्या परिगतमाश्रमपदमासीत्। यत्र च दशरथवचनमनुपालयन् उत्सृष्टराज्यो दश
वदनलक्ष्मीविभ्रमविरामो रामो महामुनिमगस्त्यमनुसरन् सह सीतया लक्ष्मणोपरचितरुचिरपर्णशालः पंच

18

का॰पू॰ वध्वांकेलिकालंसुवासा अतिचिरस्थितैवैधापि यत्र वंशाखानिलीननिभृतपाण्डुकपोतपंक्तयोऽलभन्त तापसा
२८ ग्निहोत्रधूमराजयदुवलस्य तेनरवैःलिकर्मकुसुमान्युच्चिचिंत्याः करतलाग्रविसंक्रांतो यत्र स्फुरति [illegible] तरु
किसलयेषु यत्र च पीतो हरीतं डिमलनिभिजलमिव मुनिना निखिलमात्मनोपातव त्रिपुविमके [illegible] महाह्रदे
षु। यत्र च दशरथसुतशितशरनिकरनिहतरजनिचरबलरुधिरसिक्त स्तम्भ [illegible] मद्य पित्तरागाः सुबंधिनि
२४ र्गतपलाशशिवा नातिनवकिसलयं मरण्यं। अधुनापि यत्र जलधरसमये गंभीरमभिनवजलधरनिवहनि
नादंमाकर्ण्य भगवतो राघवस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरंतो न गृह्णन्ति सस्यकवलमंजप्रम
श्रुजललवकुलितदीन [illegible] दृष्टयो वृद्धमृग्यो येषु जराजर्जरितविषाणकोटयो जानकीसंवर्धिता जीर्णा २८
मृगाः। यस्मिन्ननवरतमृगयाविनिहतशेषवनहरिणा प्रोत्साहित इव कृतसीताविप्रलंभः कनकमृगो राघवमनि

न॰ दशा२

दूरंजहार । यत्र च मैथिलीवियोगदुःखितौ दशवदनविनाशपिशुनौ चंद्रसूर्याविव कबंधग्रस्तौ समं रामलक्ष्म
णौ त्रिभुवनभयं महद्बक्रन्तुः । अत्यायतश्च यस्मिन्दशरथसुतैं निपातितो योजनबाहोर्बाहुरगस्त्यप्रसाद
न्नागैनहुषाजगरकायशंकामकरोदखिलजनस्य । जनकतनयया च भर्तृविरहविनोदनार्थमुटजाभ्यंतरे लि
खिता यत्र जैं निवासदर्शनोत्सुका पुनरपिधरशानिस्ताद्गुल्लसंती वनचरैरद्याप्यालोक्यते । तस्यैवंविधस्य संप्र
त्यपि प्रकरोपलक्ष्यमाणपूर्वदिक्सौंतस्यागस्त्याश्रमस्य नातिदूरे जलनिधिपानप्रकुपितवरुणप्रोत्साहिते
नागस्त्यमत्सरान्नराश्रमसमीपवर्त्यपरइवदेवसत्तामहतानूर्णल निर्मितत्पादितः प्रलयकालविघटिताष्टदि
ग्विभागसंधिबंधं गगनतलमिव भुवि निपतितमादिवराहसमुद्धृतधरामंडलस्थानमिव सलिलपूरितमनव
रतमज्जदुन्मद्दशबरकामिनीकुचकलशलुलितसलिलमुत्फुल्लकुमुदकुवलयकल्हारमुन्निद्रारविंदमक

का॰सू॰ रंदविंदुवृन्दैरनवरतमलिकुलपटलांधकारितसौगंधिकमारसितसमदसारसमंबुरुहमधुपानमत्तकल
२८ हंसकामिनीकृतकोलाहलमनेकजलचरपतंगसंचलनचलितचापलवीचिमालमनिलोच्छ्वासितक
ल्लोलशिशिरशीकरासारदुर्दिनमशंकितावतीर्णाभिरंभःक्रीडारागिणीभिःस्नानसमयेवनदेवताभिः
केशपाशकुसुमैःसुरभीकृतमेकदेशावतीर्णमुनिजनापूर्यमाणकमंडलुकलकलध्वनिमनोहरमुन्मिषिता
सितोत्पलवनमध्यचारिभिःसवर्णतयारसितानुमेयैःकादंबकदंबकैरासेवितमभिषेकावतीर्णपुलिंदराज
सुंदरीकुचचंदनधूलिधवलिततरंगमुपांतजातकेतकीरजःपटलबद्धपुलिनमासन्नाश्रमतापसकुमारिका
ड्वेल्लकषायपाटलतरुतरलमुपतटविटपिपल्लवपुटवीजितमविरलतमालवीथिकोपकंठमिवबलि २९
निर्वासितेनसेव्यमानंप्रतिदिनमृष्यमूकवासिनासुग्रीवेणगवयकुसुमफलपरिक्लृप्तताभिरुदवासितापं

ता २

४०

सानांदेवतार्चनोपयुक्तकुसुमाभिरुत्पंडज्जलचरपतंगकुलपक्षपुटविगलितजलबिंदुसेकसुकुमारकिसल
याभिर्लतामंडपतलस्थितशिखंडिमंडलारब्धतांडवाभिरनेककुसुमपरिमलवाहिनीभिर्वनदेवतानिश्वास
वासिताभिरिववनराजिभिरुपगूढतीरमपरसागराशंकिभिः सलिलमादातुमवतीर्णैर्जलधरपटलैरिवजर
हलपंकमलिनैर्वनकरिभिरनवरतमापीयमानसलिलमगाधमजातिमभयानिधानंपंपाभिधानंपद्मसरः
॥यत्रचदिवापिविकचकुवलयघ्नमाश्यामायमानपत्रसंपुटान्यद्यापिमूर्तिमंतिमशापयस्तानीवमध्यचारिणामा
लोक्यंतेचक्रनाम्नांमिथुनानि।तस्यचैवंविधस्यपद्मसरसःपश्चिमेतीरेराघवशरप्रहारजर्जरितस्यजीर्णतालतरु
खंडस्यसमीपेदिग्गजकरदंडानुकारिणाजगरेणसततमावेष्टितमूलतयाबद्धमहालवालमंडलइवतरु
गस्कंधावलंबिभिरनिलवेल्लितैरहिनिर्मोकैर्ध्वतोत्तरीयश्चवदिक्चक्रवालपरिमाणमिवग्रहीतुंभुवनांतरालविस्त्र

ना३

का०पू० कीर्णोनिशाखासंचयेनप्रलयकालतांडवप्रसारितभुजसहस्रमुडुपतिशकलशेखरमिवविडंबयन्नभ्युद्यतः
२० पुरातनतयापतनभयादिवपवनस्कंधवलयैर्निखिलशरीरव्यापिनीभिरतिदूरोन्नताभिर्जीर्णतयाशिराभिरिव
व्रततिभिःपरिवृतोजरातिलकबिंदुभिरिवनिजकंटकैराचिततनुरितस्ततःपयःपीतसागरसलिलैर्गगनागतैःप
क्षरथैरिवशाखांतरेषुनिलीयमानैःछायामंबुभारालसैरार्द्रीकृतपल्लवैर्जलधरपटलैरप्यदृष्टशिखरदेशः
तुंगतयानंदनवनश्रियमिवालोकयितुमभ्युद्यतःसमीपवर्त्तिनामुपरिसंचरतामंबरतलगमनखेदशयासितानां
रविरथतुरंगमाणांस्कंधपरिस्रुतैःफेनपटलैःसंदेहिततूलराशिभिर्धवलीकृतशिखरशाखोवनगजकपोलकंडूय
नसंक्रांतमदसलिलेननिलीनमधुकरमालेनलोहशृंखलाबंधनिश्चलेनेवकस्थांतस्थालिनामूलेनोपेतःकोट २०
राभ्यंतरनिविष्टैःस्फुरद्भिःसजीवइवमधुकरपटलैर्दुर्योधनइवलक्षितशकुनिपक्षपातःपद्मनाभइववनमालोप

वधू२

गूढो नवजलधरव्यूह इव वनमसि दर्शितो भगवतीरविसुतयनतल्लादलोकनप्रासाद इव वनदेवतानामधिपतिरिव दंडका
रण्यस्य नायक इव सर्ववनस्पतीनां सखेव विंध्यस्य शाखाबाहुभिरुपगूह्येव विंध्याटवीमवस्थितो महाञ्जीर्णः शा
ल्मलीवृक्षः। तस्य च शाखाग्रेषु कोटरोदरेषु स्कंधसंधिषु जीर्णवल्कलविवरेषु पल्लवान्तरेषु च महावकाशतया विस्रब्धवि
रचितकुलायसहस्राणि दुरारोहतया विगतविनाशभयानि नानादेशसंगतानि शुककुलानि प्रतिवसंति स्म। यैः परि
णामविरलदलनिचयोपि स वनस्पतिरविरलदलनिचय इव श्यामल इवोपलक्ष्यते दिवानिशं निलीनैः। ते च तस्मिन्वनस्पताव
नितान्त्यां निशात्य रजनीमात्मनीडेषु प्रतिदिनमुत्थायोत्थायाहारान्वेषणाय नभसि विरचितपंक्तयो मदकलहलधरह
लमुखोल्लेखविप्रकीर्णां बहुस्रोतसमंबरतले कलिंदकन्यामिव दर्शयंतः सुरगजोन्मूलनविगलद्दकाशकमलि
नीशंकामुपजनयंतो दिवसरथतुरंगप्रभानुलिप्तमिव गगनतलमुपपादयंतः संचारिणीमिव मरकतस्थलीं विडं

केर   ल४   शकुनि५   गंगा२

र३

का॰ प्र॰ वर्यंतः शैवलपल्लवावलीमिवांबरसरसि प्रसारयंतो गगनतलवितितैः पक्षपुटैः कदलीदलैरिव दिवसकर
२१ खरकरनिकरपरिखेदितान्याशासुखानि वीजंतो वियति विसारिणीं शष्पवीथीमिव रचयंतः सेंद्रायुधमिवांतरिक्ष
मादधाना विचे रुः ते शुकशकुनयः कृताहाराश्च पुनः प्रतिनिवृत्यात्मकुलायावस्थितेभ्यः शावकेभ्यो विविधान्फ
लरसान्कलमंजरीविकारांश्चाहृत्य रागाद्धिरा रक्तशार्दूलनखकोटिपाटलेन चंचुपुटेन दत्वा तनयानुत्संगयंति स्म।
एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेवैको विधिवशात्सूनुरभ
वं। अतिप्रबलया चाभिभूता तेनैव प्रसववेदनया जननी मे लोकांतरमगच्छत्। अभिमतजायाविनाशदुःखितोपि मे तातः पि३
सुतस्नेहाद्दत्तनिरुध्य प्रसरमतिशोकवेगमेकाकी मत्संवर्द्धनपर एवाभवत्। अतिपरिणततया च कुशचीरानुकारि २१
णीमल्पावशिष्टशीर्णपिच्छजालजर्जरामवस्रस्तांसदेशशिथिलामपगतोत्पतनसंस्कारां पक्षसंततिमुद्वहन्

22

पाटलढग्रकंपत्तया संतापकारिणी मंगलग्रांजरामिव विधुतचन्द्रकठोरशेफालिकाकुसुमनालपिंजरेण कलममंजरीदलन
मसृणीकृतशिरोग्रांतरेखेन स्फुरिताग्रकोटिना चंचुपुटेन परनीडनिपतिताभ्यः शालिवल्लरीभ्यस्तंडुलकणानादाय
तरुमूलनिपतितानि शुककुलावदलितानि च फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मत्समरादा। अनुदिवसमात्मन
श्च मदुपभुक्तशेषमकरोदशनं। एकदा तु प्रभातसंध्यारागलोहिते गगनकमलिनीमधुरक्तसंपुटे वृद्धहंस इव मंदाकिनीपुलिना
दपरजलनिधितटमवतरति चंद्रमसि परिणतरंकुरोमपांडुनि व्रजति विशालतामाशाचक्रवाले गजरुधिररक्तहरिसटालोमलो
हिताभिरातप्तलाक्षारंजिततंतुपाटलाभिरायामिनीभिः शिशिरकिरणदीधितिभिः पद्मरागरत्नशलाकासंमार्जनीभिरिव समु
त्सार्यमाणे गगनकुट्टिमकुसुमनिकरे तारागणे संध्यामुपासितुमुत्तराशावलंबिनि मानससरस्तीरमिवांबरादवतरति सप्तर्षिमंडले
तटस्थविवृतशुक्तिसंपुटविप्रकीर्यमिव तारा किरणाभेरणाधौतविगलितस्तुषारामिव मुक्ताफलैस्तुद्दहति धवलितपुलिनतलमुदध

निकर

का॰प्र॰ तिरवेतिरेतुषारबिंदुवर्षिणिप्रबुद्धशिखिकुलेविजृंभमाणकेसरिणिकरिणीकदंबकप्रबोध्यमानसमदकरिणिह्याजल
२२ बहलकेसरकुसुमनिकरमुदयगिरिशिखरस्थितंसवितारमिवोद्दिश्यपल्लवांजलिभिरुत्क्षिपत्सुकाननेषुरासभरोमधूसरासु
वनराजिषुवनदेवताप्रासाद॰॰तरूणांशिखरेषुपारावतमालायमानासुधर्मपताकास्विवसमुन्मिषंतीषुतपोवनाग्निहोत्रधूमलेखासु
अवश्यायशीकरिणिदुलितकमलवनेरतिखिन्नशबरसीमंतिनीस्वेदकणिकापहारिणिवनमहिषरोमंथफेनबिंदुवाहिनिचलितप
ल्लवलास्योपदेशव्यसनिनिविहरमानकमलषंडमधुशीकराकर्षिणिकुसुमामोदतर्पितालिजालेनिशावसानजातजडिम्निमं
दमंदसंचारिणिप्रवातिप्राभातिकेमातरिश्वनिकमलवनप्रबोधमंगलपाठकानांमिमगंडडिंडिमानांमधुलिहांकुमुदोदरेषुबन
ध्यमानरलपुर्यनिरुद्धश्रुतीनांमुखैरुद्वरत्सुझंकारेषुप्रभातशिशिरमातु॰ताइतस्ततःसजन्तुरसाश्लिष्टयरमभागमिवसशोष २२
निद्राजिह्मिततारकंचक्षुरुन्मीलयत्सुशनैःस्थलशय्याधूसरक्रोडरोमराजिषुवनकुरंगेषुघ्रितस्नातःसंचरत्सुवनचरेषुदिदृक्षंभमा
ज्ञानैः

रातोश्रोच्चहारिणि पंपासरःकलहंसकोलाहले समुल्लसति नर्तितशिखंडिमंडले मनोहरे वनगजकर्णतालशब्दे क्रमेण च ग
गनतलमवतरति दिवसकरवारणस्यावचूडचामरकलापइवोपलक्ष्यमाणे रोमंजिष्ठरागलोहिते किरणजाले शनैःशनैरुदिते
भगवति सवितरि पंपासरःपर्यंततरुशिखरसंचारिणि अध्यासितशिखरे दिवसकरजन्मनि निवृत्ततारे पुनरिव कपीश्वरे वनमभिय
ततिबालातपे जाते प्रत्युषसि नचिरादिव दिवसस्याष्टमभागभाजि स्पष्टमासि भास्वति भूते गतेषु यथाभिमतानि दिगंतराणि
.. शुककुलेषु कुलायनिलीननिभृतशावकसनाथे पिनिःशब्दतयाशून्यइव तस्मिन्ननस्यातौ स्वनीडादस्थितएव ताते मयि च शैशवा
९७ दसंजातबले समुद्भिद्यमानपक्षसंपुटे तातसमीपवर्तिनि कोटरोदरगते सहसैव तस्मिन्महावने संत्रासितसकलवनचरः सरभसमु
त्पतत्पतत्रिपक्षशब्दः समंततो भीतकरिकैपोतचीत्कारपीवरः प्रचलितलताकुलितमत्तालिकुलझंकारितमांसलः परिभ्रमद्धोर
घोणावनवराहघुर्घुरारावो गिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितः कंपयन्निव तरून् भगीरथावतार्यमाणगंगाप्रवाहकलकलबहलो
रध्वनिनिर्भर

का०पृ भीतवनदेवताकर्णितोमृगयाकोलाहलध्वनिरुदचरत्तमाकर्ण्याहमश्रुतपूर्वंसमुपजातवेपथुरर्भकतयाजर्जरितकर्णविवरो
२३ भयविह्वलःसमीपवर्तिनः पितुःप्रतीकारबुद्ध्याजराशिथिलितपक्षसंपुटांतरमविशं।अनंतरंचससंभ्रमसमितोगजयूथपतितुलित
कमलिनीपरिमलइतःक्रोडकुलदश्यमानभद्रमुस्तारसामोदइतःकरिकलभभज्यमानशल्लकीकषायगंधइतोनिपतितशुष्कप
त्रमर्मरध्वनिरितोवनमहिषशृंगकुलिशभज्यमानवल्मीकशिखरइतोमृगकदंबकमितोवनवराहयूथमितोवनमहिषवृंदमितःशि
खंडिमंडलविरुतमितःकपिंजलकुलकूजितमितःकुररकुलकोलाहलमितोमृगपतिनखभिद्यमानकुंभकुंजररसितमितआर्द्रपंक
मलिनावराहपद्धतिरियमभिनवशष्पकवलरसश्यामलाहरितारोमंथफेनसंततिरयमुन्मदगंधगजगंडकंडूयनपरिमलोल्ली
नमधुकरसरसरेखानिपतितरुधिरबिंदुसिक्तशुष्कपत्रपाटलाकरुणपदवीयेनहृदयस्वराणांमृदितविटपिपल्लवपुटमेतत्खड्गिकुलक्री २३
डितंमेषनखकोटिविलिखितविकटपत्रलेखोरुधिरपाटलंकरिमौक्तिकनिकरदंतुरोमृगपतिमार्गएषाप्रत्यग्रप्रसूतवनम्ह

गीगर्भरुचिरलोहिनी भूमिरियमरवीवेणिकान्तकारिणी प्रस्रुचरस्य गजयूथपतेर्मदजलमलिना संचारवीथी चमरी
पंक्तिरियमनुगम्यतां मुहुर्मुक्तागकरीषपांसुलात्वरिततरमध्यास्यतामियं वनस्थली तरुशिखरमारुह्यतां मातोका
तां दिगियमाकर्ण्यतामयं शब्दो दृश्यतां धनुरवहितैः स्थीयतां विमुच्यन्तां श्वान इत्यन्योन्यमभिवदतो मृगयाप्रसक्तस्य म
हतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमश्रृणवं। अथ नातिचिरादेवानुलेपनाईमृदं
गध्वानधीरेण गिरिविवरोद्भ्रमितप्रतिनादगम्भीरेण शबरशरैस्ताडितकेसरिणां निनादेन संत्रस्तयूथभ्रष्टानामेकाकिनां
संचरतामनवरतमुक्तकरास्फोटमिश्रेण जलधररसितानुकारिणा गजयूथपतीनां कण्ठगर्जितेन सरभससारमेयविक्षु
प्यमानावयवानामालोलकातरैस्तारकाणामीरणाकानां च कोलाहलजनितेन निहतयूथपतिवियोगिनामनुगतकलभकानां
नामास्थित्यास्थित्यसमाकार्णिकलकलमुल्लोकणिपिच्छवतां नामितस्ततः परिभ्रमतीनां प्रत्यग्रपतिविनाशशोकदीर्घेण क

२५

का॰पू॰ शिरगीनां चीत्कृतेन करिणीनां कतिपयदिवसप्रसूतानां च खड्गधेनुकानां त्रासपरिभ्रष्टपोतकान्वेषिणीनां मुहुर्मुहुरुत्कं
२८ ठमतिकरुणमारसंतीनामाक्रंदितेन तरुशिखरसमुत्पतितानामाकुलाकुलचारिणां पत्ररथानां कोलाहलेन रूपान्तु
सारप्रधावितानां मृगयूनां वृत्तिरभसपादपातातिद्धाताद्भुवः कंपमिव जनयता चरणशब्देन करालिताकृष्टमौर्वीजन्मना
च मदकलकुररकामिनीकंठकूजितकठोरेण शरनिकरवर्षिणां धनुषां निर्ह्रादेन पवनाहतिक्वणितधाराणामसीनां च कठि
नमहिषस्कंधपीठपातिनां रणितेन श्वनां च सरभसविमुक्तदीर्घस्वनीनां वनांतरव्यापिना कलकलेन सर्वतः प्रचलितमिव
तदरण्यमभवत् अचिराच्च प्रशांते तस्मिन्मृगयाकोलाहले निर्दृष्टम् कजलधरवृंदानुकारिणि मध्य ना वसानोपशांतवा
रिणि सागर इव स्तिमिततामुपगते कानने मंदीभूतभयोऽहमुपजातकुतूहलः पितुरुत्संगादीषदिव निष्क्रम्य कोटरस्थ ए २८
व शिरोधरां प्रसार्य संजातसत्तरलतारकः शैशवात्किमिदमिति समुपजातविस्मयो दिदृक्षुस्तामेव दिशमनु चक्षुः प्राहिणवं॥

अभिमुखमापतंतंतंतस्माद्वनांतरादर्जुनभुजदंडसहस्रविप्रकीर्णमिवनर्मदाप्रवाहमनिलचलितमिवतमालका
ननमेकीभूतमिवकालरात्रीणांयामसंघातमंजनशिलास्तंभसंभारमिवक्षितिकंपविघूर्णितमंधकारसमूहमिवरवि
किरणाकुलितमंतकपरिवारमिवपरिभ्रमंतमवदारितरसातलोद्गतमिवदानवलोकमशुभकर्मसमूहमिवैकत्र
संगतमशेषदंडकारण्यनिवासिमुनिजनशापसार्थमिवसंचरंतमनवरतशरनिकरवर्षिरामनिहतखरदूषण
बलनिवहमिवतद्रूपध्यानात्पिशाचतामुपगतंकलिकालबंधुवर्गमिवैकत्रसंगतमवगाहस्थितमिववनमहिष
यूथमचलशिखरस्थसिंहकराकृष्टपतनशीर्णमिवकालमेघपटलमखिलभूपविनाशायधूमकेतुजालमिवसमुद्गत
मंधकारितकाननमनेकसहस्रसंख्यमतिभयजननमुत्पातजातमिवशबरजनमद्राक्षं॥ मध्येचतस्यातिमहतः
शबरसैन्यस्यप्रथमेवयसिवर्तमानमतिकर्कशत्वादायसमयमिवनिर्मितमेकलव्यमिवजन्मांतरागतमुद्भिद्यमा

का॰पू॰ नश्मश्रुराजितयाऽथ मदलेखामज्जमानगंडभित्तिमिव गजमथयतिकुमारैम सितकुवलयश्यामलेन देहप्रभाप्रवा
२५ हेणाकालिंदीजलेनेव क्षरयंतमरण्यमाकुटिलाग्रेणास्कंधावलंबिना कुंतलभारेणाकेसरिणमिव गजमदमलिनीकृतेन केस
रेकलापेनोपेतमायतललाटमनतितुंगघोरघोणमुद्यनीतस्य कर्णाभरणतो भुजंगफणामणीरायरक्तैरंशुभिरालोहिती
भूतेन पर्याशिरयनाभ्यासाछन्नयल्लवपाटलेनेव वामपार्श्वेन विराजमानमचिरहतगजकपोलग्रहीतेन सप्तच्छदपरिमल
वाहिना कृष्णागुरुपंकेनेव सुरभिरागमदेन कृतांगरागमुत्पतत्परिमललुब्धेन परिभ्रमता मान्धरछ्रानुकारिणा मधुकर
कुलेन तमालपल्लवेनेवानिवारितातपमालोलकर्णापल्लवव्याजेन दंडवन्निर्जितया मध्ययुक्तसेवया विंध्याटव्येव क
रतलेनापमृज्यमानगंडस्थलस्वेदलेखमापा[illegible]च्छलया हरिणाकुलसंध्यायमानया शोणितार्द्रयेव दृष्ट्या रंजयंतमाशावि २५
भागानाजानुलंबेन वनकुंजरकरभमारामिव गृहीता निर्मितेन चंडिकाचुधिरदानार्थमसकृन्नि[शि]तशस्त्रोल्लेखविषमित

२

वि-

26

शिखरेणाभुजयुगलेनोपशोभितमंतरांतरालम्बमाश्यानहरिराभुविरबिंदुनास्वेदजलकणाभिचितेनगुंजाफलैर्मिश्रैः
= करिकुंभमुक्ताफलैरिवविरचिताभरणेनविंध्यशिलातलविशालेनवक्षःस्थलेनोद्भासमानमविरतश्रमाभ्यासादुल्लिखि
तोदरमिभमदमलिनमालानस्तंभयुगलमुपहसंतमिवोरुदंडद्वयेनलाक्षालोहितकौशेयपरिधानमकारणोपिक्रूरतया
परिबद्धत्रिपताकोग्रभ्रुकुटीकरालेनललाटपट्टकेनप्रबलभक्त्याराधितयामत्परिग्रहोयमितिकात्यायन्यात्रिशूलेनेवांकि
तमुपजातपरिचयैरनुगच्छद्भिःश्रमवशाद्दूरविनिर्गताभिःस्वभावपाटलतयाशुष्काभिरपिहरिराशोणितमिवक्षरंती
भिर्जिह्वाभिरावेद्यमानखेदैर्विवृतमुखतयास्पष्टदृष्टदंष्ट्रांकुरैरंतरालग्नकेसरिसटानिवसक्केभागमनुध्रुवद्भिःस्थू
लवराटकमालिकापरिगतकंठैर्महावराहप्रहारजर्जरैरल्पकायैरपिमहाशक्तित्वादनुपजातकेसरैरिवकेसरिकिशोरकैर
कैर्मृगवधवैधव्यदानदक्षैरनेकवर्णैःश्वभिरनिशमाणाभिश्चकेसरिणामभययाचनार्थमागताभिःसिंहिकाभिरिव

कृति३

कैश्चिद्रक्तचरितमिवदर्शयद्भिः समुत्खात(गज)विषाणैः ३ दीप३

का.पृ. कौलेयककुटुम्बिनीभिरनुगम्यमानं कैश्चिदागृहीतचमरबालगजदंतभारैः कैश्चिद्दक्षिणपर्णबद्धमधुपुटैः कैश्चिन्मृग

२८ पतिभिरिवगजकुंभमुक्ताफलनिकरसनाथपाणिभिः कैश्चिद्यातुधानैरिवगृहीतपिशितभारैः कैश्चित्प्रमथैरिवकेसरि

चर्मधारिभिः कैश्चित्क्षपणकैरिवमयूरपिच्छधारिभिः कैश्चिच्छिशुभिरिवकाकपक्षधरैः कैश्चिज्जलदागमदिवसैरिवजल

धरच्छायामलिनैरनेकवृत्तान्तैः शबरवृन्दैः परिवृतमरण्यमिवसखड्गधेनुकंभमिवनवजलधरमिवमयूरपिच्छचित्रचापधारिणं

बकराक्षसमिवगृहीतैकचक्रमरुणानुजमिवोद्धूर्णमहानागदर्शनंभीष्ममिवशिखण्डिशत्रुं निदाघसमयमिवसततविस्फू

तमृगतृष्णं विद्याधरमिवमानसवेगं पराशरमिवयोजनगंधानुसारिणं घटोत्कचमिवभीमरूपधारिणं हिमवत्कन्यकाकेशपा

शमिवनीलकंठचंद्रकाभरणं हिरण्याक्षदानवमिवमहावराहदंष्ट्राविभिन्नवक्षःस्थलमतिरागिणाकृतवंदिपरिग्रहंपि

शिताशनमिवरक्तचुम्बकं गीतकलाविन्यासमिवनिषादानुगतमंबिकात्रिशूलमिवमहिषरुधिरार्द्रकायमभिनव २८

नेक४ मिवं२ वहु१

ध्या२ मा ३ सहोदरमिवपापस्य २

यौवनमपिह्पितेवबहुव्यसनैःकृतसारमेयसंग्रहमपिमूलफलाशिनंकृष्णमपथ्युदर्शनंस्वछंदप्रचारममपिदुर्गै
कशरणंक्षितिभृत्पादानुवर्त्तिनमपिराजसेवानभिज्ञमपत्यमिवविंध्(स्यांशावतारमिवकृतांतस्यसारथिमिवकलि
कालस्यभीषणमपिमहासत्वतयागंभीरमिवोपलक्ष्यमाणमनभिभवनीयाकृतिंमातंगकनामानंशबरसेनापतिमपश्यं
अभिधानंतुपश्चात्तस्याहमश्रौषं।आसीच्चमेमनस्यहोमोहप्रायमेतेषांजीवितंसाधुजनगर्हितंचचरितं।तथाहि।पुरुषपि
शितोपहारोधर्मबुद्धिराहारःसाधुजननिंदितोमधुमांसादिःश्रमोमृगयाशास्त्रंशिवारुतंउपदेष्टारःकौशिकाःप्रज्ञाशकुनिज्ञा
नेपरिचिताःश्वानःराज्यंशून्यास्वटवीषुपानमुत्सवोमित्राणिक्रूरकर्मसाधनानिधनूंषिसहायाविषदिग्धमुखाभुजंगाइ
वसायकागीतमुन्मादकारिमुग्धमृगाणांकलत्राणिबंदीकृताःपरयोषितःक्रूरात्मभिःशार्दूलैःसहवासःपशुरुधिरेणदेवता
र्चनंमांसेनबलिकर्मचौर्येणजीवनंभूषणानिभुजंगमणयोयस्मिन्नेवचकाननेनिवसंतितदेवोत्खातमूलमशेषतःकुर्वं

सदसत्तां ४

27

स~

का०पू० तीतिचिंतयत्येवमयिशबरसेनापतिरटवीपरिभ्रमणसमुद्भवंश्रममपनिनीषुरागत्यतस्यैवशाल्मलीतरोरधःछायायामव
२७ तारितकोदंडःत्वरितपरिजनेनोपनीतेपल्लवासनेसमुपाविशत्।अन्यतरस्तुशबरयुवाससंभ्रममवतीर्यतस्मात्करयुगल
परिक्षोभितांभसःसरसोवैडूर्यद्रवानुकारिप्रलयदिवसकरकिरणोपतापादंबरैकदेशमिवविलीनमिंदुमंडलादिवप्रस्यंदितंद्रु
तमिवमुक्ताफलनिकरमत्यच्छतयास्पर्शानुमेयंहिमजलशिशिरमरविंदकोशरजःकषायमंभःकमलिनीपत्रपुटेनप्रत्यग्रोद्धृ
तांश्चधौतपंकनिर्मलमृणालिकाःसमुपाहरत्।आपीतसलिलश्चसेनापतिस्तामृणालिकाःशिशिरकरकलाइवसैंहिकेयः
क्रमेणाग्रसत्।अपगतश्रमश्चोत्थायपरिपीतांभसासकलेनशबरसैन्येनानुगम्यमानःशनैःशनैरभिमतंदिगंतरमयासीत्।स
कैरकुंजरछबरस्तस्मात्पुलिंदवृंदादनासादितपिशितःपिशिताशनइवातिविकृतदर्शनःपिशितार्थीतस्मिन्नेवतरुमूलेमुहू २७
र्तमिवव्यलंबत।अंतर्हितेचशबरसेनापतौसजीर्णशबरःपिबन्निवास्माकंशुककुलानामायूंषिरुधिरबिंदुपाटलयाक्ष्णः

तम२ लेन३

हि२

लत्तापरिवेषभीषणायाहृष्ट्वा गणायन्निव शुककुलकुलायस्थानानि निश्शब्देनेव विहगाभिषास्वादलालसः सुचिरमा
रुरुक्षुः स्तवनस्पतिमामूलात्स्पर्श्यन् । व्युत्क्रांतमिव चेतसिं स्कंदरो । तदालोकनभीतानां शुककुलानामस्माकमसुभिः
किमिवं दुष्कर ... मकरुणानां यतः स तमनेकतालतुंगमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेन पादपमारुह्य
तानतुपजातोत्पतनशक्तीन् कांश्चिदल्पदिवसजातान् गर्भछविपाटलान् शाल्मलीकुसुमशंकामुपजनयतः कांश्चिदुद्भिद्य
मानपक्षतया नलिनीसंवर्तिकानुकारिणः कांश्चिदर्कफलसदृशान् कांश्चिल्लोहितायमानचंचुपुटानीषद्विघटितदल
पुटपाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः कांश्चिदनवरतशिरःकंपव्याजेन निवारयत इव प्रतीकारासमर्थानेकै
कैश्यः फलानीवतस्य वनस्पतेः शाखांतरेभ्यः कोटरांभ्यंतरेभ्यश्च शुकशावकानगृहीत् । अपगतासूंश्च कृत्वा क्षितावपातय
त् । तातस्तु तं महांतमकांडएव प्राणहरणामप्रतीकारमुपप्लवमुपनतमालोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रां

कय

त२

सं २ द्विज— रा— सं ४ वि २

का॰सू॰ २८ ततस्स तातः कातरविषादशून्यामस्रुजलप्लुतां दृष्टिमितस्ततो विक्षिपन्नुच्छुष्कतालुरात्मनः प्रतीकारासमर्थः संत्रासस्रस्तसंधिशि
थिलेन पक्षपुटेनाच्छाद्य मां तत्कालोचितप्रतीकारमन्यमानः स्नेहपरवशो मद्रक्षणाकुलः किंकर्तव्यतामूढः क्रोडेमागोन
मामवष्टभ्य तस्थौ। असावपि पापः क्रमेण शाखान्तरेषु संचरमाणः कोटरद्वारमागत्य जीर्णासितभुजंगभोगभीषणं प्रसार्य
विविधवनवराहवसाविस्रगन्धिकरतलमनवरतकोदण्डगुणाकर्षणव्रणाङ्कितप्रकोष्ठमन्तककरदण्डानुकारिणं वामबाहुमतिनृशं
सो मुहुर्मुहुर्दत्तचञ्चुपुटप्रहारमुत्कूजन्तं मे पितरमपकृष्य तातमपगतासुमकरोत्। मां तु स्वल्पत्वाद्भयसंपिण्डिताङ्गत्वात्सावशेषत्वाच्चा
युषः कथमपि तत्पक्षसंपुटान्तरगतं नालक्षयत्। उपरतं च तमवनितले शिथिलशिरोधरमधोमुखमपातयत्। अहमपि
तच्चरणान्तरप्रवेशितशिरोधरो निभृतमङ्कदेशान्निर्गलितस्तेनैव सह पतन्। अवशिष्टपुण्यतया पवनवशपुञ्जीकृतस्य म
हतः शुष्कपत्रराशेरुपरि पतितमात्मानमपश्यम्। अङ्गानि मे न व्यशीर्यन्त। यावच्चासौ तस्मात्तरुशिखरादवतरति तावदहम २८

सं ४ र—

पिशीर्णपर्णा [illegible] सवर्णत्वाद्दुरुपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्यनृशंस इव प्राणपरित्यागयोग्ये
पिकालेबालतयाकालांतरभुवःस्नेहस्यानभिज्ञोजन्मसहभुवाभयेनैव केवलमभिभूयमानः किंचिदुपजाता
प्यपक्षसंपुटाभ्यामीषत्कृतगमनावष्टंभोऽवलुठन्नितस्ततः कृतांतमुखकुहरादिवनिर्गतमात्मानंमन्यमानोना
तिदूरवर्तिनःशबरसुंदरीकर्णपूरस्ययुगपत्पल्लवस्य संकर्षणपटनीलतरच्छाययोपहसितनवगगनांबरदेहस्य विमलैः
कालिंदीकल्लोलैरिवविरचितच्छायस्य वनकरिमदसलिलैरिवोपसिक्तकिसलयस्य विंध्याटवीकेशपाशस्येवमुद्द
हतो दिवाप्यंधकारितशाखांतरस्यातिविरलसूर्यकिरणमतिगहनमपरस्येवपितुरुत्संगमतिमहतःशाल्मलिविटपस्य
मूलदेशंप्राविशं। अवतीर्यसतेनसमयेनक्षितितलविप्रकीर्णान्कांश्चित्ताम्रचूडकशिशूनेकलतापाशसंयतानादाय
पर्णपुटेत्वरितगमनःसेनापतिगतेनैववर्त्मनातामेवदिशमगच्छत्। मांतुलब्धजीविताशंप्रत्यग्रपितृमरणशो।

29

मात्कन३

का॰ए॰ कष्टकष्टतरमतिदूरपातादायासितशरीरं संजातसंजातवेपथुं सर्वांगोपतापिनी बलवती पिपासा परवशमकरोत्।
२९ अनया च कालकलया सुदूरमतिक्रांतः स पापकृदिति परिकलय्य किंचिदुन्नमितकंधरो भयचकितदृष्टिर्दिशो विलोक्य
तृणेपि चलिते प्रतिनिवृत्तः स इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तरुमूलात्सलिलसमीपमुप
सर्तुं प्रयत्नमकरवं। अनुपजातपक्षतया च नातिस्थिरचरणस्य संचरतो मुहुर्मुहुर्मुखेन पततो मुहुस्तिर्यक्कूणितग्रीवस्य ... मा सुकु४
त्मानमेकया पक्षपाल्या संधारयतः क्षितितलसंसर्पणश्रमातुरस्यानभ्यासवशादेकमपि च दत्त्वा पदमनवरतमुन्मु
खस्य स्थूलस्थूलं निःश्वसतो धूलिधूसरस्य संसर्पतो मम मनस्यासीत्। अतिकष्टास्ववस्थासु जीवितनिरपेक्षा न भ
वंति खलु जगति सर्वप्राणिनां वृत्तयः। नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजंतूनाम् एवमुपरतेपि सुगृहीतना
म्नि ताते यदहमपि विकलेंद्रियः प्राणिमि धिङ्मामकरुणमतिनिष्ठुरं अहो सोढपितृमरणशोकदारुणं येन म २९

प्र२ सं३

मरणा ४

याज्ञीयतेउपकृतमपिनावेदितं।खलत्वंत्वचुमेतत्हृदयंमया।हिलोकांतरमुपगतायामंबायांनियम्यशोकप्रसरमाप्रसवदिवसात्प्र
रिणतवयसापितातेनतैस्तैरुपायैर्मन्क्षेवर्द्धनक्लेशमतिमहांतमपिस्नेहवशादपरिगणयतातेनयत्परिपालितंतत्सर्वमेकपदे वि
स्मृतमतिकृपणाःखल्वमीममप्राणाःयद्वुपकारिणामपितातमद्यर्कपियांतंनानुगच्छंतिसर्वथानके चित्रखलीकरोतिज्ञाधि
तत्स्नेहोयदीदृगवस्थमपिमामयमायासयतिजलांजलिलाषोमन्येचागणितपितृशोकस्यनिर्दयातेवकेवलमियंसलिलप
नबुद्धिरत्रापिदूरतरवसरसीरं।तथाहि।जलदेवतानूपुररवानुकारीणिदूरेप्यपिकलहंसविरुतानिअस्फुटानिश्रूयंतेसार
सरसितानिच।अयंचविप्रकर्षोशाशाशुखविसर्पणाविरलःसंचरतिनलिनीरजउपरिमलोदिवस्यचेयमतिकष्टादशावर्त्तते।त
थाहि।रविरंबरतलमध्यवर्तीस्फुरंतमनवरतमनलधूलिनिकरमिववितिकिरन्किरणैरधिकामुपजनयतितपसमानपस्पर्श
संतप्तपांशुपटलदुर्गमाचभूमिरतिप्रबलपिपासावशात्रिगंतुमत्यमपिमेनासमंगान्यप्रभुरस्मिचात्मनःसीदंतिमेत्व

मातप २

का.पू. दयमंधकारतामुपयाति चक्षुरपि नाम खलो विधिरनिष्ठुरतोपि मे मरणमद्योपपादयेदित्येवं चिंतयत्येव मयि तस्मात्सरसो
३० नातिदूरवर्तिनि तपोवने जाबालिर्नाम महामुनिः प्रतिवसति स्म। तत्तनयश्च हारीतनामा तापसकुमारः सनत्कुमार इव सर्वविद्या
वदातचेताः सवयोभिरपरैस्तापसकुमारैरनुगम्यमानस्तेनैव पथा द्वितीय इव भगवान्द्विजावसुरतितेजस्विनया दुर्निरीक्ष्यमूर्
त्तिरुद्यतो दिवसकरमंडलादिवोत्कीर्णस्तडिद्भिरिव रचितावयवस्तप्तकनकद्रवेणेव बहिरुपलिप्तमूर्तिरापिशंगावदातया
देहप्रभया स्फुरंत्या सबालातपमिव दिवसं सदावानलमिव वनमुपदर्शयन्नंसलोहस्तो हितीनामनेकतीर्थाभिषेकरूना
नामंसस्थलावलंबिनीनां जटानां निकरेणोपेतस्तंभितशिखाकलापः खांडववनदिधक्षया कृतकपटबटुवेष इव भगवान्पा
वकस्तपोवनदेवतानूपुरखात्कारिणा धर्मशासनकटकेनेव स्फाटिकेनाक्षवलयेन दक्षिणश्रवणावलंबिना विराजमा
नः सकलविषयोपभोगनिरत्यर्थमुपपादितेन ललाटपट्टे त्रिसत्येनेव भस्मत्रिपुंड्रकेनालंकृतो भगनगमनोन्मुखबला ३०

- पार्श्वास्थितनिपर्युक्त्वा२ कमणि -

कौतुककारिण्या स्वर्गमार्गमिवदर्शयंत्यासततस्थूलशिरास्फटिकमंडलुनाध्यासितवामकरतलः स्कंधदेशावलंबिनाकृष्णा
जिनेननीलपांडुभासातपस्तृष्णानिपीतेनांतर्नि ... र्यततोधूमपटलेनेवपरीतमूर्तिरभिनवविससूत्रनिर्मितेनेव
परिलघुतयापवनलोलेननिर्मांसविरलपर्शुकापंजरमिवगणयताबामांसावलंबिनायज्ञोपवीतेनोद्भासमानोरेवाच
31 नार्थमागृहीतवनलताकुसुमगर्भपर्णपुटसनाथशिखरेणाषाढेनव्यापृतसव्येतरपाणिर्विषाणाशिखरोत्खाताम्बु
द्धृतस्नानमृद्दस्तुपजातपरिचयेननीवारमुष्टिसंवर्द्धितेनकुसुमलतायास्यमानलोलदृष्टिनातपोवनमृगेणानुगम्य
मानोविटपइवकोमलवल्कलावृतशरीरोगिरिरिवसमेखलोराहुरिवासकृदास्वादितसोमःपद्मनिकरइवदिवसकरम
रीचिपोनदीतटतरुरिवसततजलक्षालनविमलजटःकरिकलभइवविकचकुसुमधवलदशनोद्रोणइवकृपानुगतोन
क्षत्रराशिरिवचित्रमृगकृत्तिकाश्लेषोपशोभितःघर्मकालदिवसइवक्षपितदोषोजलधरसमयइवशमितरजःप्रसरोव

रो ३

का॰रू॰ रुणइवकृतोदवासोहरिरिवायतनीकृतनरकभयःप्रदोषइवसंध्यापिंगलतारकःदिवसारंभइवबालातपकपिलोरविरथइव

३१ दृढनियमिताक्षचक्रःसुराजेवनिगूढमंत्रसाधनःक्षपितविग्रहोजलनिधिरिवकरालशंखमंडलावर्त्तगर्त्तोभगीरथइवदृ

ष्टगंगावतारोमधुकरइवासकृदुत्सूतपुष्करवनवासोवनचरोपिकृतमहालयप्रवेशःस्वयमसंयतोपिमोक्षार्थीसामप्र

योगपरोपिसततावलंबितदंडःसुप्तोपिप्रबुद्धःसंनिहितनेत्रद्वयोपिपरित्यक्तवामलोचनस्तदेवकमलसरःसिस्नासुरुपा

सरत्।अयेणाकारणाभित्राणामतिकरुणार्द्राणिसहाखलुभवंतिसतांचेतांसियेनसमांतवस्थमालोच्यसमुपजातदयः

समीपवर्त्तिनमृषिकुमारकमब्रवीत्।अयंकथमपिशुकशिशुरसंजातपक्षएवतरुशिखरादस्मात्परिच्युतःश्येनमुखवप

रिभ्रष्टोनेनभवितव्यं।तथाह्यस्याल्पशेषंजीवितंमंदायामीलितलोचनोमुहुर्मुहुर्मुखेनपततिमुहुर्मुहुरुत्प्लुत्यांश्वसि

तिमुहुर्मुहुश्चंचुपुटंविवृणोतिनशक्नोतिशिरोधरांधारयितुंतदेहियावदेवायमसुभिर्नवियुज्यतेतावदेनंगृहाणसम ३१

मन्यतम ३ य २ पुट ३ त २

तिदवीयत्नयाप्रपान २

वतारयसलिलसमीपमित्यभिधायतेनमांसरस्तीरमनाययत्।उपसृत्यचजलसमीपमेकदेशनिहितदंडकमंडलुरादा
यस्वयंमांमुत्सप्रयत्नमुत्तानितमुखमंगुल्याकतिचित्सलिलबिंदूनपाययत्।अंभःक्षोदकृतसेकंचसमुपजातप्राणांस्तुय
तटप्ररूढस्यनलिनीपलाशस्यजलशिशिरायांछायायांनिधायसमुचितमकरोत्स्नानविधिम।अभिषेकावसानेचानेकप्रा
32 णायामपूतोजपन्पवित्राण्यघमर्षणादीनिप्रत्यग्रभग्नैरुन्मुखैररुणारविंदैर्नलिनीपत्रपुटेनभगवतेसवित्रेदत्त्वार्घमुद
तिष्ठत्।आगृहीतधवलधौतवल्कलोलग्नसंध्योत्कलइवसंध्यातपःकरतलविधूननविशदजटःकमंडलुमापूर्यशुचिनासरोवर
वारिणाप्रत्यग्रस्नानार्द्रजटेनसकलेनातेनमुनिकुमारकदंबकेनानुगम्यमानोमांगृहीत्वातपोवनाभिमुखःशनैःशनै
रुपागच्छत्।अनतिदूरमिवगत्वादिशिदिशिसदासंनिहितकुसुमफलैःशालतिलकतमालहिंतालबकुलबहलैरेला
लताकुलितनालिकेरकलापैरालोलपल्लवलवलीलतापल्लवैरुल्लसच्चूतैःपरभृतैरलिकुलझंकारमुखरसहकारैरुन्मद
रेणु१

का०पू० कोकिलकुलकलालापकोलाहलिभिरुत्फुल्लकेकममंजरीरजःपुंजपिंजरैः पूगीलतादोलाधिरूढवनदेवतैः
३२ तारकावर्षमिवाधर्मविनाशपिशुनं कुसुमनिकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिः संसक्तपादपैः कान
नैरुपगूढमचकितप्रचलितकृष्णसारशतशबलाभिरुत्फुल्लकमलिनीलोहिनीभिर्मारीचमायामृगावलूनस्थलीरु
हलताभिर्दाशरथिचापकोटिक्षतकंदगर्तविषमिततलाभिर्दंडकारण्यस्थलीभिरुपशोभितप्रांतमागृहीतसमित्कुश
कुसुममृत्तिकैरध्ययनमुखरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरशून्योपकंठमुत्कंठितशिखंडिमंडलश्रूय
माणजलकलशावर्जनशब्दमनवरताज्याहुतिप्रीत्यै छिन्नमात्रभिः सशरीरमेव तु निजजनममरलोकं निनीषुभिरुद्धू
यमानधूमलेखाच्छ लेनाबध्यमानस्वर्गमार्गगमनसोपानसेतुमिवोपलक्ष्यमाणमासन्नवर्तिनीभिस्तपोधनसं
पर्कादिवापगतकालुष्याभिस्तरंगपरंपरासंक्रांतरविबिंबपंक्तिभिस्तापससंदर्शनागतसप्तर्षिमालाऽवगाह्यमाना ३२

भिरिवोत्तिविकचकुसुमस्तबकैः ऋषिजनमुपासितुमवतीर्णाभिर्ग्रहगणाभिरिव निशास्फुटहंसीभिरीविकाभिः परिवृतम
निलावनतशिखाभिः प्रणम्यमानमिव लताभिरनवरतमुक्तकुसुमैरभ्यर्च्यमानमिव पादपैः बद्धपल्लवांजलिभिरु
पास्यमानमिव विटपैः उटजाजिरविप्रकीर्णशुष्कश्यामाकमुपसंगृहीतामलकलवलीकर्कंधुकदलीलकुचचूत
पनसतालफलमध्ययनमुखरवटुजनमनवरतश्रवणगृहीतवषट्कारवाचालशुककुलमनेकसारिकोद्घुष्यमाणसु
33 ब्रह्मण्यमरण्यकुक्कुटोपभुज्यमानवैश्वदेवपिंडमासन्नवापीकलहंसपोतभुज्यमाननीवारबलिमेणीजिह्वापल्लवोपलि
ह्यमानमुनिबालकमग्निकार्यार्धदग्धसिमिसिमायमानसमित्कुशकुसुमसुपलमसृणालिंकैः सन्निग्धशिलातल
मचिरक्षुण्णवल्कलरसपाटलभूतलैरकचंदनोपलिप्तादित्यमंडलैर्विनिहितकुसुमैर्मिनस्ततो निष्क्रिसमस्मेरखाकृतसु
निजनभोजनभूमिपरिहारं शाखामृगकराकृष्टिनिष्काश्यमानप्रदेश्यमानजरदंधतापसमभिमकलभार्द्धोपभुक्तपति

वृत्ति ४ क१ करवीर२ र२

हुत४

का·पू· तैः सरस्वतीभुजलतागलितैः शंखवलयैरिव मृणालशकलैः कल्माषितमृक्षिदारकार्थमेराकैर्विशीर्णशिखरो
३३ त्खन्यमानविविधकंदं मंजुशरणपुष्करपुटैर्वनकरिभिरापूर्यमाणाविरपालवालकमृषिकुमारकाकृष्यमाणावन
वराहदंष्ट्रांगरालग्नशालूककंदमुपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणमुनिहोमहुताशनमार
द्धामृतचरुचारुगंधमेधपक्वपुरोडाशपुलाशपरिमलामोदितं नभविच्छिन्नाज्यधाराहुतैर्हुतभुक्कुंकारमुखरितमुपचर्यमा
णातिथिवर्गमिज्यमानपितृदैवतमर्च्यमानहरिहरपितामहमुद्दिश्यमानश्राद्धकल्पं व्याख्यायमानयज्ञविद्यमालो
च्यमानधर्मशास्त्रं वाच्यमानविविधपुस्तकं विचार्यमाणसकलशास्त्रार्थमारभ्यमाणपर्णशालमुपलिप्यमानाजिर
मुपमृज्यमानोटजाभ्यंतरमाबध्यमानध्यानं साध्यमानमंत्रार्थमभ्यस्यमानयोगमुपहूयमानावनदेवताबलिं नि
र्वर्त्यमानमौंजमेखलं क्षाल्यमानवल्कलमुप[illegible]माणपुष्करबीजं ग्रथ्यमानाक्षमालं न्यस्यमानं [illegible]दंडमहस्थ ३३

वे१

[illegible]संगृह्यमाणसमिधमुपसंक्रियमाणकृष्णाजिनं गृह्यमाणगवेधुकं शोष्यमा[illegible] १

प१

३५

पूर्वकलिकालस्यापरिचितमनन्तस्यांशुतस्पर्शमनंगस्याजयोनिमिव त्रिभुवनवंदितं सुरारिमिव अर्करितहरिवरा
हरूपं सांख्यमिव कपिलाधिष्ठितं मथुरोपवनमिव बलाढ्योदर्पितधेनुकमुदयनमिव नंदितवत्सकुलं किंपुरुषा
धिराज्यमिव मुनिजनगृहीतकलशाभिषिच्यमानद्रुमं निदाघसमयावसानमिव प्रत्यासन्नजलदप्रपातं जलध
रसमयमिव वनगहनमध्यसुखसुप्तहरिं हनूमन्तमिव शिलाशकलप्रहारसंचूर्णिताक्षास्थिसंचयं खांडववनविनाशो
द्यतार्जुनमिव प्रारब्धाग्निकार्यं सुरभिसमालेपनचरमपि सततानिर्भूतारण्यगंधं मातंगकुलाध्यासितमपि पवित्रमु
द्धुषितधूमकेतुशतमपि प्रशांतोपद्रवं परिपूर्णद्विजपतिमंडलसनाथमपि सदासंनिहिततरुगहनांधकारमति
रमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यं॥ ॥यत्र च मलिनता हविर्धूमेषु न चरितेषु मुखरागः शुकेषु न कोपेषु
तीक्ष्णता कुशाग्रेषु न स्व. भावेषु चंचलता कदलीदलेषु न मानसेषु चक्षूरागः कोकिलेषु न परकलत्रेषु कंठग्र

 हः कमंडलुषु न सुरतव्यापारेषु मेखलाबंधो व्रतेषु नेर्ष्याकलहेषु स्तनस्पर्शो होमधेनुषु न कामिनीक्रीडासु पक्ष
 पातः कुक्कुवाकुषु न विद्याविवादेषु भ्रांतिरनलप्रदक्षिणेषु न शास्त्रेषु वसुसंकीर्तनं दिव्यकथासु न तृष्णासु गणना
रुद्राक्षवलयेषु न शरीरेषु मुनिबालनाशः क्रतुदीक्षया न मृत्युना रामानुरागो रामायणे न यौवने मुखभंगविका
रो जरया न धनाभिमानेन यत्र च महाभारते शकुनिवधः पुराणे वायुप्रलपितं वयःपरिणामे द्विजपतनमुपवनचंदनेषु जा
ड्यमग्नीनां भूतिमत्त्वं हरिणानां गीतश्रवणव्यसनं शिखंडिनां नृत्यपक्षपातः भुजंगानां भोगः कपीनां श्रीफलाभिला
षः मूलानामधोगतिः तस्य चैवंविधस्य मध्यभागमलंकुर्वाणस्यालवालकालोहितलोलपल्लवस्य मुनिजनावलंबि
तकृष्णाजिनजलकलशसनाथशिखरस्य तापसकुमारिकाभिर्मूलभागदत्तपिष्टपंचांगुलस्य हरिणशिशुभिः
परिपीयमानालवालजलस्य मुनिकुमारकाबद्धकुशचीरदाम्नो हरितगोमयोपलिप्तविविक्ततलस्यांतस्तरोः कृताकु

35

सुमोपहाररमणीयस्य नातिमहतः परिमंडलतया विशीर्णावकाशस्य रक्ताशोकतरोरधःछायायामुपविष्टमत्युग्रतपोभिर्वे
वनमिव सागरैः कनकगिरिमिव कुलपर्वतैः क्रतुमिव वैतानवह्निभिः कल्पांतदिवसमिव रविभिः कालमिव कल्पैः स
मंतान्महर्षिभिः परिवृतं उग्रशापभीतयेव कंपितदेहया शरणागयेव विहितकेशग्रहया कुंड्येव कृतभूभंगयाम
त्तयेवाकुलितगमनया श्वसाधिकयेव प्रकटिततिलकपाग्रहीतव्रतोद्यभस्मधवलया जरया धवलीकृतविग्र
हमायामिनीभिरुपसाविजितमनुजिजनमखिलं धर्मपताकाभिरिवोद्गताभिरमरलोकमारोढुमुत्पतरज्जुभिरि
वाधज्झिताभिरतिदूरप्रलंबस्याथतपस्तरोः कुसुममंजरीभिरिवोद्गताभिर्जटाभिरुपशोभमानमुपरचितभस्म
त्रिपुंड्रकेणातिकुप्रच्छन्नत्रिपथगास्रोतसाम्रितयेन हिमगिरिशिलातलेनेव ललाटफलकेनोपेतमधोमुखचंद्रशक
लाकाराभ्यामवलंबिनवलिशिथिलाभ्यां भ्रूलताभ्यामवष्टभ्यमानदृष्टिमनवरतमंत्राभ्यासविवृताधरपुट

भिःपलिनपांडुराभ

न्हेरा१

र्दे२

का॰पू॰ यानिष्पतद्भिरतिस्तुहिनैः सत्यप्ररोहैरिव स्वच्छेन्द्रियच्छिद्रैरिव दिशामुरोरिव करुणासौरैरिव धर्मप्रवाहैरि
३५ व :हशानमश्रूरैर्धवलीकृतपुरोभागमुद्वमदमलांगाप्रवाहमिव जन्हुमविरतसोमोद्गारसुगंधिनिश्वासा
वकृष्टैर्भृङ्गैर्मधुभिः शापाक्षरैरिव सरामुरवमागसं निरितैः परिस्फुरद्भिरानिमिरविरहितमतिकृशतया निम्नतर
गंडगर्त्तमुन्नतघोणमाकरालतारकमवशीर्यमाणाविरलनयनपक्ष्ममालमुन्नतदीर्घरोमरुद्धश्रवणविवरमाना
भिलंबितकूर्चकलापमाननरक्षानमज्जिचपलानामिंद्रियाश्वानामंतःसंयमनरज्जुभिरिवाननगामिःकंठनाडिका
भिर्निरंतरसंबद्धकंधरंसमुन्नतविरलास्थिपंजरमंसावलंबितधवलयज्ञोपवीतमनिलवशाच्चलिततन्तुतरंगमंग
शुप्लवमानमरालमिवमंदाकिनीपयःप्रवाहमकलुषमंगमुद्वहंतममलस्फटिकशकलघटितमच्छवलयमुज्ज्वल
स्थूलमुक्ताफलग्रथितेसरस्वतीहारमिवचलदंगुलिविवरगतमावर्त्तयंतमनवरतभ्रमिततारकचक्रमपरमिवधु ३५

वपुरुन्नमतशिराजालकेनंजरत्कल्पतरुमिवपरिणतलतासंचयेननिरंतरनिचितममलेश्मश्रुंशंस्तुमिरिवामृतफेनैरि
वगुरासंतानतंतुभिरिवनिर्मितेनमानससरोजलक्षालनशुचिनादुकूलवल्कलेनाच्छादितोयेनेवजरएजातकेनसंक्षारि
तमासन्नवर्तिनामंदाकिनीसलिलस्रोतेनित्रिदंडोपविष्टेनस्फाटिककमंडलुनाविकचपुंडरीकराशिवराजहंसेनोप
36 शोभमानंस्थैर्येणा गांभीर्ये सागरारागंतेजसासवितुःप्रशमेनतुषाररश्मेनिर्मलतयाचांबरस्यसंविभाग
मिवकुर्वाणंवैनतेयमिवंप्रभावोपात्तसकलद्विजाप्रियत्र्यंकभयासनमिवाश्रमगुसंजरच्चंदनतरुमिवभुजंगनिर्मोकध
वलजरांकुरंप्रशस्तदाररामिवप्रलंबकर्णबालंहृदस्यातिमिवाजन्मवर्द्धितकर्पंदिवसमिवोदितार्कबिंबभास्वरंशारत्का
लमिवंक्षीणवर्षंशंतनुमिवप्रियदेवव्रतमंबिकाकरतलमिवउद्धाहग्रहगृहशानिपुरांशिशिरंसूर्यमिवकृतोत्तरासंगमोर्वा
नलमिवसन्ततपयोभक्षंशून्यनगरमिवदीनानाथविपन्नशरणंपशुपतिमिवभस्मपांडुरोमाश्लिष्टशरीरंभगवंतंजा

प्र:

का॰सू॰ बालिमपश्यं॥ ॥अवलोक्य चाहमचिंतयं अहो प्रभावस्तपसां इयमस्य शांतापि मूर्त्तिरुत्तप्त ... कनकावदातापि
३६ रिस्फुरंती सौदामिनीव चक्षुः प्रतिहंति सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य।
शुष्कनलकाशकुसुमनिपातिनामपि ज्वलति नित्यमसहिष्णु तपस्विनां प्रशांततपसामपि तेजः प्रकृत्या भवति किमुत
सकलभुवनवंदितचरणानामनवरततपःक्षपितमलानां करतलामलकवदखिलं जगदालोकयतां दिव्येन चक्षुषा
भगवतामेवंविधानां भवक्षयकारिणां पुण्यानि हि नामग्रहणान्यपि महामुनीनां किंपुनर्दर्शनानि धन्यमिदमाश्र
मपदं यत्र मधिपतिर्यस्याथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना। पुण्यभाजः ख
ल्वमी मुनयो यदहर्निशमेनमपरमिव कमलासनमपगतान्यव्यापाराः मुखावलोकननिश्चलदृष्टयः पुण्याः कथाः शृ
ण्वंतः पर्युपासते सरस्वत्यपि धन्या यास्य सततमतिप्रसन्ने करुणारसनिस्यंदिनि अगाधगांभीर्ये मुनिद्विजपरिवारस्थ ३६

खकमलसंपर्कसुखमनुभवंती निवसति हंसीव मानसे। चतुर्मुखमुखकमलवनवासिभिश्चतुर्भिर्वेदैः सुचि
राद्द्वितीयमिदमपरमुपस्थितमासादितं स्थानमेनमासाद्य शरत्कालमिव कलिकालमुत्सृष्टसमयकलुषिताः प्रसा
दमुपगताः पुनरपि जागरित इव सर्वा विद्याः। नियतमिह सर्वात्मना कृतस्थिति नाम भगवता परिभूतकलिका
लविलसितेन धर्मेण न स्मर्यते कृतयुगस्य धरणीतलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमंडल
निवासाभिमानमंबरतलं महासत्वेयं जरायास्य प्रलयरविरश्मिदुर्निरीक्ष्योपि शिशिरकरकिरणपांडुरे शिरोरुहे जरा
भारे फेनपुंजधवला गंगेव पशुपतेः क्षीराहुतिरिव शिखाकलापे विभावसोर्निःपतंती न भाति। बहलाज्यधूमपटल
मलिनीकृताश्रमस्य भगवतः प्रभावाद्भीतमिव रविकिरणजालमतिदूरतः परिहरति तपोवनमेतत्पवनलोल
पुंजितशिखाकलापोपरचितांजलय इवात्रमेते क्षता निहवींषि प्रतिगृह्णंत्येतस्मीत्यासुमुखप्रणयः। तरलितहु
य

महात्मना३ म३

का॰पू॰ कूलवल्को गोरोचनाभमलताकुसुमस्तबकनिपतितमलो मंदमंदसंचारी सशंक इवास्य समीपमुपसर्पति गंधवाहः। प्रा
३७ यो महात्मनामपि दुरभिभवान्यस्य भवंति तेजांसि सर्वतेजस्विनामयं चाय राणीर्दि सूर्यमिवाभाति जनमदने
- नाधिष्ठितैर्निःकंपेव क्षितिरिति दवष्टंभादैवप्रवाहः करुणारसस्य संतरणसेतुः संसारसिंधोराधारः क्षमांभसां परशुस्तृष्णा
लतागहनस्य सागरः संतोषामृतस्योपदेष्टा सिद्धिमार्गस्यास्तगिरिरसद्ग्रहस्य मूलमुपशम तरोर्नाभिः प्रज्ञाचक्रस्य स्थिति
वंशो धर्मध्वजस्य तीर्थं सर्वविद्यावताराणां बडवानलो लोभार्णवस्य निकषोपलः शास्त्ररत्नानां दावानलो रागपल्लवस्य महा
मंत्रः क्रोधभुजंगस्य दिवसकरो मोहांधकारस्यार्गलाबंधो नरकद्वाराणामायतनं मंगलानामभूमिर्म दविकाराणां दर्शकः
सत्पथानामादर्शः सर्वविद्यानामुत्पत्तिः साधुताया नेमिरुत्साहचक्रस्याश्रयः सत्वस्य प्रतिपक्षः कलिकालस्य कोशस्तप
सः सखा सत्यस्य क्षेत्रमार्जवस्य प्रभवः पुण्यसंचयस्यादत्तावकाशो मत्सरस्यारातिर्विपत्तेः स्थानं परिभूतेरननुकूलोऽभि ३७

कुलभवनमाचाराणां३

मानस्येसमतोदैन्यस्यानायत्तोरोषस्याविषयोविषयरागामननिमित्तःसुखानामस्यभगवतःप्रभावादेतदुपशांतवै
रमपगतमत्सरंतपोवनंमहोऽप्रभावोमहात्मनामत्रहिशाश्वतिकंविरोधमपहायशांतांतरात्मानस्तिर्यंचोपितपोवनवस
तिसुखमनुभवंतितथाह्येषविकचोत्पलव[illegible]नानुकारिणमुत्पतज्ज्वालकचंद्रकशतंहरिणालोचनद्युतिशबलमभिन
वशाद्वलमिवाधिवसतिशिखिनःकलापमातपाहतोनिःशंकमहिः।अयमुत्सृज्यमातरमजातकेसरैःकेसरिशिशुभिः
सहोपजातपरिचयःप्रक्षरत्क्षीरधारमापिबतिकुरंगशावकःसिंहीस्तनं।एषमृणालकलापाशंकिभिःशशिकरध
वलंसटाभारमामीलितलोचनोबहुमन्यतेद्विरदकलभकैराकृष्यमाणंमृगपतिः।इदमिहकपिकुलमपगतचापलमुप
नयतिमुनिकुमारकेभ्यःस्नातेभ्यःफलानि।एतेचननिवारयंतिमदांधाअपिगंडस्थलीभाजिमदजलपाननिश्चलानिभृतमु
कुरकुलानिजातदयाःकर्णतालैःकरिणः।किंबहुनातापसाग्निहोत्रधूमलेखाभिरुत्सर्पंतीभिरनिशमुपपादितकृष्णा

न५

का॰ पू॰ जिनोत्तरासंगशोभाः फलमूलसंभृतो वल्कलिनो निश्चेतना अस्तरवोपि सनियमा इवालक्ष्यंतेऽस्य भगवतः किंपुनः सचेत
३८ नाः प्राणिन इत्येवं चिंतयंतमेव मां तस्यामेवाशोकतरोरधश्छायायामेकदेशे स्थापयित्वा हारीतः पादावुपगृह्य
कृताभिवादनः पितुरनतिसमीपवर्त्तिनि कुशासने समुपाविशत्। आलोक्य तु मां ते सर्व एव मुनयः कुतोयमासादि
तः शुकशिशुरिति तमासीनमपृच्छन्। सोपि तानब्रवीत्। अयं मया स्नानार्थमितो गतेन कमलिनीसरस्तीरतरुनीडनि
पतितः शुकशिशुरातपजनितक्लांतिरुत्तप्तपांशुपटलमध्यगतो दूरनिपतनविह्वलतनुरल्पावशेषायुरासादितस्त
पस्वी दुरारोहतया तस्य वनस्पतेर्न शक्यतेऽस्य नीडमारोपयितुमिति जातदयेनानीतस्तद्यावदयमप्ररूढपक्षतिरक्षमोऽं
तरिक्षमुत्पतितुं तावदस्मिन्नेव कस्मिंश्चिदाश्रमतरुकोटरेषु मुनिकुमारकैरस्माभिश्चोपनीतेन नीवारकणनिकरेण फल
रसेन च संवर्ध्यमानो धारयतु जीवितं। अनाथपरिपालनं हि धर्मोऽस्मद्विधानामुद्भिन्नपक्षतिस्तु गग॰ नतलसंचरणा ३८

व—

८ ब्धा

समर्थो यास्यति यत्रास्मै रोचिष्यते इहैव वोपजातपरिचयः स्थास्यतीत्येवमाकिमस्मत्संबद्धमालापमाकर्ण्य किंचिदु
पजातकौतूहलो भगवाञ्जाबालिरीषदावलितकंधरः पुण्यजलैः प्रक्षालयन्निव मामतिप्रशांतया दृष्ट्या सुचिरमुपजात
प्रत्यभिज्ञान इव पुनः पुनर्विलोक्य स्वस्यैवाविनयस्य फलमनेनानुभूयत इत्यवोचत् । स हि भगवान्कालत्रयदर्शी तपःप्र
भावाद्दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदवलोकयति वेत्ति जन्मांतराण्यतीतानि कथयत्यागामिनमप्यर्थ
मीक्षणगोचरगतानां च प्राणिनामायुषः प्रमाणमावेदयति । यतः सर्वैव सा तापसपरिषच्छ्रुत्वा विदितप्रभावा कीदृशोऽने
नाविनयः कृतः किमर्थं वा कृतः क्व वा कृतो जन्मांतरे कोऽयमासीदिति कौतूहलिन्यभवत् । उपनायितवती चैनं भग
वंतमावेदय प्रसीद भगवन्कीदृशस्याविनयस्य फलमनेनानुभूयते क एष आसीज्जन्मांतरे विहगजातौ च कथमस्य
संभवः किमभिधानो वायमपनयतु नः कुतूहलमाश्चर्याणां हि सर्वेषां भगवान्प्रभव इत्येवमुपयाच्यमानस्तया तपोधनप

का०सू० रिषदा समहामुनिः प्रत्यवदत् । अतिमहदिदमाश्चर्यमाख्यातं यन्मत्स्यशोषमहः प्रत्यासीदनिचनैः स्नानसमये भवता

३९ मध्यतिकामभिर्देवार्चनविधिवेलातडुनिः संवृत्तं भवंतः सर्वएवतावदाचरंतु यथोचितं दिवसव्यापारमपराह्णसमये भव हं २

तां पुनः कृतमूलफलाशनानां विश्रब्धोपविष्टानामास्तिः प्रवृत्तिः सर्वमावेदयिष्यामि योयं यद्घातेन कृतमपरस्मिन्जन्म

निरूहचलोके यथास्य संवृत्तिरियं चतावदपगतलमः क्रियतामाहारेरानियतमयं ध्यात्मनोजन्मांतरोरतं तं खलु सोपलब्धमि

वमयिकथयतिसर्वमशेषतःस्मरिष्यतीत्यभिदधदेवोत्थायसह मुनिभिः स्नानादिकमुचितं दिवसव्यापारमकरोत् । अने

नचसमयेन परिणतो दिवसः स्नातोत्थितेन मुनिजनेनार्घविधिमुपपादयता यः क्षितितले दत्तस्तमंबरतलगतः साक्षादिव

रक्तचंदनांगरागं रविरुद्वहत् । ऊर्द्ध्वमुखैर्रर्कबिंबविनिहितदृष्टिभिरूष्मपैस्तपोधनैरिव परिपीयमानतेजः प्रसरो दिव

स… सनिमानमगात् । उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेव संहृतपादः पारावतचरणपाटलरागो रविरंबरतला ३९

भिरस्नातपो २

40

दलंबत।आलोहितांशुजालं जलशयनगतस्य मधुरिपोरोविारस्तन्मधुरेमिव नाभिनलिनं प्रतिमागतमपरार्णवे सूर्य
मंडलमलक्ष्यत।विहायसरसीं शुक्लांश्च कमलिनीवनानि शकुनय इव दिवसावसाने तपोवनतरुशिखरेषु पर्वताग्रेषु च र
विकिरणाः स्थितिमकुर्वत।आलग्नरक्तातपच्छेदा मुनिभिरालंबिता लोहितवल्कला इवाश्रमतरवः क्षणमदृश्यंत।अस्तमु
पगते च भगवति सहस्ररश्मौ चितावपरार्णवतटात् उल्लसंती विद्रुमलतेव पाटला संध्या समदृश्यत।यस्यामाबध्यमानध्यानमेक
देशदुह्यमानहोमधेनुदुग्धधाराध्वनितधन्यतराभिमनोहरमग्निहोत्रवेदिकाविकीर्यमाणहरितकुशमृषिकुमारिकाभिरि
तस्ततो विक्षिप्यमाणदिग्देवताबलिसिक्थमाश्रमपदमभवत्।क्वापि विहृत्य दिवसावसाने लोहिततारका तपोवनधेनुरिव
कपिला परिवर्तमाना संध्या मुनिभिरदृश्यत।अचिरप्रोषिते सवितरि शोकविधुरा कमलमुकुलकमंडलुधारिणी हंससित
दुकूलपरिधाना मृणालधवलयज्ञोपवीता मधुकरमंडलाक्षवलयमुद्वहंती कमलिनी दिनपतिसमागमव्रतमिवाचरत्।अप

नढ१ वि

का०स्र रसागरांभसि पतिते दिवसकरे पवनवेगोत्थितमंभःशीकरनिकरमिव तारागणमंबरमधारयत्। अचिराच्च सिद्धक
४० न्याविक्षिप्तसंध्यार्चनकुसुमशबलमिव तारकितं वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोर्ध्वविप्रकीर्णैः प्रणामांज
लिसलिलैः क्षाल्यमान इवागलदखिलः संध्यारागः। क्षयमुपागतायां संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव वि
भावरी तिमिरोद्गममभिनवमवहत्। अपहाय मुनिजनहृदयानि सर्वमन्यदंधकारतां तिमिरमनयत्। क्रमेण चास्तं रविरुपग
त इत्युदंतमुपश्रुत्य जातवैराग्यो धौतदुकूलवल्कलधवलांबरः सतारात्रः पुरःपर्यंतस्थिततनुतिमिरतमालवनलेखं सन्न
र्षिमंडलाध्युषितमरुंधतीसंचरणाय पवित्रमुपहितार्घाढमारूढ्यमारामूलमेकांतस्थितचारुतारकमृगमभरलोकाश्रमभि
वगगनतलमस्तरीचितिरस्य तिस ... ड्डामरराम्तितस्तारकाकयालिशकलालंकृतांबरतलो अंबकोत्तमोगा दिवगंगास
गरान्ताप्लवयंती हंसधवलाधरापामे पतत् ज्योत्स्ना। हिमकरसरसि विकचपुंडरीकसिते चंद्रिकाजलपानलोभादवतीर्णो ४०

...१२

निष्कलसूत्रैरिस्तृतयंकलमन्नइवांहस्थपतहरिराः।तिमिरजलचरसमयापगमानंतरमभिनवसितसिंदुवारकुसुमपांडु
रैरर्शिनागतैरगान्धोतहंसैरिवकुसुमस्सरांसिवंद्रपादैः।विगलितसकललोहयरागरंजनिकरबिंबमंबरापगावर्गहिधौतसिं
दूरमैरावतकुंभस्थलमिवततस्तरामलक्ष्मत।शनैःशनैश्चदूरोदितेभगवतिहिमततिस्तुतिसुधाधूलिपटलेनेवधवली
कृतेचंद्रातपेनजगतिअवश्यायजलविंदुपततशीतेषुमंदगतिषुविघ्नरमानकुसुमस्तवनकषायपरिमलेषुसमुपोढजिद्दाम
५१ रागसनारकैरन्योन्यग्रथितपक्ष्मपुटैरारब्धरोमंथमंथरमुखैःसुखासीनैरारण्यमृगैरभिनंदितागमनेषुपवनेषुनिशासुरव
समीरणेष्वर्द्धयाममात्रावशेषतायांविभावर्यांहारीतःकृताहारंमामादायसर्वैरेवतैर्मुनिभिरुपसृत्यचंद्रातपोद्भासिनि
तपोवनैकदेशेवेत्रासनोपविष्टमनतिदूरवर्तिनाजालपादनाम्नाशिष्येणदर्भपवित्रपाणिनामंदमंदमुपवीज्य
मानंपितरमवोचत्।तातसकलेयमाश्चर्यश्रवणाकुतूहलाकुलितहृदयासमुपस्थितातापसपरिषदाबद्धमंडलाप्रती

स्मह२

ल२

का·पू· शो। व्यपनीतश्रमश्च कृतोयंपतत्रियोतस्तदावेद्यतां यदनेन कृतमस्मिन्जन्मनि कोवायमन्यजन्मनि भविष्यतीति। एवमु
४१ क्तस्तु स महामुनिः पुरःस्थितं मामवलोक्य तांश्च सर्वानेकाग्रान्श्रवणपरान्मुनीन्बुद्ध्वा शनैरब्रवीत्। श्रूयतां यदि कौतू
हलं॥ अस्ति सकलत्रिभुवनतललामभूता प्रसवभूमिरिव कृतयुगस्यात्मनिवासोचिता भगवता महाकालाभिधानेन त्रि
भुवनत्रयसर्गस्थितिसंहारकारिणा प्रमथनाथेनापरेव पृथिवी समुत्पादिता द्वितीयपृथिवीशंकया च जलनिधिनेव रसा
तलगम्भीरेण जलपरिखावलयेन परिवृता पशुपतिनिवाससप्रीत्या च गगनपरिसरोल्लेखिशिखरमालेन कैलासगिरि
णेव सुधासितेन प्राकारमंडलेन परिगता प्रकटशंखशुक्तिमुक्ताप्रवालमरकतमणिराशिभिश्चामीकरचूर्णवालुकानि
करनिचितैरायामिभिरगस्त्यपरिपीतसलिलैः सागरैरिव महाविपणिपथैरुपशोभिता सुरासुरसिद्धगंधर्वविद्याधरोर
गाध्यासिताभिश्चित्रशालाभिरविरतोत्सवप्रमदावलोकनकुतूहलादंबरतलावतीर्णाभिर्दिव्यविमानपंक्तिभिरिवा ४१

५२

लंकृतां मथनोद्धूतदुग्धसवलितमंदरद्युतिभिः कनकमयामलकलशशिखरैरनिलदोलायितसितध्वजैरुपरि
पतद्व्योमगंगैरिव तुषारगिरिशिखरैरमरमंदिरैर्विराजितशृंगाटकां सुधावेदिकोपशोभिरुदपानैरनवरतचलितज
लघटीयंत्रसिच्यमानहरितोपवनांधकारैः केतकीधूलिधूसरैरुपशल्यकैरुपशोभिता मदस्तुरवरमधुकरपरंपरांध
कारितनिष्कुटा स्फुरदुपवनलतापरिमलसुरभिसमीरणारणितसौभाग्यवद्भिरैकैरालोहितांशुकपताकैराबद्ध
रक्तचामरैर्विद्रुममयैः प्रतिभवनमुच्छ्रितैर्मकरांकैर्मदनयष्टिकेतुभिरुपकाशितमकरध्वजपूजा सततप्रवृत्ताध्यय
नध्वनिधौतकल्मषा स्तिमितमुरजरवगंभीरगर्जितेषु सलिलसीकरासारस्तबकरचितदुर्दिनेषु पर्यस्तरविकिर
णारब्धितसुरचापचारुषु धारागृहेषु मत्तमयूरैर्मंडलीकृतशिखंडैस्तांडवव्यसनिभिरारब्धमानकेकाकोलाह
लाविकचकुवलयकांतैरस्फुटकुमुदधवलोदरैरनिमिषदर्शनरमणीयैराखंडललोचनैरिव सहस्रसंख्यैरुद्भासि

का॰ ९ तासरोभिः अविरलकदलीवनकलिताभिरम्लानफेनपुंजपांडुराभिर्दिशिदिशिदंतवलभिकाभिर्धवलीकृता यौवन
४२ मदमत्तमालवीकुचकलशलुलितसलिलया भगवतो महाकालस्य शिरसि सुरसरितमालोक्य समुपजातेर्ष्ययेव सं
ततसमाबद्धतरंगभ्रुकुटिलेखया खमिव क्षालयंत्या शिप्रया परिक्षिप्ता सकलभुवनतलख्यातयशसा हरजटाचं
द्रेणोदकोदिसारेण मैनाकेनेवाविदितपक्षपातेन मंदाकिनीप्रवाहेणेव प्रकटितकनकपद्मराशिना स्मृतिशास्त्रेणे
वसभावसथकूपप्रपारामसुरसदनसेतुयंत्रप्रवर्तकेन मंदरेणेवोद्धृतसमस्तसागररत्नसारेण संगृहीतगारुडे
नापि भुजंगसंगभीरुणा खलोपजीविनापि यरापिजनोपजीव्यमानविभवेन वीरेणापि विनयवता प्रियंवदे
नापि सत्यवादिना अभिरूपेणापि स्वदारसंतुष्टेन अतिथिजनाभ्यागमार्थिनापि परप्रार्थनाननभिज्ञेन कामार्थपरे
णापि धर्मप्रधानेन महासत्वेनापि परलोकभीरुणा सकलविज्ञानविशेषविदा वदान्येन दक्षिणेन स्मितपूर्वाभिभा ४२

नु क

गिरा परिहासपेशलेनालापेनाशिक्षितेनाशेषदेशभाषेण वक्रोक्तिनिपुणेनाख्यायिकाख्यानपरिचय
चतुरेण सर्वलिपिज्ञेन महाभारतपुराणरामायणानुरागिणा बृहत्कथाकुशलेन द्यूतादिकलाकलापपारगेण
श्रुतरागिणा सुभाषितव्यसनिना प्रशान्तेन सुरभिमाससमागतेनेव सततरक्षितेन हिमगिरिकाननेनेवान्तःसर
लेन लक्ष्मणेनेव रामाराधननिपुणेन शत्रुघ्नेनेवाविष्कृतभरतपरिचयेन दिवसेनेव मित्रानुवर्तिना बौद्धेनेव सर्व
दानाक्लिदाइक्षरेण सांख्यागमेनेव प्रधानपुरुषोपेतेन जिनधर्मेणेव जीवानुकम्पिना विलासिजनेनाधिष्ठितास
शैलेनेव प्रासादैः सशाखानगरेव महाभवनैः सकल्पवृक्षैरेव सत्पुरुषैर्दर्शितविश्वरूपेणेव चित्रभित्तिभिः संध्येव पद्मरा
गानुकारिणी अमराधिपमूर्तिरिव मखशतानलधूमरक्ता पशुपतिलास्यक्रीडेव सुधाधवलाट्टहासा वृद्धेव ज्ञात
तनूपस्पर्शा गरुडमूर्तिरिवाच्युतास्थितिरमराणीया प्रभातवेलेव प्रबुद्धसर्वलोका शबरवसतिरिवावलंबितचारुचा

श्रि२

का०ए. मरनागदंतवलयगृहशोभातनुरिव सदासन्नवसुधाधरा जलधिमथनवेलेव महाह्लोघपूरितदिगंतरा प्रस्तुताभिषे
४३ कभूमिवसंनिहितकनकघटसहस्रा गौरीव महासिंहासनोचितमूर्त्तिः अदितिरिव देवकुलसहस्रसेव्या महावराहलीलेव
लेवदर्शितहिरण्याक्षपाता कद्रूरिवानंदितभुजंगलोका हरिवंशकथेवानेकबालक्रीडारमणीया प्रकटगणोपभोग्या
प्यखंडितचरित्रा रक्तवर्णापि सुधाधवला वलं बितमुक्ताकलापापि विहारभूषणा बहुप्रकृतिरपि स्थिरा विजितामरलोकद्युतिरवंतीषूज्जयिनी नाम नगरी॥ ॥यस्यामुत्तुंगसौधोत्संगसंगीतसंगिनीनामंगनानामतिमधुरेण
गीतरवेणाकृष्यमाणाधोमुखरथतुरंगः पुरःपर्यस्तरथपताकापटःकृतमहाकालप्रणाम इव दृश्यते दिवसमालक्ष्यते
गच्छन्भगवान्दिवसकरः। यस्यां च संध्यारागारुणा इव सिंदूरमणिकुट्टिमेषु शारदकमलिनीपरिमलानाइव मरकत
वेदिकासु गगनतलप्रसृता इव नितंदिनीसुरेखेषु प्रभातचंद्रिकामध्यपतिता इव स्फटिकभित्तिप्रभासु गगनसिंधु ४२
वैडूर्यमणिभूमिषु तिमिरपटलविच्छेदेनोद्घता इव कृष्णागुरुधूममंडलेषु अभिभूततारकापंक्तय इव मुक्ताजालेषु विकचकमलचुंविन इव १
धूप१

तरंगा स्तेदिन इव सितपताकांशुकेषु पल्लविता इव स्त्र्यकांतोपलेषु राहुमुखकुहरप्रविष्टा इवेंद्रनीलवातायनवि
वरेषु विराजंते रविगभस्तयः। यस्यां चोत्पन्नातितिमिरत्वादविहारितचक्रवाकमिथुनाः व्यर्थीकृतसुरतप्रदीपाः संज्व
लितमदनानलाः दिवसा इव कामिनीनां सूरराग प्रभाभिर्मतिबालातपपिंजराः रजन्यः। यां च संनिहितविषमलोचनाम्
नवरतमतिमधुरो रतिप्रलाप इव संपर्पन्मुखरीकरोति मकरकेतुग्राहहेतुभूतो भवनकलहंसकुलकोलाहलः। यस्यां
च निशि निशितपवनविलोलैर्दुकूलपल्लवैरुल्लसद्भिर्मालवीमुखकमलकांतिलज्जितस्येंदोः कलंकमिवापनयंतो हू
रप्रसारितोद्धूतभुजाः प्रासादा लक्ष्यंते। यस्यां च सौधशिरःशायिनीनां पश्यन्मुखानि पुरसुंदरीणां मदनपरवश इ
व पतितः प्रतिमाछलेन कुट्टिमबहलचंदनजलसेकशिशिरेषु मणिकुट्टिमेषु मृगलांछनः। यस्यां च निशावसानप्र
बुद्धस्य तारतरमधिपठतः पंजरभाजः शुकसारिकासमूहस्याभिभूतगृहसारसस्वरा म्रतेन विसारिणा विलासिनीभू

चय२ ना२

का॰सू॰ ४४ षणरवेणाविस्राव्यमानाव्यर्थीभवंतिभ्रमतमंगलगीतयः।यस्यांचानिर्वर्णिर्मणिप्रदीपानांमत्तस्फुरत्ताहाराणा
मस्थितिःसंगीतमुरजध्वनीनांद्वंद्ववियोगश्चक्रनाम्नांवर्णपरीक्षाकनकानामस्थिरत्वंध्वजानांमित्रद्वेषःकुमुदानांको
शगुप्तिरसीनांकिंबहुनायस्यांसुरासुरचूडामणिमरीचिचुंबितचरणनखमयूखोनिशितशूलदारितांधकमहासुरो
गौरीनूपुरकोटिघृष्टशेखरचंद्रशकलस्त्रिपुरभस्मरजःकृतांगरागोमकरध्वजध्वंसविधुरयारत्याप्रसादयंत्याप्रसा
रितकरयुगविगलितवलयनिकरार्चितचरणःप्रलयानलशिखाकलापकपिलजटाभारभ्रांतसुरसिंधुरंधकारा
तिर्भगवानुत्सृष्टकैलासवासप्रीतिर्महाकालाभिधानःस्वयंनिवसति।तस्यांचैवंविधायांनगर्यांनलनहुषययातिधुं
धुमारभरतभगीरथदशरथप्रतिमोभुजबलोपार्जितभूमंडलःफलितशक्तित्रयोमतिमानुत्साहसंपन्नोनीतिशास्त्रा
खिन्नबुद्धिरधीतधर्मशास्त्रस्तृतीयइवकांत्यातेजसाचसूर्याचंद्रमसोरनेकसहस्रतंतुसंततधूमपिंशितसकलजग ४४

सुरथ२ ३१ न्गा३

दुपप्लवो विहाय कमलवनान्यवगणय्य नारायणोरःस्थलवसतिसुखमुत्कुलारतिं हस्तयाश्रूरसमागमैर्व्यसनिन्या
निर्व्याजमालिङ्गितो लक्ष्म्या महामुनिजनसंसेवितस्य मधुसूदनचरणाइव सुरसरित्प्रवाहस्य प्रभवः सत्यस्य शिशिरस्या
पि सैनायकारि[illegible]णः स्थिरस्यापि नवरतं भ्रमतो निर्मलस्यापि मलिनीकृतारातिवनितामुखकमलद्युते रतिधवलस्या
पि सर्वजनरागकारिणः सुधासूतेरिव जलनिधिः उद्भवो यशसः पातालवराश्रितो निजयक्षैः समितैः क्षितिभृत्कुलैः यह
गराडिव बुधानुगतः मकरध्वज इवोत्सन्नविग्रहः दशरथ इव सुमित्रोपेतः पशुपतिरिव महासेनानुयातो भुजगराज इव
५८२ क्ष्मागुरुः नर्मदाप्रवाह इव महावंशप्रभवः अवतार इव धर्मस्य प्रतिनिधिरिव पुरुषोत्तमस्य परिहृतप्रजापीडो राज्ञा
तारापीडो नामाभूत् । यस्तमःप्रसरमलिनवपुषा पापबहुलेन कलिकालेन चालितमाभूत्ततो धर्मं दशाननेनेव कैलास
मिव [illegible] उपपशुपतिरवष्टभ्य पुनरपि स्थिरीचकार । यं च रतिप्रलापजनितदयार्द्रहृदयहरनिर्मितमपरमिव मकर

तत्त्व४

केतुमभंसलोकः। पंचजलनिधितरंगधौतमेखलात्पंचजांतरविचारिताराशा। द्विगुणीततरत्नकुसुमप्रकरांदुग्ध
दिंदुबिंबगलदमृतबिंदुदुर्दिनाईचंदनाहरशिशिरकररथतुरगखुरशिखरोल्लेखखंडितोल्लसल्लवंगपल्लवैरैराव
तकरलूनशल्लकीकिसलयकवलादारोल्लादुदयनाम्नः कपिवलविलुप्तविरलल्लवलीलताफलादुदधिनिर्गतजलदे
वतावंद्यमानराघवतपहारहिमाचलपातहस्तिनशोरवकुलशकलहारकृतशिलातलान्नलकरकलितशैलसहस्रसंभूता
हासेतुबंधात्। अच्छनिर्झरजलधौततारकासार्थाद्भूतमथनोद्धतवैकुंठकेसरपत्रमकरकोटिकषणामसृणितग्रा
वाः सुरासुरहेलावलंबितवासुकिसमाकर्षणारंभवलितचरणाभरदलितनितंबादमृतशीकरसिक्तसानोःशमंद
राचलात्नरनारायणाचरणांगुष्ठांकितबदरिकाश्रमरमणीयान्कुबेरपुरसुंदरीभूषणरवमुखरशिखराद्राजर्षि
संध्योपासनपूतप्रस्रवणान्मानसोदरकोटरोद्गलितसौगंधिकखंडसुगंधिमंडलाद्गंधमादनात् सेवांजलिकमलमुकु ४५

असाधारणाशक्तिसंपदा३ कं

लखं नुरैः शिरोभिश्चरणानखमयूखचयथितमुकुटपत्रलताग्रंथयो भयचकिततरलतारं दृशो भुजबलविजिताः श्रो
सुखनिपाः। येन चानेकरत्नांशुपल्लविते व्यालंबिमुक्ताफलजालके दिग्गजेनेव करथ्यतरवाक्रांते सिंहासने मेरोराशिली
सुखचयनिकरकं पिताल्लताइव नेमुरायाभिव्यः सर्वदिशः। यस्मै च मन्येसुरयतिरपिस्पृहयांचकार। यस्माद्धवली
कृतभुवनतलः सकललोकहृदयानंदकारी कौंचादिवहंसनिवहो निर्जगाम गुणागणः। यस्य चाश्रिता मोदसुरभिप
रिमलया मंदरोद्धतबहलदुग्धसिंधुफेनलेखयेव धवलीकृतसुरासुरलोकया दश सुदिक्षु सुखरितभुवनभयाभ्यत
46 कीर्त्या। यस्य चाति दुःसह प्रताप संतापखिद्यमानेव हृणाभपि नस्तमोचातपत्रछायां राजलक्ष्मीः। तथा च यस्य
दिक्षिप्रद्विषमिव सुश्रावउपदेशमिव जग्राह मंगलमिव बहुमेने मंत्रमिव जजाप आगमवचनमिव न विसस्मार चरितं
जनो यस्मिंश्च राजनि गिरीणां विपक्षता प्रत्ययानां परत्वं दर्पणानामभिमुखावस्थानं शूलपाणिप्रतिमानां दु

धारा२

कान्द्र: गाश्लेषःजलधराणांचापधारणांध्वजानामुन्नतिर्भुजङ्गमानांवनतिर्वंशानांशिलीमुखवृत्तिर्देवतानांयात्राकुसु
५६ मानांबंधनस्थितिरिंद्रियाणांनिग्रहोवनकरिणांवारिप्रवेशस्तेषामसिधाराणांव्रतिनामसिधारणाग्रहा
णांतुलारोहणमगस्त्योदयेविषशुद्धिःकेशनखानामायतिर्भंगोऽलकदिवसानांमलिनांबरत्वंरत्नोपलानां
भेदोमुनीनांयोगसाधनंकुमारस्तुतिषुतारकोद्धरणंमुक्तारश्मेर्ग्रहणाशंकाशशिनोऽष्टातिक्रमःमहाभारतेदुः
शासनापराधाकर्णनंवयःपरिणामेदंडग्रहणमसिपरिवारेषुकुशलयोगोवक्रताकामिनीनांकुचभंगेषुकरिणांदा
नविच्छित्तिरन्तःक्रीडासुशून्यगृहदर्शनंपृथिव्यामासीत्।तस्यचराज्ञोनिखिलशास्त्रकलावगाहनगंभीरबुद्धिराशै कलापा३
शवादुपारूढनिर्भरप्रेमरसोनीतिशास्त्रप्रयोगकुशलोभुवनराज्यभारनौकर्णधारोमहत्स्वपिकार्यसंकटेष्वविष
ण्णधीर्धामधैर्यस्यस्थानंस्थितेःसेतुःसत्यस्यगुरुर्गुणानामाचार्यआचाराणांधाताधर्मस्यशेषाहिरिवमहीभा ४६

नी४ पत्र४

रधारराक्रमः सलिलनिधिरिव महासत्त्वो जरासंध इव घटितसंधिविग्रहः ध्रुवक इव प्रसाधितदुर्गो युधिष्ठिर
इव धर्मप्रभवः सकलवेदवेदाङ्गविद्विशेषराज्यमंगलैकसारो बृहस्पतिरिव सुनासीरस्य कविरिव वृषपर्वणः
वसिष्ठ इव दशरथस्य विश्वामित्र इव रामस्य धौम्य इवाजातशत्रोर्दमनक इव नलस्य सर्वकार्येष्वाहितमतिरमा
त्यो ब्राह्मणः शुकनासो नामासीत्। यो नरकासुरशरप्रहारमीवतो भ्रमणश्रमनिःसृतमिवनिष्पकठिनां सपीठे
नारायणवक्षःस्थले पि स्थितामदुःकरलामामन्यत प्रज्ञाबलेन लक्ष्मीं। यं च समासाद्य दर्शितानेकयज्ञ
फला लतेव मरुत्पमने कब्रतानगरुता विस्तारमुपययौ प्रज्ञा। यस्यानेकचारपुरुषसहस्रसंचारविरचितवलु
रुद्धविवलयपरिक्षेप प्रमारोधिरपाततले भवनइवाविदितमहरहः समुच्छ्वसितमपि राज्ञो नासीत्। सराजावा
लएव सुरकुंजरकरपीवरेणाराजलक्ष्मीलीलोपधानेन सकलजगदभयप्रदानयज्ञदीक्षायूपेन स्फुरदसिलता

विचिते ३

45

का॰ पू॰ मरीचिजालजटिलेन निरिंवस्ताराति कुलप्रलयधूमकेतुदंडेन बाहुना विजित्य सप्तद्वीपवलयां वसुंधरां तस्मि
४७ न्नेव शुकनासनाम्नि मंत्रिणि स्तुत्लहरीव राज्यभारमारोप्य सुस्थिताः प्रजाः कृत्वा कर्त्तव्यशेषमपरमपश्यन्नपग
ताशेषविपक्षतया विगताशंकः शिथिलितपृथिवीव्यापारः प्रायो यौवनसुखान्यनुबभूव॥ तथा हि। कदा
चिदुच्छ्वसत्कठोरकपोलपुलककलंकितकर्णपल्लवानां प्रणयिनीनां चंदनजलच्छटाभिरिव स्मितसुधाछविभिरभि
षिच्यमानः कर्णोत्पलैरिव लोचनांशुभिस्ताड्यमानः कुंकुमपटवासधूलिभिरिव चामरमारुताभिराकुलीक्रियमा
णः लोचनोत्पलांशुकैरिव करनखमयूखजालकैराहन्यमानश्चंपककुसुमस्रग्मालिकाभिरिव भुजलता
भिराबध्यमानो रस्थाभरभुतकरतलवलसन्नीवलयकरत्नकलरवरमरालीयमानिरमसरलितहंसपरहंसनूपुरि ४७
तशयनमुहुर्हसितचरणागलहृतनाकरकाशोरवरसरभसकचग्रहाच्चूर्णितमाला कर्णपूरमुकुलमिलितकुचकलशोत्कु

रूपंकपत्रलतांछितप्रच्छदपटं मक्षश्रमजलकणिका कान्तुल्लितरोचना। तिलकपत्रभंगमनंगपरवशाः सुरतमान
तान। कदाचित्प्रकरकेतुना राघवपरंपराशिरिव कामिनी करपुटविनिर्मताभिः कुंकुमजलधाराभिः पिंजरीकि
यमाणा कापोलाश्लाजलच्छटा प्रकारपाटली कृतदुकूलोत्संग मदजल बिंदुशबलचंदनस्थासकः कनकश्रं
गकोशैश्चिरं विक्रीडा। कदाचित्कुरवंदनचूर्णधवलितोर्मिमालं चकुलतुलाको रिवात्तालचरणालक्तकसिक्त
हंसमिथुनंमरुल्लकनिपतितकुसुमशारं लवमानकरीन्द्रकुवलयदलमुज्झितनितंबैरकोभजर्जरिततरंगमुद्द
लितनालपर्यस्तनलिन निपतितधूलिपटलमनवरतकरास्फालनस्फुरत्फेन विंदुचंद्रकितं सावरोधजनो
जलक्रीडयादीर्घिकाणामंभश्चकार। कदाचित्सेकेनवंचिताभिः प्रणायिनीभिराबद्धमंगुरभ्रुकुटीभिरारोपितम
णिपाँरिहार्यसुरवरभुजलताभिर्बकुलकुसुमावलीभिः संयतचरणोनखकिरणाविभिश्रैः कुसुमदामभिः क्र

बिंब४

आवापकः पारिहार्यः कटकं वलयो स्त्रियामित्यमरः। १

नु चिप

का०रू० तापरामोँद्रिव समंताद्यत । कदाचिद्बकुलतरुरिव कामिनीगंडूषसीधुधारास्वादमुदितो विकासमभजत । कदाचि
४८ दशोकपादप इव युवतिचरणतलप्रहारसंक्रांतालक्तकोरागमुद्वाह । कदाचिन्मुसलायुध इव चंदनधवलः कंठावस
क्तोल्लसल्लोलकुसुममालः पानमसेवत । कदाचिदैरावण इव मदरक्तकपोलदोलायमानकर्णपल्लवो मदकलः का
ननं विकचवनलताकुसुमसुरभिपरिमलं दंगाहे । कदाचित्किन्नरमिथुनरणितनादानंदितमानसो हंस इव कं
मलवनेषु रेमे । कदाचिन्मृगपतिरिव स्कंधावलंबिकेसरमालः क्रीडापर्वतकेषु विचचार । कदाचिन्मधुकर इव विडं
भ्रमाराकुसुमस्तबकदंतुरे फुल्लतागृहेषु बबंध धाम । कदाचिच्चौलुपटीविरचितावगुंठनो बहुलनिशाप्रदोषे दत्तसंकेताः
सुंदरीरभिससार । कदाचिद्विघटितकनककपाटसकलवातायने अनवरतदह्यमानकृष्णागुरुधूमरंध्रे तिर्यक्पारावत
नैरश्याभिसितविटंकेषु महाप्रासादकुक्षिषु कतिपयासस्नुदत्तपरिवृतो वीणावेणुमनोहरतमम् अंतःपुरसंगीतकं ददर्श । ४८

मुरज

किंबहुना।यद्यदस्मिन्स्मरणीयमभिमतमविरुद्धमायत्यांतदात्वेचतन्नदृष्टं।स्थितेनाःपरिसमाप्तत्वादन्येषां
पृथिवीव्यापाराणांसिषेवेनतुव्यसनितया।प्रसुहितप्र[illegible]जस्यहिपरिसमाप्तसकलमहीप्रयोजनस्य
नरपतेर्विषयोपभोगलीलासुखपामितरस्यतुविडंबना।प्रजानुरागहेतोश्चांतराद्दर्शनंददौ।सिंहासनंचनि
मित्तेछयारुरोह।शुकनासोपिमहांतंराज्यभारमनायासेनैवप्रज्ञाबलेनदधार।यथैवचराजासर्वकार्याण्यकार्षीत्त
व५ द्वदसावपिद्विगुणीकृतप्रजानुरागश्चके।नमपिविलितचूडामणिमरीचिमंजरीजालिभिर्मौलिभिरावर्जितकुसु
मशेखरच्युतमधुसीकरसिक्तसभैरावनतिप्रेरितमणिकुंडलकोटिसंघट्टिताङ्गदैराजकमाननाम।तस्मिन्नपि
चलितेचलितचटुलतुरगबलखुरखरखुररवबधिरीकृतभुवनाबलभरप्रचलद्वसुधातलदोलायमानगिरयो
गलन्मदांधगंधगजदानधाराधकाराःसंसर्पदतिबहलधूलिपरलधूसरितासिंधवः।प्रबलपदातिबलकलक

का॰सू॰ त्नखस्फोटितश्रवणाः सरभसोद्घुष्यमाणजयशब्दनिर्भराः प्रोद्धूयमानधवलचामरसहस्रसंछादिताः पुं
४८ जितनरेंद्रवृंदकनकदंडातपत्रसंघट्टनष्टदिवसा दश दिशो बभूवुः। एवं तस्य राज्ञो मंत्रिनिवेशितराज्यभारस्य
यौवनसुखमनुभवतः कालो जगाम। भूयसा च कालेनान्येषामपि जीवलोकसुखानामायः सर्वेषामंतं ययौ।
एकं तु सुतमुखदर्शनेन न लेभे। तथा सेव्यमानमपि निष्फलपुष्पदर्शनं राजवशाभिर्वान्तःपुरमभूत्। यथा यथा
च यौवनमतिचक्राम तथा तथा विफलमनोरथस्यानपत्यतानजन्मा महानवर्द्धतास्य संतापः। विषयोपभोगेषु
खेच्छाभिरुच्यमनो विजहे। नरपतिसहस्रपरिवृतमप्येकाकिनमिव चक्षुष्मंतमप्यंधमिव भुवनालंबनमपि निरा
लंबमिवात्मानममन्यत। अथ तस्य चंद्रलेखेव हरजटाकलापस्य कौस्तुभप्रभेव कैटभारातेर्वक्षःस्थलस्य
वनमालेव मुसलायुधस्य वेलेव सागरस्य मदलेखेव दिग्गजस्य लतेव पादपस्य कुसुमोद्गतिरिव सुर

श्चि ४ हीन३ स

निमासस्यचंद्रिकेवचंद्रमसः कमलिनीवसरसस्तारापंक्तिरिवनभसो हंसमालेवमानसस्यचंदनवनराजिरि
वमलयस्यफणामणिशिखेवशेषस्यभूषणमस्त्रिभुवनविस्मयजननीजननीचवनितानांविभ्रमाणांसकलां
तःपुरप्रधानभूतामहिषीविलासवतीनाम।एकदास्वतदावासगतस्तांचिंतास्तिमितदृष्टिनाशोकशून्येनपरिजने
नपरिवृतांमा रइवस्थितेश्चध्यानानिमिषलोचनैः कंचुकिभिरुपास्यमानामनतिदूरवर्तिनीभिश्चांतःपुरवृद्धाभि
राश्वास्यमानामविरलाश्रुबिंदुपाताद्रीकृतदुकूलामनलंकृतांवामकरतलविनिहितमुखकमलामसंयत
कुन्तलकांशुनिबिडपर्यंकिकोपविष्टांरुदतींददर्श॥ कृतप्रत्युत्थानोचतांतस्यामेवपर्यंकिकायामुपवे
श्यस्वयंचोपविश्यापरिज्ञातबाष्पकारणोभीतभीतइवकरतलेनविगतबाष्पांभःकणौकुर्वन्कपोलौहपार्श्व
स्थामवादीत्देविकिमर्थमंतर्गतशोकभारमंथरंरुद्यतेग्रथ्यंतेहिमुक्ताफलजालकमिवबाष्पबिंदुनिकर
ममयादे।

50

यतः —

का॰ सू॰ मेतास्तबौपस्मयंस्मयः। किमर्थं चक्षुषोर्दरि नालंकृतासि धात्रा तत्र यद्दवरकारविंदकोशयोरयं किमिति न
५० पातितश्चरणयोरलक्तकरसः कुसुमशरसरःकच्छहंसकौ कस्मात्पादपंकजस्पर्शेन नानुगृहीतौ मणिनू
पुरौ। किंनिमित्तं मय्यमपगतमेखलाकलापस्तूको मध्यमभागः किमिति त्वंहरिणाइव हरिणालांछनेन लिखि
तः कृष्णागुरुपत्रभंगः पयोधरभारे केन कारणेनानन्वीयेहरमुकुरपंक्तेरेवगंगाश्रोतसा न विभूषिता हा
रेणावरोलशिरोधरा किं वृथा वहसि विलासिनि श्रवणयुगलं लववौतकुंकुमपत्रलत्तं केपोलयुगमिदं च को
मलांगुलिदलनिकरैरक्तोत्पलमिव करतलं किमिति कर्णपूररत्नानारोपितं भिमांच केन हेतुनामानिनि धारकू
पुरचितगोरोचनाविंदुतिलकामसंयमिताल किं नीलालकरेखामयं चतेबकुलयक्षजद्दोयरवचंद्रलेखा
विरहितः करोति मेहरिस्वेरम निबहलतिमिरपटलांधकारः कुसुमरहितः केशपाशः प्रसीद निवेदय ५०

यत्र

विधुःखलुनिमित्तमेते हि पल्लवमिव सरागं मम हृदयमाकंपयंति तरलीकृतस्तनोत्सुकास्तवायताः श्वा

समरुतः। कच्चिन्मयापराद्धमन्येन वा केनचिदस्मद्गुरुणा विना परिजनेन। अतिनिपुणमपि चिंतयं

न पश्यामि खलु स्खलितमल्पमप्यात्मनस्त्वद्विषये त्वरयते हि मे जीवितं राज्यं च कथ्यतां सुंदरि सुचःकारण

मित्येवमभिधीयमानापि विलासवती यदा न किंचिन्मतिवचः प्रतिपदे तदा विहृद्धं वाष्पहेतुमस्याः परिजन

57 मपृच्छत्। अथ तस्यास्तांबूलकरंकवाहिनी सततप्रत्यासन्ना मकरिका नाम राजानमुवाच। देव कुतो देवा

स्त्वल्पमपि परिस्खलितमभिमुखे च देवे का शंकिः परिजनस्यान्यस्य वा कस्य चिदपराद्धुं। किंतु महायहस्य

लोवविफलनरेंद्रसमागमास्मीति अयमस्या देव्याः संतापः सुमहांश्च कालः संतप्यमानायाः प्रयममपि स्वामि

नीदानवशीरितसततनिंदितस्तुरता शयनस्नानभोजनभूषणपरिग्रहादिषु समुचितेष्वपि दिवसव्यापारेषु कथं

यतीन२

का॰सू॰ ५१ कथमपिपरिजनप्रयत्नादावर्ज्यमानासशोकेवासीत् । देवस्यहृदयपीडापरिजिहीर्षयानदर्शितवतीविकारं । अद्यतु
चतुर्दशीतिभगवंतंमहाकालमर्चितुमितोगतयातत्रमहाभारतेवाच्यमानेश्रुतमपुत्राणांकिलनसंतिलोकाः
शुभाःपुन्नाम्नोनरकात्त्रायतइतिपुत्रइत्येतच्छ्रुत्वाभवनमागत्यपरिजनेनसशिरःप्रणाममभ्यर्थ्यमानापिनाहा
रमभिनंदतिनभूषणपरिग्रहमाचरतिनोत्तरंप्रतिपद्यतेकेवलमविरलबाष्पदुर्दिनांधकारितमुखीरोदिति
एतदाकर्ण्यदेवःप्रमाणमित्यभिधायविरराम।विरतवचनायांचतस्यांभूमिपालःकंचिन्मुहूर्त्तमिवस्थित्वा
दीर्घमुष्णंचनिश्वस्यनिजगाद।देविकिमत्रक्रियतांदैवायत्तेषुवस्तुष्वतिमात्रमलंरुदितेननवयमनुग्राह्याःप्रा
योदेवतानामात्मजपरिष्वंगामृतास्वादसुखस्यनूनमभाजनमस्माकंहृदयमन्यस्मिन्जन्मनिनकृतमवदातंक
र्मजन्मांतरकृतंहिकर्मफलमुपनयतिपुरुषस्येहजन्मनिनहिशक्यंदैवमन्यथाकर्तुमभियुक्तेनापियाव ५१

वराणां ५

न्मानुष्यके शक्यमुपपादयितुं तावत्सर्वमुपपाद्यतामधिकां कुरु देवि गुरुषु भक्तिं द्विगुणमुपपादय
देवतसपूजां। ऋषिजनसपर्यासु दर्शितादरा भव। परं हि दैवतमृषयो यत्नेनाराधिता यथासमीहितफलानां
मतिदुर्लभानामपि दातारो भवन्ति॥ श्रूयते हि पुरा चण्डकौशिकप्रभावान्मगधेषु बृहद्रथो नाम राजा जनार्द
नस्य जेतारमतुलभुजबलमप्रतिरथं जरासंधं नाम तनयं लेभे। दशरथश्च राजा परिणतवया विभाण्डकमहामु
निसुतस्य ऋष्य शृंगस्य प्रसादान्नारायणभुजानिवाप्रतिहतानुदधीनिवान्यांश्चतुरः पुत्रानवाप। अन्ये
च राजर्षयस्तपोधनानाराध्य पुत्रदर्शनामृतास्वादसुखभाजो बभूवुः अमोघफला हि महामुनिसेवा भवति। अह
मपि खलु देवि कदा समुपारूढगर्भभरालसामापाण्डुमुखीमासन्नपूर्णचन्द्रोदयामिव पौर्णमासीनिशां देवीं
द्रक्ष्यामि। कदा मे तनयजन्ममहोत्सवानन्दनिर्भरो हरिष्यति पूर्णपात्रं जनः। कदा हारिद्रवसनधारिणी सुत
सनाथोत्संगा द्यौरिवोदितरविमण्डला सबालातपा मामानन्दयिष्यति देवी। कदा सर्वौषधिपिंजरजटिलकेशो निहितरक्षाघृत

परि २

का-श्व-
५२
विंदुनिहितास्तु निविन्यस्तगौरसर्षपोन्मिश्रभूतिलेशो गोरोचनाचित्रकंठसूत्रग्रंथिरुत्तानशयोऽस्तनशून्यस्मिताननः
पुत्रको जनयिष्यति मे हृदयाह्लादं कदा गोरोचनाकपिलमुग्धनिरंतरः पुरिकाकरतलैः संचार्यमाणो मूर्तिरशेषजनवंदितो
मंगलप्रदीप इव मे शोकांधकारमुन्मूलयिष्यति चक्षुषोः कदा च क्षितिरेणुधूसरो मंडयिष्यति मम हृदयेन दृष्ट्या
च सह परिभ्रमन् भवनांगणं। कदा केसरिकिशोरक इव संजातजानुचंक्रमणावस्थः संचरिष्यतीतस्ततः स्फटिकमणि
भित्त्यंतरितान् भवनमृगशावकान् जिघृक्षुः कदा रासः पुरः नूपुर [illegible] निनादसंगतान् गृहकलहंसकाननुसरन् कक्ष्यांत
रश्रयावितः कनकमेखलाघंटिकारवानुसारिणीमायासयिष्यति धात्रीं। कदा कृष्णागुरुपंकलिखितमंडलेखालं
कृतगंडस्थलः कोमुखडिंडिमध्वनिजनितप्रीतिरुद्धूकरविप्रकीर्णचंदनचूर्णधूसरः कुंचितांगुलिशिखरांकुशेण ५२
विधुतशिराः करिष्यति मे गजराजलीलां। कदा मातुश्चरणयुगलरागोपयुक्तशेषेण पिंडालक्तकरसेन ढुंढकं
कुमार

चुकितो विडंवयिष्यति सुखानि । कदा कुतूहलचंचललोचनो मणिकुट्टिमेषु धौत्रीहस्तैरनुसरिष्यति स्खलद्ग
तिरात्मनः प्रतिबिंबानि । कदा नरेंद्रसह प्रसारितभुजयुगलाभिनंद्यमानागमनोऽधूसरा मणिमयखलेरवाकु
लीक्रियमाणालोलदृष्टिरास्थानस्थितस्य मे पुरः पर्यटिष्यतिसमांतरे इत्येतानि च मनोरथशतानि चिंतयतोऽन्तः
संतप्यमानस्य हृदयोतिरजनो मामपि दहत्येवायमहर्निशमनलइवानपत्यतासमुद्भवः शोकः शून्यमिव मे प्रति
भाति जगदफलमिव पश्यामि राज्यमप्रतिविधेयेतु विधातरि किं करोमि तन्मुच्यतामयं देवि शोकानुबंधः । आधीय
तां धैर्ये धर्मे च धीः धर्मपरायणानां हि सदासमीपसंचारिण्यः कल्याणसंपदो भवंतीत्येवमभिधाय स सलिलमादाय स्व
यं करतलेनाभिनवपल्लवेनेव विकचैमलोपमानेनाननमस्याः साश्रुलेखं ममार्ज । पुनः पुनश्च प्रियशतमधु
राभिः शोकापनोदनिपुणाभिर्धर्मोपदेशगर्भाभिर्वाग्भिराश्वास्य सुचिरं स्थित्वा नरेंद्रो निर्जगाम । निर्गते तस्मिन् मंदी

क२

भूतशोकावेगा विलासवती यथाक्रियमाणमालम्बनपरिग्रहाहारिकं नुचितं दिवसव्यापारमन्वतिष्ठत्। ततः प्र
भृति सुतरां देवताराधनेषु ब्राह्मणपूजासु गुरुजनसपर्यासु चादरवती बभूव। यच्च किंचित्कुतश्चित्शुश्राव
गर्भलक्षणं तत्तत्सर्वं चकार। न महान्तमपि क्लेशमजीगणत्। अनवरतदह्यमानगुग्गुलबहलधूमान्धका
रितेषु चण्डिकागृहेषु धवलाम्बरा शुचिर्विसृष्टिरुपोषिता हरितकुशोपरचितेषु शालशयनेषु सुष्वाप। पुण्यसलि
लपूर्णैर्विविधकुसुमफलोपेतैः क्षीरतरुपल्लवलाञ्छनैः सर्वरत्नगर्भैः शातकुम्भकुम्भैर्गोकुलेषु वृद्धगोपवनि
ताकृतमङ्गला लक्षणसंपन्नानां गवामधः सस्नौ। प्रतिदिवसमुत्थायोत्थाय सर्वरत्नोपेतानि हैमानि तिलपा
त्राणि ददौ। महानरेन्द्रलिखितमण्डलमध्यवर्तिनी विविधबलिदानानन्दितदिग्देवतानि बहुलपक्षचतु
र्दशीनिशासु चतुष्पथे स्नपनमङ्गलानि भेजे। सिद्धायतनानि कृतविचित्रदेवतोपयाचितकानि सिषेवे ५३
ब्राह्मणेभ्यो ३

वोदर्शितप्रत्ययानिसन्निधानमात्मवन्ता।निजगाम।प्रसिद्धेषुनागकुलहृदेषुममज्ज।अश्वत्थप्रभृतीनु
पपादितस्ज्ञान्महावनस्पतीन्कृतप्रदक्षिणाववंदे।दोलायमानैश्चलयेनपाणियुगलेनस्नाताश्वपम
रवंडमिश्रसंपादितंरजतपात्रेपरिगृहीतंवायसेभ्योदध्योदनबलिमदात्।अपरिमितकुसुमधूपविलेप
नपपल्लवपायसबलिलाजकलितामहरहरंबादेवीसपर्यामाततान।स्वयंतुयत्नकृतपिंडपात्राश्रेभक्तिप्र
वणेनमनसासिद्धादेशान्नग्नक्षपणकान्यप्रच्छ।विप्रश्निकादेशवचनानिबहुमेने।निमित्तज्ञानुपचचार।
54 शकुनज्ञानविदामादरमदर्शयत्।अनेकवृद्धपरंपरागमागतानिरहस्यान्यंगीचकार।दर्शनागतंद्विजज
नमात्मज दर्शनोत्सुकावेदश्रुतीरकारयत्।अनवरतंवाच्यमानाःपुण्यकथाःशुश्राव।गोरोचनालि
खितभूर्जपत्रगर्भान्मंत्रकरंडकान्नुवाह।रक्षाप्रतिसरोपेतान्यो।षधीसूत्राणिबबंध।परिजनोपिचास्याः

का॰पृ॰ सततमुपश्रुत्यै जगाम। तन्निमित्तं निचजग्राह। शिवाभ्यो मांसबलिपिंडमनुदिनं निशि समुत्ससर्ज।
५४ स्वप्नदर्शनाश्चर्याण्याचार्याणां माचचक्षे। चत्वरेषु शिवबलिमुपजहार। एवं च गच्छति काले कदाचि
द्राजा क्षीणभूयिष्ठायां रजन्यामल्पशेषपांडुतारके जरत्पारावतपक्षधूम्रे नभसि स्वप्ने सितप्रासाद
शिखरस्थितायाविलासवत्याःकरिण्याइवबिसवलयं वदनकमले सकलकलापरिपूर्णमंडलं शशिनं वि
शंतमद्राक्षीत्। प्रबुद्धश्चोत्थाय हर्षविकासस्फीततरेण चक्षुषा धवलीकृतवासभवनस्तस्मिन्नेव
क्षणे समाहूय शुकनासाय तं स्वप्नमकथयत्। स च समुपजातहर्षः प्रत्युवाच। देव संपन्नाः सुचिरादस्मा
कं प्रजानां च मनोरथाः। कतिपयैरेवाहोभिर्निःसंदेहमनुभवति स्वामी सुतमुखकमलावलोकनसुख
मद्य खलु मयापि निशि स्वप्ने धौतसकलवाससा शांतमूर्तिना दिव्याकृतिना द्विजेन विकचचंद्रकला ५४

केनचित्

वदात्तरलशतपत्रमालोलकेसरसहस्रजटालंमकरंदबिंदुशीकरवर्षिपुंडरीकमुत्संगेदेव्यामनोरमायानि
हितंदृष्टं।आवेदयंतिप्रत्यासन्नमानंदमग्रपातीनिशुभानिनिमित्तानि किंचान्यत् प्रियतरमपरमभि
कमानंदकारणमतोभविष्यति।अवितथफलाश्चप्रायोनिशावसानसमयदृष्टाभवंतिस्वप्नाः।सर्व
थानचिरेणमांधातारमिवशौर्येरायंसर्वराजर्षीणांभुवनानंदहेतुमात्मजंजनयिष्यतिदेवीशरत्कालकम
लिनीवाभिनवकमलोद्भेनेनगंधगजंमाह्लादयिष्यतिदेवं।येनेयंदिग्गजमदलेखेवाविच्छिन्नसंतानाक्षि
तिभारधारणोचिताभविष्यतिकुलसंततिःस्वामिन्नित्येवमभिदधानमेवतंकरेणगृहीत्वानरेंद्रःप्रवि
श्याभ्यंतरमुभाभ्यामपिताभ्यांस्वप्नाभ्यांविलासवतीमानंदयांचकार।कतिपयदिवसापगमेचदेवताप्र
सादात्सरसी. मिवप्रतिमाशशीविवेशविलासवतीं।येननंदनवनराजिरिवपारिजातेनमधुसूदन
गर्भो

कादं॰ ५५

वक्षस्थलीव कौस्तुभमणिना सुतरामराजत। दर्पणश्रीरिव च गर्भच्छलेन संक्रान्तमवनिपालप्रतिबिम्बमुद्वह-
सा शनैः शनैश्च प्रतिदिनमुपचीयमानगर्भा निर्भरपरिपीतसागरसलिलभरमन्थरेव मेघमाला मंदं मंदं सं-
चचार। मुहुर्मुहुरनुबद्धविजृम्भिका माजिह्मितलोचनमलसं निशश्वास। तथावस्थां चैनामहरहः स्वयमनेक-
रसवाञ्छितपानभोजनां ग्रीष्ममिव श्यामायमानपयोधरमुखीं केतकीमिव गर्भच्छदपाण्डुरमालोक्येङ्गितकुश-
लः परिजनो विज्ञातवान्। अथ तस्याः सर्वपरिजनप्रधानभूता सदा राजकुलसेवासचतुरा सद्य च राजसंनिक-
र्षप्रगल्भा सर्वमंगलकुशला कुलवर्द्धना नाम महत्तरिका प्रशस्ते दिवसे प्रदोषवेलायामभ्यन्तरास्थानमंडप-
गतं गंधतैलावसेकज्वलितदीपिकासहस्रपरिवारमुडुनिकरमध्यवर्त्तिनमिव पौर्णमासीशशिनं सुरगराजप-
राममणिसहस्रान्तरालस्थितमिव नारायणं मूर्द्धावसिक्तैः प्रधाननरेन्द्रैः परिमितैः परिवृतमनतिदूराव ५५

56

गर्भ ३ रि

स्थितपरिजनमनंतरमुत्तुंगवेत्रासनोपविष्टेन चोत्तमधवलांबरपर्यानेनानुल्बणवेषेण जरठयिनेवांगा वगांभीर्ये
णासमुपारूढविस्रंभनिर्भरास्तास्ताः कथाः शुकनासेन सह कुर्वाणो भूमिपालस्तमुपसृत्य रहः कर्णमूले विदितं वि
लासवतीवृत्तांतमकार्षीत् । तेन तु तस्या वचनेनाश्रुतपूर्वेण संभाव्येनामृतरसेनेव सिक्तसर्वांगस्य सद्यः प्ररू
ढरोमांकुरनिकरकंटकिततनोरानंदरसेन विह्वलीक्रियमाणस्य स्मितविकसितकपोलस्थलस्य परिस्फुरितन्दर
यातिरिक्तं हर्षमिव दर्शनांशुवितानच्छलेन विकिरतो राज्ञः शुकनासमुखे लोलतारकमानंदजलबिंदुक्लिन्नपक्ष्म
मालं तत्क्षणमपतच्चक्षुः । अनालोचितपूर्वं तु नं हर्षप्रकर्षमभिसमीक्ष्य भूपतेः कुलवर्द्धनां च स्मितविकसितमु
खीमागतो दृष्ट्वा तस्य चार्थस्य सततं मनसि विपरिवर्त्तमानत्वादविदितवृत्तांतोऽपि तत्कालोचितमपरमतिमहतो ह
र्षस्य कारणमपश्यन्शुकनासः स्वयमुत्प्रेक्ष्य समुत्कंपितासनः समीपतरमुपसृत्य नातिप्रकाशमाबभाषे । देव किम

प

ज५

का०पू० स्त्रीं किंपितस्मिन्स्वप्नदर्शनेसत्यं।अत्यंतमुत्फुल्ललोचना।[illegible]कुलवर्द्धनोदृश्यते।देवस्यापीदंप्रियवचनश्रवणाकु
५६ तूहलादिवश्रवणमूलमुपसर्पदुपरचयदिवनीलकुवलयकर्णपूरशोभामाभानंदजलपरिप्लुतंतरलतारकंविक
सदविदयतिमस्त्यकर्णकारणामीक्ष णयुगलं।उपारूढमहोत्सवश्रवणकुतूहलमुत्सुकोत्सुकंकाम्यतिमेमन
स्तदावेदयतुदेवः।किमिदमित्युक्तवतिशुकनासेराजाविहस्याब्रवीत्।यदिसत्यमनयोर्यथाकथितंतथासर्वमवितथंस्व
प्नदर्शनंमहेतुनअद्यहेकुतोस्माकमियतीभाग्यसंपत्स्मौनंहिवयमीदृशानांप्रियवचनश्रवणानामवितथवादिनीमय्य
हंकुलवर्द्धनामेवंविधानांकरस्थापानामसंभावितमात्मानंमन्यमानोविपरीतामिवाद्यपश्यामि।तदुत्तिष्ठस्वयमेवग
त्वाकिमत्रसत्यमितिदेवींपृच्छाम्यास्थानीमित्यभिधायविसर्ज्यसकललोकमुन्मुचस्त्रांभोभोऽभ्यस्यानिकुलवर्द्धनायेदत्वांत
यावद्दत्तप्रसादानंतरमवनितललाञ्छितशिरःप्रणामेनाभ्यर्थितःसहशुकनासेनोत्थायहर्षविशेषनि ५६

भैरिणा स्तूयमाणो मनसापवनचलितनीलकुवलयदललीलाविडंबकेन हर्षिणेन चाक्षुषा परिस्फुर
ताभिनंद्यमानस्तत्कालसेवासमुचितेन विरलविरलैः परिजनेनानुगम्यमानः पुरःसंसर्पिणीनामनिल
लोलस्थूलशिखानां प्रदीपिकानामालोकेन समुत्सार्यमाणकक्षान्तरतिमिरसंहतिरन्तःपुरमयासीत् ग
वसुकृतरक्षासंविधानेन वसुधालेपधवलिते प्रज्वलितमंगलप्रदीपे पूर्णकलशाधिष्ठितद्वारपक्षके प्रत्यग्र
लिखितमांगल्यालेख्योज्ज्वलितभित्तिभागमनोहारिण्युपरचितसितवितानेवितानपर्यंतावबद्धमुक्ताफलदाम
णिप्रदीपप्रहततिमिरे वासभवने भित्तिलिखितपत्रलताकृतरक्षापरिक्षेपे शयनशिरोभागविन्यस्तधवलनि
द्रामंगलकलशमाबद्धविविधौषधिमूलमंत्रपवित्रमवस्थापितरक्षाशक्तिवलयमितस्ततो विप्रकीर्णगौर
सर्षपमवलंबितवालयोक्त्रग्रथितलोहितपिप्पलपत्रमासक्तरुचिरारिष्टपल्लवमुत्तुंगपादपीठप्रतिष्ठितं मिंदु

५३।२

57

का॰सू॰ दीधितिधवलमच्छस्फटिकमचलराजशिलातलविशालं गर्भोचितं शयनतलमधिशयानां कनकपात्रपरिगृहीतैर
५७ विच्छिन्नविरलावस्थितदधिलवैर्जलतरंगतरलसितशालिसिक्थनिकरैर्ग्रथितकुसुमांजलिसनाथैः स्फटीभाज
नैरखंडिताननमत्स्यपरलैश्च प्रत्यग्रपिशितपिंडमिश्रैर्विच्छिन्नसलिलधारानुगम्यमानमार्गैः पटलकप्रज्वलि
तैश्च शीतलप्रदीपैर्गोरोचनामिश्रगौरसर्षपैश्च सलिलांजलिमिश्रामिचारकुशलेनांतःपुरजरतीजनेन क्रियमाणा
वत्तरक्षाकर्मंगलां धवलांबरविविक्तवेषेण प्रस्तुदिनेन प्रस्तुतमंगल्यप्रायालापेन परिजनेनोपास्यमानां सुधारक्त
गर्भतयौंतर्गतकुलशैलामिव क्षितिं सलिलनिमग्नैरावतामिव मंदाकिनीं गुहागतसिंहामिव गिरिराजमेखलां ज
लधरपटलांतरितदिनकरामिव दिवसश्रियमुदयगिरितिरोहितशशिमंडलामिव विभावरीमभ्यर्णजन्मकमल
विनिर्गमामिव नारायणनाभिमासन्नागस्त्योदयामिव दक्षिणाशां फेनाहृतामृतकलशामिव क्षीरोदवेलां गोरो ५७

१ नाभिमुकुलेन [illegible] ७

पि४ गर्भा४ पार्थिवः३ मति२ विलासवती२

चनाचित्रितदशामनुपहतमतिधवलदुकूलयुगलवसानां विलासवतीं ददर्श। ससंभ्रमपरिजनप्रसारितकरतलावले
वनावष्टंभेनवामजानुविन्यस्तकरपल्लवांप्रचलितभूषणरवमुखरमुत्तिष्ठंतीमलमलमत्यादरेणदेविनोत्स्था
तव्यमित्यभिधायसहतया तस्मिन्नेवशयनीयेसमुपाविशत्। प्रमृष्टचामीकरचारुपादेबवलोपल्यङ्केचासन्नेशयनी
तरेशुकनासोन्यषीदत्। अथतामुपारूढमालोक्य हर्षभरमंथरेणमनसा प्रस्तुतपरिहासो राजादेविशुकनासः
पृच्छतियदाहकुलवर्द्धनाकिमपितत्किंतथैवेत्युवाच। अथाव्यक्तस्मितच्छुरितकपोलाधरलोचनालज्जयादशनांशुजालक
व्याजेनांशुकेनेवमुखमाच्छादयंती विलासवती तत्क्षरामयोमुखीतस्थौ।। पुनःपुनश्चापृच्छ्यमानाकिंमामतिमात्रत्रप
परवशीकरोषिनाहंकिंचिदपिवेद्मीत्यभिदधाना। तिर्यग्वलिततारकेणाचक्षुषा राज्ञानंसाभ्यसूयमिवापश्यत्। अप
रिस्फुरद्धासच्छटालोकविशदेनमुखशशिनाश्रुत्वाप्यतिरेनांभूयोपिबभाषे। सुतनुयदिमदीयेनवचसानत्रपयावि

नु२ ना३

वक्तमुखी२

58

का०सू० तन्ययेनेतद्द्वयमहं स्थितो निभृतं। अस्यास्तु किं भवति विभास्यासि विद्यमानरत्नकोशैश्चंपकद्युतेः सवर्णतयापरिमलानुमी
५८ यमानस्य कुंकुमांगरागस्य पांडुरतामापाद्यमानस्य। अनयोश्च गर्भसंभवामृतावसेकनिर्वाप्यमाणेंदूरयशोकानलप्रभवं
धूममिव वमतोर्गृहीतनीलोत्पलयोरिव चक्रवाकयोस्तमालपल्लवलांछितयोरिव कनककलशयोः सरुद्विवालिखितकृ
ष्णागुरुपत्रलतयोः श्यामायमानचूचुकयोः पयोधरयोः। अस्यानुयाति दिनमतिगाढतरतामापाद्यमानेन कांचीकलाप
नद्ध्यमानस्य नश्यत्त्रिवलिलेखावलयस्य कृशिमानमुज्झतो मध्यभागस्येत्येतद्ब्रुवाणामवनिपालमंतर्मुखनिगूढहासः
शुकनासो देव किमायासयसि देवीं प्रियमनया कथयापि लज्जते त्यज कुलवर्द्धनाकथितवार्त्तासंबद्धमालापमित्यब्रवीत्।
एवं विधाभिश्च नर्मप्रायाभिः कथाभिः सुचिरं स्थित्वा शुकनासः स्वभवनमयासीत्। नरेंद्रोपि तस्मिन्वासभवने तया सह तां
निशामत्यवाहयत्। ततः क्रमेण च यथासमीहितगर्भदोहदसंपादनप्रमुदिता पूर्णे प्रसवसमये पुण्येहनि अनवरतगलन्न ५८

59

ड्काकलितकालकलैर्बहिराहितच्छायैर्गणकैर्गृहीते लग्ने प्रशस्तायां वेलायामिरंमदमिव जलधरमाला सकललोक
हृदयानंदकारिणं विलासवती सुतमसूत। तस्मिञ्जाते सरभसमितस्ततः प्रधावितस्य परिजनस्य चरणाकुलसंक्षोभचलित
क्षितितलोऽस्याद्यामिश्रुखप्रस्तस्खलज्जतिविकलकंचुकिसहस्रजनसंमर्दनिष्पिष्यमाणापतितकुब्जवामनकिरातग
णो विस्फार्यमाणांतःपुरजनाभरणझंकारमनोहरः सर्वोपात्रहरणाविलुप्यमानवसनभूषणः संक्षोभितनगरो राजकुले
दिष्टिवृद्धिसंभ्रमोऽतिमहानभूत्। अनंतरं च मंदरमथ्यमानजलनिधिविक्षोभगंभीरदुंदुभिध्वानपुरःसरेणाहन्यमानशंखकाह
लानकैर्निर्भरेणाभंगरपटहपटुरवसंवर्द्धितेनानेकसहस्रजनकलकलबहलेन त्रिभुवनमापूरयतोत्सवकोलाहलेन सस
मंताः सांतःपुराः प्रकृतयः सराजलोकाः सवेश्यायुवतयः सबालवृद्धा नृत्तुरागोपालमुन्मत्ता इव हर्षनिर्भराः प्रजाः। प्रतिदि
नमवर्द्धत चंद्रोदयेनेव जलनिधिः कलकलमुखरो राजसूनोर्जन्ममहोत्सवः। पार्थिवस्तु तनयाननदर्शनमहोत्सवत्वरात्सद

निबह२ स२ म्हु३४

व॰ क॰२१५

का॰पू॰ योपिदिवसवशेनमौहूर्तिकगणोपदिष्टेप्रशस्तेमुहूर्तेनिवारितनिखिलपरिजनःशुकनासद्वितीयोमणिमयमंगलकलश
५८ युगलाश्रन्येनोसिक्तबहुपुत्रिकालंकृतेनविविधवर्णपल्लवनिबद्धनिरंतरनिचितेनसंनिहितकनकमयहलमुसलयुगलेन
विरलग्रथितसितकुसुममिश्रदूर्वाप्रवालमालालंकृतेनालंबिताविरलव्याघ्रचर्मणावंदनमालांतरालबद्धरत्नघंटिकागणेनद्वा
रदेशेनविराजमानमुभयतःशंखारपत्रकयोर्मर्यादानिपुणेनगोमयमयीभिरुज्ज्वलानिविनिहितवराटकप्रकरस्तुरगैरंतरांतरा
बहुविधवर्णरागरुचिरकार्पासकुसुमलेशलांछिताभिःकुसुंभकेसरलवाश्लेषलोहिताभिर्लेखाभिरालिखितस्वस्तिकभ
क्तिजालंसुपरिरचयंताहरिद्राद्रवविच्छुरणापरिपिंजरांबरधारिणीभगवतीषष्ठीदेवीकुर्वताविकचपङ्कपुटविकरशिखंडिपृष्ठ
मंडलाभिरूढमालोलतोरणितपटधवलितपताकांशुकसितशक्तिदंडप्रचंडकार्त्तिकेयंसंघटयताविन्यस्तालक्तकपटलपाटलमध्य
भागौसूर्याचंद्रमसाववधृतौकुंकुमपंकपिंजरीकृताभूर्जपोतकनककैयवनिकरकंटकितामविरलमग्नगौरसिद्धार्थकप्रकर ५८

मय१ ळ

60

मनलक्षुभ्यमाणारिष्टतरुपल्लवोल्लासितरक्षाधूमगंधः ४
परं २

तयाकांचनरसखचिताभिर्मरकतमयगुटिकाकदंबमालांविन्यस्यन्ताचंदनजलधवलितेसुभित्तिशिखरभागेसुपंचरा
गविचित्रचेलचीरकलापचिह्नामापीतपिष्टपंकांकितांवर्द्धमानैपरामन्यानिचप्रसवगृहमंडनमंगलानिसंपादय
तापुरंध्रिवर्गेणासमधिष्ठितंमुपद्वारसंयतविविधगंधकुसुममालालंकृतजरच्छागमखिलव्रीहिमध्यावस्थापिता
र्घस्नाध्यासितशयनशिरोभागमनवरतदह्यमानाज्यमिश्रभुजंगनिर्मोकमेषविषाणाग्रशोदैर्मध्ययनमुखरद्विजगण
विप्रकीर्यमाणशांत्युदकलवमभिनवलिखितमातृपटपूजाव्यग्रधात्रीजनमनेकवृद्धांगनारब्धसूतिकामंगलगीतिका
मनोहरमुपयाद्यमानस्वस्त्ययनंक्रियमाणशिशुरक्षाबलिविधानमाबध्यमाननवदलकुसुमदामशतमविच्छिन्नपठ्यमा
ननारायणनामसहस्रमसमलहारकपृष्ठिप्रतिष्ठापितैरंतःशुभशतानीव निश्चलशिखैर्ध्यायद्भिर्मंगलप्रदीपैरुद्भासितमु
खवातासिलतासना।थपाणि।भिःसर्वतोरक्षापुरुषैःपरिवृतंसूतिकागृहमपश्यत्।।अंतःपावकंचस्पृष्ट्वाविवेश।।प्रविश्य

का॰सू॰ चप्रसवपरिक्षामपांडुमूर्त्तेरुत्संगगतं विलासवत्याः स्वप्रभासमुद्योपरतगर्भगृहप्रदीपकप्रभमपरित्यक्तगर्भरागत्वा
६० दुदयपरिपाटलमंडलमिव सवितारमपरसंध्यालोहितबिंबमिव चंद्रमसमनुपजातकाठिन्यमिव कल्पतरुपल्लवसंपुटमुत्फु
ल्लमिव रक्तारविंदराशिमिव निदर्शनावतीर्णमिव लोहितांगं विद्रुमकिसलयदलैरिव बालातपच्छेदैरिव पद्मरागरश्मि
भिरिव विरचितावयवमनभिव्यक्तमुखपंचकमिव महासेनं सुरवनिताकरपरिग्रहमिवामरपतिकुमारकमुज्ज्वलकल्या
णकार्त्तस्वरभास्वरया स्वदेहप्रभया पूरयंतमिव वासभवनमुज्झासमानैः सहजन्मभूषणैरिव महापुरुषलक्षणैरुपेतमागा
मिकालपातिन प्रहृष्टया श्रिया समालिंगितमाल्हादहेतुमात्मजं ददर्श विगतनिमेषनिश्चलपक्ष्मणा च मुहुर्मुहुः प्रमृ
ष्टसंबद्धितानंदबाष्पपटलस्तुततारकेणाहूरादिस्फारितेन स्निग्धेन चक्षुषा पिबन्निवात्यपन्निव मनोरथसहस्रप्राप्तदर्शनं स
स्पृहमीक्षमाणा स्तनयाननं मुमुदे। कृतकृत्यं चात्मानमेने समृद्धमनोरथः। शुकनासस्तु शनैः शनैरंगजात्यंगान्यस्य निरूप ६०

स्पृशन्निव २

वि— का५

यन्त्रीतिविस्फारितैर्लोचनैर्भूमिपालमवादीत्।देवपश्यपश्यास्यकुमारस्यगर्भसंपीडनवशात्परिस्फुटावयवशोभ
स्यापिमाहात्म्यमाविर्भावयंतिचक्रवर्त्तिचिह्नानि।तथाह्यस्यसंध्यांकुरसवालशशिकलाकारेललाटपट्टेनवनलिनना
लमेंगतन्वीयमूर्णापरिस्फुरति।एतद्विकचपुंडरीकधवलेकर्णांतायतमुहुर्मुहुरुन्मिषितैर्धवलयतीव वासभव
नमरालपक्ष्मलोचनयुगलंविजृंभमाणाकमलकोशपरिमलमनोहरमियमस्यसहजमाननामोदमाजिघ्रतीवदूरायताक
नकलेखेवनासिका।रक्तोत्पलकलिकाकारेमुद्वहतीववास्याधररुचकं।रक्तोत्पलकलिकालोहिततलौमेवनौविष्टरश्रेवसद्व
शंखचक्रचिह्नोपशस्तलेखालांछितौकरौ।अभिनवकल्पतरुपल्लवकोमलतलेरवामयेध्वजरथतुरगातपत्रकमलैरलंकृ
तमनेकनरेंद्रसहस्रचूडामणिचक्रचुंबनोचितंचरणायुगलं।एषचदुंदुभेरिवगंभीरःस्वरःस्यनुरनःश्रूयतेइत्येवंकथय
त्येवतस्मिन्नसंभ्रमापसृतेनराजलोकेनद्वारिस्थितेनदत्तमार्गस्त्वरितगतिरागत्यप्रहर्षोद्गमपुलकिततनुःस्फारीभवद्धो

61

योगो२ ग४

का.पू.
६१

चनोमंगलकनामांऽन्तःपुरचरःपुरुषःप्रांजलिःप्रणम्यराजानंव्यजिज्ञपत्देवदिष्ट्यावर्द्धसेप्रतिहतास्तेशत्रवश्चिरंजी
वजयत्वंपृथिवींत्वत्प्रसादादद्यभवतःशुकनासस्यापिज्येष्ठायांब्राह्मण्यांमनोरमाभिधानायांरामइवरेणुकायांतनयो
जातःश्रुत्वादेवःप्रमाणमिति।अथनृपतिरमृतरसेनेवसिक्तस्तेनवचनेनप्रीतिविस्फारिताक्षःप्रत्यवदत्।अहोकल्या
णपरंपरासत्योऽयंजनप्रवादोयद्विपद्विपदंसंपत्संपदमनुबध्नातीति।सर्वथासमानसुखदुःखतांदर्शयताविधिनापिभवतो
चवयमनुवर्तिताइत्यभिधायप्रीतिविकसितमुखःसरभसमालिंग्यविहसन्स्वयमेवशुकनासस्योत्तरीयंपूर्णपात्रंजहा
र।तस्मैचप्रीतमनाःप्रियवचनश्रवणानुरूपंपुरुषायाभिमतंपारितोषिकमादिदेश।उत्थायचतथैवतेनचरणविकुट्टनक्व
णितनूपुरसहस्रमुखरितदिगंतरेणसरभसोत्क्षेपवलितमणिवलयावलीवाचालितभुजलतेनोर्द्धीकृतेस्तानन्ततलैः
करपुटैरनिलनुडितामाधवपाककमलिनीमिवदर्शयतापर्यस्तसरित्तकर्णपल्लवेनपरस्परांगदकोटिसंघट्टस्फुटितेत ६१

62

रीयांशुकेन श्रमजलक्षालितांगरागरंजितसुचीनवाससा किंचिदवशिष्टतमालपत्रेणा विलसद्धारविलासिनीहसितै
रज्झिद्भकै...व. वनानुकारं प्रथयता सरभसवल्गनस्खलल्लोलहारलतास्फालितकुचस्थलेन सिंदूरतिलकलुलिताल
कलेवरेण विप्रकीर्णपिष्टातकपांसुपुंजपिंजरितकेशपाशेन प्रनृत्तकलमूककुब्जकिरातवामनवधिरजडजनपुरःसरेणा
न्तरीयांशुकग्रीवाबद्धावकृष्टविडंबितजरत्कंचुकिकदंबकेन वीणावेणुमुरजकांस्यताललयाऽनुगतेन कलमधुरमुद्गायता
हर्षनिर्भरतया मत्तेनेवोन्मत्तेनेव ग्रहगृहीतेनेव व्यपगतवाच्यावाच्यविवेकेन नृत्तक्रीडाप्रसक्तेनान्तःपुरिकाजनेन प्रव
लम्बमानकुंडलाहतकपोलमिलितानांच विघूर्णमानकर्णोत्पलेनार्धविगलितविलोलशेखरेणाशिलायमानवैकक्षिककु
सुममालेन निर्दयप्रहतभेरीमृदंगमर्दलपटहनिनादानुगतकाहलाशंखरवस्वजनितरसेन चरणसंनिपातैर्दारयतेव वसु
धां राजपरिजनेन प्रवृत्तनृत्तेन च चारणगणेन विविधमुखवाद्यकृतकोलाहलेन पठता गायता वल्गता चानुगम्यमानः

भा२

का॰ पू॰ शुकनासभवनंगत्वाद्विगुणतरमुत्सवमकारयत्।अतिक्रांतेचषष्ठीजागरेप्राप्तेदशमेऽहनिपुण्येमुहूर्तेगाःसुवर्णंच
६२ कोटिशोब्राह्मणसात्कृत्वामातुरस्यमयापरिपूर्णमंडलश्चंद्रःस्वप्नेमुखकमलमाविशन्दृष्टइतिस्वप्नानुरूपमेवराजा
स्वसूनोश्चंद्रापीडइतिनामचकार।अपरेद्युःशुकनासोपिकृत्वाब्राह्मणोचिताःसकलाःक्रियाःराजानुमतमात्मजस्य
विप्रजनोचितंवैशंपायनइतिनामचक्रे।क्रमेणकृतचूडाकरणादिबालक्रियाकलापस्यशैशवमतिचक्रामचंद्रापीडस्य त॰
तारापीडःक्रीडाव्यासंगविघातार्थंबहिर्नगरादनुशिप्रंप्राकारमंडलेनपरिगतमनुप्राकारमाहितेनमहतापरिखावल
येनपरिवेष्टितमतिदृढकपाटसंपुटसुरक्षितैकद्वारप्रवेशमेकांतोपरचिततुरगवाह्यालीविभागमर्धक्रोशमात्रायाम
मतिमहतातुहिनगिरिशिखरमालानुकारिणासुधाधवलेनचंद्रशालावलयेनविलासितमधःकल्पितव्यायामशा
लममरागाराकारंविद्यामंदिरमकारयत्।सर्वविद्याचार्याणांचसंग्रहेयत्नमतिमहांतमन्वतिष्ठत्।तत्रस्थंचतंकेसरि ६२

किशोरकमिवपंजरगतंकृत्वाप्रतिदिननिर्गममाचार्यकुलमुपनायपरिजनपरिहारसंपनीताशेषशिशुक्रीडनव्या
संगमनन्यमनसमरचित्विद्योपादानार्थमाचार्येभ्यश्चंद्रापीडंशोभनेदिवसेवैशंपायनद्वितीयमर्पयांबभूव।प्रतिदि
नंचोत्थायोत्थायसहविलासवत्याविरलपरिजनस्तत्रैवगत्वादिनमालोकयामासराजा।चंद्रापीडोप्यनन्यहृदयतया
तथानियंत्रितोराज्ञाअचिरेणैवकालेनयथास्वमात्मकौशलंप्रकटयद्भिःपात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमा
सर्वा४ नांविद्याजग्राह।मणिदर्पणइवातिविमलेतस्मिन्संचक्रामसकलःकलाकलापः।तथाहि।पदेवाक्येप्रमाणेधर्मशास्त्रेराज
नीतिषुव्यायामविद्यासुचापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषुसर्वेष्वायुधविशेषेषुरथचर्यासुगजपृष्ठेषुतुरं
गमेषुवीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषुवाद्येषुभरतादिप्रणीतेषुनृत्तशास्त्रेषुनारदीयप्रभृतिषुगांधर्ववेदविशेषे
षुहस्तिशिक्षायांतुरगवयोज्ञानेपुरुषलक्षणेषुचित्रकर्मणिपत्रच्छेद्येपुस्त व्यापारेलेख्यकर्मणिसर्वासुद्यूतकलासु

63

का॰प्र॰ गंधशास्त्रेषु शकुनिरुतज्ञाने ग्रहगणिते रत्नपरीक्षासु दारुकर्मणि दंतव्यापारे वास्तुविद्यासु आयुर्वेदे यंत्रप्रयोगे विषाप
६३ हरणेषु सुरंगोपभेदे तरणे लंघने प्लुतिषु आरोहणे रतितंत्रेषु इंद्रजाले कथासु नाटके आख्यायिकासु काव्येषु महा
भारतपुराणेतिहासरामायणेषु सर्वलिपिषु सर्वदेशभाषासु सर्वसंज्ञासु सर्वशिल्पेषु छंदःस्वन्येष्वपि कलाविशेषेषु परं
कौशलमवाप। सहजा चास्य अभ्यस्यतो वृकोदरस्येव शैशव एव निर्बभूव सर्वलोकविस्मयजननी महाप्राणता। यदृच्छ
या क्रीड[illegible]ललाटे वितकर्णपल्लवा वनतांगाः सिंहकिशोरकसमाक्रांता इव गजकलभकाश्चलितुमपि न शेकुः। ए
कैकेन च कर[illegible]प्रहारेण बाल एव तालतरुस्कंधान्मृणालदंडानिव लुलाव। सकलराजन्यवंशवनदावानलस्य परशुरामस्येवास्य
नाराचाः शिखरिशिलातलानि [illegible]बिभिदुः। दशपुरुषसंवाहनयोग्येन चायोदंडेन श्रममकरोत्। ऋते च महाप्राणतायाः सर्ववि
द्याभिर[illegible]कलाभिरनुचकार तं वैशंपायनः। चंद्रापीडस्य तु सकलकलाकलापपरिचयबहुमानेन शुकनासगौरवे ६३

64

णासहपांसुक्रीडनतयासहसंवर्द्धनतयाचसर्वविश्रंभस्थानंद्वितीयमिवहृदयंवैशंपायनःपरंमित्रमासीत्।निमेषम
पितेनविनास्थातुमेकाकीनशशाक।वैशंपायनोपितमुदयकरमिववासरोनानुगच्छन्क्षणमपिविरहयांचकार।एवंतस्य
सर्वविद्यापरिचयमाचरतश्चंद्रापीडस्यत्रिभुवनविलोभनीयोमृतरसइवसागरस्यसकललोकहृदयानंदजननश्चंद्रो
दयइवप्रदोषस्यबहुविधरागविकारभंगुरःसुरचापकलापइवजलधरसमयस्यमकरध्वजायुधभूतःकुसुमप्रसवइवकल्प
पादपस्याभिव्यज्यमानरागरमणीयःसूर्योदयइवकमलवनस्यविविधविलासयोग्यःकलापइवशिखंडिनोयौवना
रंभःप्रादुर्बभूव।तत्रमरणीयस्यापिद्विगुणोरमणीयतांपुपोष।लब्धावसरोनवसेवकइवनिकटीबभूवचास्यमन्मथः।लक्ष्म्या
सहववृधेवक्षःस्थलेबंधुजनमनोरथैःसहापूर्यंतोरुदंडद्वयमरिजनेनसहतनिमानमभजतामध्यभागःत्यागेनस
हप्रथिमानमाततानानितंबभागः।प्रतापेनसहारुरोहरोमराजिः।अहितकलत्रालकलताभिःसहप्रलंबतामुपययौभुज

का॰सू॰ सुगलंचरितेनसहैववर्त्तमानमजनयल्लोचनयुगलं।आ॰ज्ञयासहगुरूणांभूवंभुजशिखरदेशःस्थैरेणासहगंभीरतामा
६५ ज्ञगामहृदयं।एवंचक्रमेणासमारूढनवयौवनारंभंपरिसमाप्तसकलकलाविज्ञानमधीताशेषविद्यंचान्तुमोदित
माचार्यैःश्चंद्रापीडमानेतुंराजाबलाधिकृतंबलाहकनामानमाहूयबहुतुरगबलपदातिपरिवृतमतिप्रशस्तेहनिप्राहि
णोत्।सगत्वाविद्यागृहंद्वास्थैःसमावेदितःप्रविश्यक्षितितलविलंबितचूडामणिनाशिरसाप्रणम्यस्वभूमिसमुचितेरा
जसमीपइवसविंधेमासनेराजपुत्रानुमतोन्यसीदत्।स्थित्वाचमुहूर्त्तमात्रंबलाहकश्चंद्रापीडमुपसृत्यदर्शितविनयोव
ज्ञैपत्।कुमारमहाराजःसमाज्ञापयतिपूर्णानोमनोरथाःअधीतानिशास्त्राणिशिक्षिताःसकलाःकलाःगतोसिसर्वास्वायु
धविद्यासुपरांप्रतिष्ठामनुमतोसिनिर्गमायविद्यागृहात्सर्वाचार्यैःउपगृहीतशिक्षंगंधगजकुमारकमिववारिबंधाद्विनि
र्गतमधिगतसकलकलापंपौर्णमासीशशिनमिवोदितंपश्यतुत्वांजनोव्रजंतुसफलतांमतिचिरदर्शनोत्कंठितानिलोक ६४

३२ न४ कक्षा

विलोचना निरर्गलं प्रतिसमुत्सुकान्यन्तीव सर्वान्तःपुराणि। अयमत्रभवतो दशमो वत्सरो विहाय गृहमधिवसतः प्रविष्टो सि
सस्तु मन्तुमवगूर्ध्वमेवं संपिंडितेनामुना शौंडशौर्यवर्द्धसे। तदद्यप्रभृति निर्गत्य दर्शनोत्सुकाभ्यो दत्त्वा दर्शनं समस्ताभ्यो मा
तृभ्यः अभिवाद्य च गुरूनपगतनियंत्रणो यथासुखमनुभव राज्यसुखानि नवयौवनललितानि च। संमानय राजलोकं पूज
य द्विजातीन् परिपालय प्रजाः आनंदय बंधुवर्गमयं च ते त्रिभुवनैकरत्नमनिलगरुडसमजव इंद्रायुधनामा तुरंगमः प्रेषि
तो महाराजेन द्वारि तिष्ठति। एष खलु देवस्य पारसीकाधिपतिना त्रिभुवनाश्चर्यमिति कृत्वा जलधिजलादुत्थितमयोनिज
मिदमश्वरत्नमासादितं मया महाराजाधिरोहणयोग्यमिदमिति संदिश्य प्रहितो दृष्ट्वा निवेदितं च लक्षणाविद्भिर्देव यान्यु
च्चैःश्रवसः श्रूयंते लक्षणानि तैरयमुपेतो नैवं विधो भूतो भावी वा तुरंगम इति। तदयमनुगृह्यतामधिरोहणेन। इदं च मूर्द्धा
भिषिक्तपार्थिवकुलप्रसूतानां विनयोपपन्नानां शूराणामभिरूपाणां कलावतां च कुलक्रमागतानां राजपुत्राणां सहस्रं

का॰श्र॰ परिचारार्थमनुप्रेषितं तुरंगमास्थिरदंद्वारिग्रणामस्तालसंप्रतिपालयतीन्यस्मिन्नायं विरतवचसि बलाहके चंद्रापीडः पितु

पदे१२ नि२ न२

६५ राज्ञो शिरसि कृत्वा नवजलधरध्वानगंभीरया गिरा प्रवेश्यतां इंद्रायुध इति निर्जगाम त्रिपुरारिरेश। अथ वचनांतरमेव प्रवेशि

तमुभयतः खलीनकनककटकावलंबाभ्यां पदैहैत्ताकुंचनप्रयत्नाभ्यां पुरुषाभ्यामवकृष्यमाणमतिप्रमाणमूर्द्धीकरयु

कणयुग्मस्तमाग्नामापिबंतमिव संमुखागतमखिलमाकाशमतिनिष्ठुरेण मुहुर्मुहुः प्रकंपितोदरं घोणाहेषारवेणापूरित

भुवनो [illegible] दरेण निर्भर्त्सयंतमिवालीकवेगदुर्विदग्धं गरुत्मंतमतिदूरमवनमताग्रतिक्कुणामतिदूरमुन्नमताच जवनि

ग्रीवस्फीतरोषधुरुलुरायमाणाघोरघोणेन शिरोभागेन निजजवदर्पवशादुल्लंघनार्थमाकलयंतमिव त्रिभुवनमसितपी

तहरितपाटलाभिराखंडलचापानुकारिणीभिर्लेखाभिः कल्माषितशरीरमास्तीर्णविविधवर्णकंबलमिव कुंजरकलभं

कैलासनगाग्रजातधातुधूलिपाटलमिव हरवृषभमसुररुधिरपंकलेखालोहितसटमिव पार्वतीसिंहं रंहःसंघातमिव मू ६५

स्त्रिमंतमनवरतपरिस्फुरत्प्रोथपुटोन्मुक्तफूत्कारेण निजवीर्यार्पितमनिलमिव नासिकाविवरेणोद्वमंतमंतःस्खलितमु
र२ खरं लीनखरशिखरक्षोभजन्मनो लाक्षाजलमुखः फेनस्तबकानुदरविनिवासपरिपीतामृतरसगंडूषानिवोद्गिरंतमत्या
यतमतिनिर्मांसतयासमुत्कीर्णमिव वदनमुद्वहंतमाननमंडलनिहितारुणचामरसमुद्गतैरंकुरकलापैरुपेतेनावसक्त
रक्तचामरेणोर्वनिश्चलशिखरेण कर्णयुगलेन विराजमानमुज्ज्वलकनकशृंखलारचितरश्मिकलापकलितयालोहास्सो
हित्तल्लेवलोलसटासंतानयांजलनिधिसंचरणलग्नविद्रुमपल्लवयेव शिरोधरयोपशोभितमतिकुटिलकनकपत्रलताप्र
तानमंमुखेण परे परैरपितरत्नमालेन स्थूलमुक्ताफलप्रायेण तारागणेनेव संध्यारागमरुणेनाश्वालंकारेणालंकृतम
श्वालंकारनिहितमरकतरत्नप्रभाश्यामायमानदेहतया गगनतलनिपतितदिवसकररथतुरगशंकामिवोपजनयंतमति
तेजस्वितया च निरोधवशात्मनि रोमकूपमुक्तानि सागरपरिचयलग्नानि मुक्ताफलानीव स्वेदलवजालकानि वर्षंत

66

का॰ उ॰ मिंद्रनीलमणिपादपीठमनुकारिणमिंद्रांजनशिलाद्रिदंतैरिवानवरतपतनोत्पतनजनितविषमखरखुरस्वरैर्वैः शृंगमिः खु
६६ रपुटैर्जर्जरितवसुंधरैर्मुरजवाद्यमिवाभ्यस्यंतंमुत्कीर्णमिवजंघासु विस्तारितमिवोरसि श्लक्ष्णीकृतमिवमुखेऽशमारितमि
वकंधरायामुल्लिखितमिवपार्श्वयोर्द्विगुणीकृतमिवजघनभागे जवप्रतिपक्षमिवगरुत्मतस्त्रैलोक्यसंचरणसहायमिव
मारुतस्यांशावतारमिवोच्चैःश्रवसो वेगसब्रह्मचारिणंमिवमनसो हरिचरणंमिवसकलवसुंधरोल्लंघनक्षमंवरुणहंस
मिवमानसप्रचारैर्मुमांसल्विषंमिवदिकसिताम्भोकपारिलंबितनमिव मस्म सितपुंड्रकोकितमुखंकमलवनमि
वमधुपंकपिंगकेसरंग्रीष्महिवसमिवमरुयामंधुप्रतेजसंवंभुजंगमिवसंचागत्यमिमुरवमुपस्थितुलिनमिवशंखमा
लिकाभरणंभीतमिवरूक्षकर्णंविद्याधरराज्यमिवचक्रवर्तिनोवाहनोचितंस्थर्याद्यमिवसकलभुवनाद्भुतंमिमश्चा
तिशयमिंद्रायुधमद्राक्षीत्॥ ॥ दृष्ट्वा चैतं महद्दूप सर्वमिमानुषलोकोचिताकारमखिलत्रिभुवनराज्योचितमशेषलक्ष ६६

नि४

गोपयन्नस्यरूपातिशयमतिधीरप्रकृतेरपिचंद्रापीडस्यप्र स्पर्शविस्मयोहृदयं।आसीच्चास्यमनसिसरभसवि
वर्तिनचलितवासुकिभ्रमितमंदरेणामथ्नताजलनिधिजलमिदमस्यरत्नमनस्मुद्धरता किंनामरत्नमुद्धृतंसुरासुर
लोकेन।अनारोहताचमेरुशिलातलविशालमस्यवक्षुमाखंडलेन किमासादितंत्रैलोक्यराज्यफलं उद्धेश्चवसावि
स्मिन्नहरयौवंचिनःखलुजलौघविनाशनमश्व:।मन्येचभगवतोनारायणस्यवस्तुगोचरमियताकालेननायमुपगतो
येनाद्यापितांगरुडारोहणव्यसनितांनपरित्यजति।अहोखलुतिरोधयितंत्रिदशराजसमृद्धिरियंनास्यराज्यलक्ष्मीः
यद्देवंविधान्यपिसकलत्रिभुवनदुर्लभानिरत्नानिउपकरणतामागच्छंति।अतितेजस्विनयामसाआरोतयाचसदैवते
वेयमस्याकृतिःयसन्यमारोहणशंकामिवमेजनयति।नहिसामान्यवाजिनाममानुषलोकोचितःसकलत्रिभुवन
विस्मयजननदृशीदृश्योभवत्याकृतयः।देवतान्यपिहिमुनिशापवशादुज्झितनिजशरीरकाःशापवचनोपनीत

भा २ जंन१

किल१ भूत्वा२

का॰सू॰ निशरीरांतरारायेध्यासतएव।श्रूयतेहिपुरास्थूलशिरानाममहातपामुनिरखिलत्रिभुवनललामभूतामप्सर

६३ सरंभाभिधानांशशाप।सासुरलोकमपहायश्वल्हृदयेनिवेशयात्मानमश्वहृदयेतिविख्यातावडवाभूमिकावत्यां

शतधन्वानंनामराजानमुपसेवमानामर्त्यलोकेमहांतंकालमुवास।अन्येचमहात्मानोमुनिजनशापपरिपीतस्व

भावानानाकारंबभ्रमुरिमंलोकं।असंशयमनेनापिमहात्मनाकेनापिशापभाजाभवितव्यमावेदयतीवमदंतःकरणं

मस्यदिव्यतामितिविचिंतयन्नेवोरुस्तुरासनादुदतिष्ठत्।मनसाचतंतुरंगममुपसृत्यमहात्मन्नर्वन्योसिसोसिनमो

स्तुतेसर्वथामर्षणीयोयमारोहणातिक्रमोऽस्माकमपरिगताभि दैवतान्यप्यनुचितपरिभवभांजीत्यामंत्रयां

बभूव।विदिताभिप्रायइवसतेनमिंद्रायुधश्चकुलितशिरःकेसरसमयहतिर्क्षोणानाकेकरौंतिर्यक्चक्षुषाविलोकयामुहुर्मुहु

स्ताडयन्नाक्षितितलमुत्तवातधूलिधूसरितक्रोडरोमराजिनादक्षिणखुरेणारोहणायाहूयत्रिवस्फुरितघ्राणंदिवर ६३

कू२ तारकेण२ जिमवं२

पातः

बर्हरवध्वनिमिश्रं मधुरं मंपरुष हुंकारपरंपरानुबद्धमतिमनोहरं हेषारवमकरोत् । अथानेनं मधुरहेषितेन रश्यारोहणा
भ्यनुज्ञात इवेंद्रायुधमारुरोह चंद्रापीडः । समारुह्य तं प्रादेशमात्रमिव त्रैलोक्यमखिलं मन्यमानो निर्गत्य प्रलयजलधर
विमुक्तोपदेशासारपरुषैस्तोजर्जरयत्नेवरसातलमतिनिष्ठुरैराश्वखुरपुटानां रवेण खुररजो निरुद्धत्वाराद्धोरघोषैर्नेत्ररहेषित
68 नबधिरीकृतसकलभुवनविवरं मशिशिरकिरणदीधितिपरामर्शस्फुरितविमलफलकेनोद्गीकृतेन कुंतलतावनेनोन्नाल
३४ नीलोत्पलकलिकावनगहनं सरं बागगनतलमेवं कुर्वाणः सुहृद्भासरातपत्रसहस्रांधकारिताष्टदिक्सुरवतयास्फुरितशतम
न्युचापकलापकल्माषमिव जलधरवृंदंस्फुद्गमत्फेनपुंजमवलितमुखवतयाअनवरतवल्गानचटुलतयाच प्रलयसागरजल
कल्लोलसंघातमिव समुद्धन्नमदृष्टपर्यंतं मग्नसैन्यमपश्यत् । तच सागरजलमिव संक्षोरयेन चंद्रापीडनिर्गमेन सकलमे
वसंचचालाश्वीयं । अहमहमिकयाचप्रणामलालसाः समसापनीतातपत्रशून्यशिरसः परस्परोत्पीडनकुपिततुरंगमाने
मदमेय २ रै न

योग्य ४

का॰ पू॰ वारणायस्तो राजपुत्राःसर्वे पर्यवारयंत । एकैकशश्च प्रतिनामग्रहणमावेद्यमानान्बलाहकेन विप्रचलितमुकुरपद्मराग
६८ किरणांकुरच्छलेनानुरागमिवोद्वमद्भिः संभावितसेवांजलिमुकुलतया यौवराज्याभिषेककलशावर्जितसलिललग्न
कमलैरिव दूरावनतैः शिरोभिः प्रणामुः । चंद्रापीडस्तु तान्सर्वानूसन्मानयित्वा यथोचितमनंतरस्तुरंगमधिरूढेनानुगम्य
मानो वैशंपायनेन राज्यलक्ष्मीनिवासपुंडरीकाकृतिना सकलराजन्यकुलकुमुदखंडचंद्रमंडलेनेव तुरंगमसेनाप्रव
नीपुलिनायमानेन क्षीरोदफेनधवलितवासुकिफणामंडलछविना स्थूलमुक्ताकलापजालकाढ्येनोपरिचिह्नीकृतनैके
न सहिरण्यसुद्दनौकार्तस्वरदंडेन ध्रियमाणेनातपत्रेणनिवारितातपः उभयतः समुद्धूयमानचामरकलापपवननर्तितक
र्णपल्लवः पुरःप्रधावताऽनेकवीरपुरुषप्रायेणानेकसहस्रसंख्येन पदातिपरिजनेन जयजीवेति च मधुरवचसा मंगल
ज्ञायमानवरनंस्तुवैः पठतां वंदिजनेन स्तूयमानो नगराभिमुखः प्रतस्थे । क्रमेण चानंतरं समासादितविग्रहमनंगमिवावती ६८

।निमहना२

तं नगरमार्गमनुप्राप्तमवलोक्य सर्वएव परित्यक्तसकलव्यापारो रजनिकरोदयपरिबुध्यमानकुमुदवनतुल्यका
रीजनः समजनि। सत्यस्मिन्नसमति मुखकुमुदकरं बकविकृताकृतिः कार्तिकेयो विडंबयति कुमारशब्दं अहो वयम
तिपुण्यभाजो यदिमाममानुषीमस्याकृतिमंतःसमारूढप्रीतिरसनिष्यंदविस्तारितेन कुतूहलोत्तानितेन नेत्रयुग
लेनानिवारिताः पश्यामः सफलानो घजानाजं अवन्नासर्वेथानमोस्मै रूपांतरधारिणे चंद्रापीडच्छद्मने पुंडरीकेक्ष
णायेति वदन्नारचितप्रणामांजलिर्नगरलोकः प्रणनाम। सर्वतश्च समुद्घटितकपाटपुटसकलवातायनसहस्रनयनं
चंद्रापीडदर्शनकुतूहलान्नगरमपि समुन्मीलितलोचननिवहमिवाभवत्। अनंतरं च समाप्तसकलविद्यो विद्यागृहान्निर्गतो
यमागच्छति चंद्रापीड इति समाकर्ण्य लोकनकुतूहलिन्यः सर्वस्मिन्नेव नगरे ससंभ्रममुत्सृष्टार्धपरिसमाप्तप्रसाधनव्या
पाराः काश्चिद्भ्रमकरतलगतदर्पणाः स्फुरितसकलरजनिकरमंडला इव पौर्णमासी रजन्यः काश्चिदार्द्रालक्तकपार

रस१

89

राग

ति पा

का॰ पू॰ लितचरणाः पुराः कमलपरिपीतबालातपाइवान्यैः काश्चित्ससंभ्रमगतिविगलितमेखलाकलापाकुलितचरणाः किस

६९ लयाः शृंखलासंदानमंदमंदसंचारिण्य इव करिण्यः काश्चित्कलधरसमयदिवसश्रिय इवेंद्रायुधैरुचिरांबरधारिण्यः का

श्चिदुल्लसितधवलनखमयूखपल्लवान्नूपुररवाकृष्टगृहकलहंसकानिवचरणान्पुरस्तादुद्वहंत्यः काश्चित्करतलस्थितस्थूलमु

क्ताहारयष्टयो रतिमिव मदनविनाशशोकगृहीतस्फटिकाक्षवलया विडंबयंत्यः काश्चित्पयोधरांतरालगलितमुक्तालता

स्तनुविमलस्रोतोजलोत्तीर्णचक्रवाकमिथुना इव शरदोषश्रियः काश्चिन्नूपुरमणिसंमुच्छितेन्द्रायुधतया परिचयानुगतग

हमयूरिका इव विराजंत्यः काश्चिदर्द्धपीतोज्झितमणिचषकाः स्फुरितरागैर्मधुरसमिवाधरपल्लवैः क्षरंत्यो हर्म्यतलानिल

लुनाः समारुरुहुः । अन्याश्च भवनतोरणवातायनविवरविनिर्गतमुखमंडलाविकचकमलकोशपुटामंबरतलसंचारिणीं क

मलिनीमिव दर्शयंत्यो ददृशुः । उत्थाय च विकसत्सरसपसंचलनजन्मा मधुरस्वरया स्फालितवीणारवकोलाहलबहुला ६९

किर रा ४

रसनारवाहूतरहस्सारसरसितसंमिलः स्खलितचरणगतलतताडितसोपानजातगंभीरध्वनिप्रहृष्टानामवरोधशिखं
डिनांकेकारवैरनुगम्यमानोनवजलधरखंवकितकलहंसकोलाहलको मलोमकरध्वजविजयघोषणानुकारीपरस्य
रविच्छन्नारशितनारनरहारमणीनारमणीनांप्रोच्चहारी हर्म्येकुक्षिषुप्रतिरवनिर्झरीभूयमाणनिनादः। मुहूर्तमिव
युवतिजननिरंतरतयानारीम याइवआसाराः सालक्तकपदैर्विन्यासैः पल्लवमयमिवक्षितितलं। अंगनांगप्रभाप्र
वाहेणालावण्यमयमिवनगरं। आननमंडलैनिर्बद्धेनचंद्रविंवमयमिवगगनतलं। आतपनिवारणायोत्तानितकरतलै
र्जालकैर्नककमलवनमयमिवदिक्चक्रवालं। आभरणांशुकलापैर्नेद्रायुधमयइवातपः। लोचनमयूखलेखासंतानेननीलो
त्पलदलमयइवदिवसोवभूव। कौतुकप्रसारितनिश्चललोचनानांचपश्यंतीनांतासामादर्शमयानीवसलिलमयानीवस्फ
टिकमयानीवहृदयानिविवेशवंद्रापीडाकृतिः। आविर्भूतमदनरसानांचान्योन्यतः सपरिहासाः सविभ्रमाः ससंभ्र

70

पाठे ४२

का॰ सू॰ माःसेर्ष्याःसोन्मादाःसाभ्यसूयाःसविलासाःसमन्मथाःसस्पृहास्तत्रस्थाणामतिरमणीयाःअसमुद्गलापाःतथा
७० हि।त्वरितगमने माम पिशनि पातयसि दर्शनोन्मत्ते गृहाणोत्तरीयमुल्लासयास्कलत्ता माननावलंबिनीमूढे। चंद्रलेखा
मुपाहर उपहारकुसुमस्खलितचरणापतसि मदनांधे। संयमय मदनिश्चेतने केशपाशं। उत्क्षिप चंद्रापीडदर्शनव्यस
निनि कांचीदामकं। उत्सार्यय बालेकपोलरोलायितं कर्णपल्लवं। अहृदये गृहाण निपतितं दंतपत्रं। यौवनोन्मत्ते वि
लोकयसे जनेनस्थगय पयोधरभारं। अपगतलज्जे शिथिलीभूतमाकलय दुकूलं। अलीकमुग्धे द्रुततरमागम्यतां। कु
तूहलिनि देहि दर्शनांतरं। असंतुष्टे कियदालोकयसे। तरलहृदये परिजनमपेक्षस्व। पिशाचिनि गलितोत्तरीयाहस्यसे
जनेन। रागाहतनयने पश्यसि न सखीजनं। अनेकभंगिविकारसारे दुःखमकारणायासितहृदया जीवसि। मिथ्यावि ७०
नीते किं व्यपदेशवीक्षितैर्विसृज्य मालोकय। यौवनशालिनि किं पीडयसि पयोधरभारेण। अतिकोपने पुरतोसि वा। म

न

त्सत्सरिणि। किमेकाकिनी रुणत्सि वातायनं। अनंगपरवशे मरीयमुत्तरीयांशुकमुत्तरीयतां नयसि। रागा सर्वम
र्हे निवारयात्मानं। उज्झितधैर्ये किं धावसि गुरुजन समक्षं। उह्लसत्त्वभावे किमेवमाकुली भवसि। मुग्धे निगूह स्वमदन
ज्वरजनितपुलकजालकं। असाध्वाचरणे किमेवं वस्तु नाम्यसि। बहुविकारे विविधांगमंगवलनाया सिनमध्य माणाङ्गु
थारिविघसे। अन्यहृदये स्वभवनान्निर्गतमथात्मानं नावगच्छसि। कौतुकाविष्टे विस्मृतासि निःश्वसितुं। अंतःसंकल्पर
चितरतसमागमसुखरससन्निमीलितलोचने समुन्मीलय लोचनयुगलमतिजडा मत्यायं। अनंगशरप्रहारमूर्छिते रविकि
रणान्निवारणाय कुरु शिरस्युत्तरीयांशुकपल्लवं। अपि सती व्रतग्रहगृहीते द्रष्टव्यमपश्यंती वंचयसि लोचनयुगलं। अयमन्ये
हताशिपरपुरुषदर्शनपरिहारव्रतेन। वसीदोत्तिष्ठ सखि पश्य रतिविरहिते साश्रुर्दिवसशर्वरीतं गृहीतमकरध्वजं मकरध्वजं।
अयमस्य सितातपत्रांतरे गगलिकुलनिशिरसि तिमिरशंका निपतित इव शशिकरकलापो मालतीकुसुमशेखरो

71

तर४ न२

का॰ष॰

७१ भिलक्ष्यते। एतदस्य कर्णाभरणमरकतप्रभाश्यामायितमुपरचितविकचशिरीषकुसुमकर्णपूरमिव कपोलत
लमाभाति। अयमस्य हारान्तर्निविष्टारुणमणिकिरणकलापच्छलेन हृदयाद्विनिष्कुरन्निव यौवनराग इव बहिः परि
स्फुरति। एतदनेन चामरकलापान्तरैरितस्ततो वीक्षितं। एतत्किमपि विशेषं पायनेन सरसमामंत्र्यस्मनमयूखलेखा
धवलीकृतदिक्चक्रवालं हसितं। एषोऽस्य शुकपक्षहरितैरङ्गैरुत्तरीयांशुकप्रान्तेन बलेर्हकस्खुरगखुरचलनज
न्मानमासन्नमग्रकेशेषु रेणुमपहरति। अयमनेन लक्ष्मीकरकमलकोमलतरः समुत्क्षिप्य तिर्यक्तुरंगमस्कंधे नि
क्षिप्तश्चरणपल्लवः। सलीलमयमनेन नूनं ताम्बूलयाचनार्थमुन्नमिततलो दीर्घाङ्गुलिरातानपुष्करकोशशोभी गजेनेव
शैवालकवलग्रासलालसः प्रसारितः करः। धन्या सा या लक्ष्मीरिव निर्जितकमलं करतलमस्य वसुंधरासपत्नी ग्रहीष्य
ति। धन्या च देवी विलासवती सकलमहीमंडलभारधारणक्षमः ककुभां दिग्गजइवगर्भेरा यया च सूतः इत्येवं विध ७२

च३

व॰ कुसुमामिश्रै २

निचान्याभिर्वंदितानां तासामापीयमानइवलोचनपुटैराहूयमानइवभूषणरवैरनुगम्यमानइवहृदयैर्निबध्य
मानइवाभरणरत्नरश्मिरज्जुभिरुपहृयमाणाइवनवयौवनवलिभिःशिथिलभुजलताविगलितधवलवलयनिकरैः
पदेपदेदिवाशनलइवदर्शितांजलिभिरवकीर्यमाणाश्चंद्रापीडोराजकुलसमीपमाससाद। क्रमेणचायामावस्थिताभिरन
वरतचामरस्थलगलितमदमषीपंककारीभिरंजनगिरिमालामलिनाभिःकुंजरघटाभिरंधकारितदिङ्मुखतयाजलद
दिवसायमानमुद्दंडधवलातपत्रसहस्रसंकरमनेकद्वीपांतरागतदूतशतसमाकुलंराजद्वारमासाद्यतुरंगमादवतता
72 राअवतीर्यचकरतलेनवैशंपायनमवलंब्यपुरःसविनयंप्रस्थितेनबलाहकेनोपदिश्यमानमार्गस्त्रिभुवनमिवपुंजीकृ
तमागृहीतकनकवेत्रलतैःसितवारवाराधारिभिःसितांगरागैःसितकुसुमशेखरैःसितोष्णीषैःसितवेषपरिग्रहतयाश्वे
तद्वीपसंभवैरिवकृतयुगपुरुषैरिवमहाप्रमाणैर्दिवानिशमालिखितैरिवोत्कीर्णैरिवतोरणस्तंभनिषण्णैर्द्वारपालैरनुष्ठि

करे २

का.पू. तद्द्वारदेशं । अनेकसंयमनचंद्रशालिकाविटंकवेदिकासंकरशिखरैरंकस्थैरयहसितकैलासशिखरशोभैरमल

७२ सुधावदातैः सप्रालेयशैलमिवमहाप्रासादैरनेकवातायनविवरविनिर्गतयुवतिमुखराकिरणसहस्रतयाकनकशृं

खलाजालकेनेवोपरिवितानेनविराजमानं । अंतर्गतायुधनिवहाभिरशीतिविषकुलसंकुलाभिःपातालगुहाभिरिवा

तिगंभीराभिरायुधशालाभिरुपेतंमबलाचरणालक्तकरससरक्तमणिशकलैःशिखरनिलीनशिखिकुलकृतकेका

रवकलकलैःक्रीडापर्वतकैरुपशोभितमुज्ज्वलवराकंबलावगुंठितकनकपर्याणाभिःप्रचलच्चामरकलापचुंबितकं

वा.२ र्णपल्लवाभिःकुलयुवतिभिरिवोपगूढनिःक्षाविनयनिभृताभिर्यमिकरेणुकाभिरध्यासितकक्ष्यांतरं । आलानस्तंभनिषण्णे

नचलनवजलधरघोषगंभीरमनुगतवीणावेणुरवरम्यमास्फालितवर्धरिकाबर्हरमनवरतसंगीतमृदंगध्वनिमामीलि

तलोचनत्रिभागेनचामरस्थानकोटिनिखसहस्तेननिश्चलकर्णतालेनाकर्णायमानंसलीलमुभयपार्श्वावलंबिवर्णा ७२

न३ च.७४

ति ४ वा ४ वं २ हृ२ लत ४ रा २

कंबलतया विंध्यगिरिणेव विस्फुतधातुविचित्रितपङ्कसंपुरेना घोररागीतानंदस्तनमेंड्कंठगर्जितेन मदजलल
व शबलशंखशोभितश्रवणपुरेन रज निकरबिंबचुंबितवर्त्तकांबुदैर्वितुंबकेन कर्णांत वलंबिना कांचनमयेन कुतक
र्णपूरमिवांकुशेन मुखमुद्दहता मदज लमलिनेन द्वितीयेनैं कर्णचामरेण कपोलतलशोलायमानेन मधुकरकुलेन
लंकृयमाणेन अत्युदग्रतया शर्वकाय स्थूलामनतं जघनमागस्य पातालादिवोत्थितानिशासमयेनेव परिस्फु
रत्सांद्रचंद्रनक्षत्रमालेन शरदारंभेणेव प्रकटितं दुरा चारुपुष्करेण वामनरूपेणेव कृतत्रिपदीविलासेन स्फ
टिकगिरितटेनेव लग्नसिंहमुखप्रतिमेन प्रसारितैनेवोत्कोलकर्णपल्लवाहतमुखेन गंधमादननाम्ना गंधहस्तिनास
नाथीकृतैकदेशमुज्ज्वलपट्टकंबलपरिधावरितपृष्ठे स्थुरसितमधुरध्वनिकारवमुरस्वरकंठमंजिष्ठालोहितस्कंधकेस
रबालपल्लवैर्वनगजतुषिरपाटलसटैः विकेसरिभिः पुरो निहितयवसराशिशिखरोपविष्टमंदुरायालै रासन्नमंगल

कोमल ४

73

स रभ

का॰ ९ गीतनृत्तनिरतैः कौरेरितः कपोलस्थलमधुरैरसेतुलितस्कंधकवलैर्भूपालवल्लभैर्मंदुरागतैस्तुरंगमैरुद्भासितमधिकर
७३ णमंडपगतैश्चार्यवेषधरैरत्युज्ज्वलासनोपविष्टैर्धर्ममयैरिव धर्माधिकारिभि र्महापुरुषैरधिष्ठितमधिगतसक
लग्रामखंडनामभिरेकभवनमिव जगदखिलमालोकद्भिरालिखितासकलभुवनव्यापारैर्यथा धर्मराजनगरव्य
तिकरं दर्शयद्भिरधिकरणलेखकैरालिख्यमानशासनसहस्रमभ्यंतरावस्थितनरपतिनिर्गमप्रतीक्षणाप
रैराच स्थानस्थानेषु वद्धमंडलेन कनकमयाईचंद्रताराराशतशबलैश्चर्मफलकैर्निधानसमयमिव दर्शयता
स्फुरितनिशितकरवालकरग्रहकरालितातपेनैकध्यवरापुरश्चरितधवलरंतपत्रेण तुंगबद्धमौलिकलापेन
धवलांबरेण स्थासकखचितभुजोरस्थलेनबद्धासिधेनुकेनांध्रद्रविडसिंहलप्रायेण सेवकजनेनास्थानमंडपगते
नेवस्थो विना सनोपविष्टेन प्रसारयतादुरोदरक्रीडामध्यस्थानाष्टापदव्यापारमास्फालयतापरिवादिनीमालि ७३

रचताचित्रफलके भूमिपालप्रतिबिंबमावध्नताकाव्यगोष्ठीमानह्नतापरिहासकथांबिंदताबिंदुमतींचिंतयताप्रहेलि
कांभावयतानरपतिकृतकाव्यसुभाषितानिपठताछिपरीशृंकृताकेविगुणानुत्किरतापत्रभंगानालपतावारवि
लासिनीजनमाकर्णयतावैतालिकगीतमनेकसहस्रसंख्येनधवलोष्णीषपटाश्लिष्टविकटकिरीटसंकरशिरसानि
र्झरशिखरालग्नबालातपमंडलेनेवकुलपर्वतचक्रवालेनमूर्द्धाभिषिक्तेनसामंतलोकेनाधिष्ठितंआस्थानोस्थि
तभूमिपालसंवर्तितानांचंकुधानांरत्नासनानांवराशिभिरनेकवर्णैरिंद्रायुधपुंजैरिवविराजितसभापर्यंतंअमल
मणिभूमिसंक्रांतमुखनिवहप्रतिबिंबतयाविकचकमलपुष्पप्रकरमिवसंपादयंतागतिवशरणितनूपुरयाहारर
सनारवनमुखरेतास्कंधदेशादस्तोककनकदंडचामरेणानिर्गच्छताप्रविशताचानवरतंवारविलासिनीनांजनेनाकुलि
तां।एकदेशनिषण्णचामीकरशृंखलासंयतस्वगराभिमतस्नानःप्रचलितपरिचिताभिमतकस्तूरिकाकुरंगपरिमलवासि

७४ तद्दिङ्मुखमनेककुब्जकिरातवर्षवरबधिरवामनकमूकसंकुलमुपाहृतकिंनरमिथुनमानीतवनमानुषमाबद्धमेष
कुक्कुटकुररकपिंजललावकवर्तिकायुद्धमुत्कूजितचकोरकादंबहारीतकोकिलमालप्यमानशुकसारिकं। इभपति
मदपरिमलामर्षजृंभितैश्च निःकूजद्भिः शिखरिगणाजीवितैरिव गिरिगुहानिवासिभिर्गृहीतैः पंजरकेसरिभिरुद्भास्य
मानमुद्भास्यमानैः कांचनभवनप्रभाजनितदावानलशंकैर्लोलतारकैर्भ्रमद्भिर्वनहरिणकैः कदंबके लोचनभ्रमयाश
बलीकृतदिगंतरमुद्दामकेकारवानुमीयमानमरकतकुट्टिमस्थितशिखंडिमंडलमतिशिशिरचंदनविटपिच्छायानि
षण्णनिद्रायमाणगृहसारसमंतःपुरेणावबालिकाजनप्रस्तुतकंदुकपंचालिकाक्रीडेनानवरतसंवाह्यमानदोलाशिख
रक्वणितहाटकटंकारस्फुरितनाशामुखेन भुजगनिर्मोकशंकितमत्सरह्रियमाणाहारेण सौधशिखरावतीर्णप्रचलितपा
रावतकुलनयनास्थलोत्पलिनीवनशोभितेनैवांतःपुरिकाजनप्रस्तुतनरपतिचरितविडंबनक्रीडेनाश्रमं दुराप ७४

75

रिप्रस्थागतैरवबुद्धभवनशाखाद्विमीफलैरारवंडितांगरासरकारपल्लवैरभिसूतकुब्जवामनकिरातकरतलाच्छिन्नाभिंसूखरागनि
विकिरद्भिःकपिभिराकुलीकृतेनशुकसारिकाप्रकाशितसुरतविश्रंभालापलज्जितावरोधजनेन।प्रसादसोपानसमारोहण
वलितैरवलानांचरणावसक्तैर्मणिमयैर्विभूषणैःपदेपदेरणद्भिःकुलकोकिलैर्हीरशालीकृतकूजितकूजनाभिर्भवनकलहंससमा
लाभिर्दंतवलितांगणोनश्वेतधौतधवलदुकूलोत्तरीयैःकनकवेत्रदंडावलंबिभिःपलितपाकपांडुरमौलिभिराचारमयैरिवमयोरा
मयैरिवविनयमयैरिवमंगलमयैरिवगंभीराकृतिभिःस्वभावधीरैरुत्तीर्णैश्चिभिर्वयःपरिणामेपिजरत्सिंहैरिवापरित्यक्तसत्वावष्टं
भैःकंचुकिभिरधिष्ठितेनसमुपेताभ्यंतरंजलमणिरसनाथमिवकृष्णागुरुधूमपटलैःमनीहारमिवश्यामकुंजरद्युराकरसीकरैःसनिश
मिवतमालवीथिकांधकारैःसबालातपमिवरक्ताशोकैः सततरागरागमिवमुक्ताकलापैःसवर्षासमयमिवधारागृहैःसत
डिल्लतमिवहेममयीभिर्मरकतयष्टिभिःसगृहदेवतमिवशालभंजिकाभिःशिवभवनमिवहारावस्थितदंडपाणिप्रतीहारगणामु

का॰रू॰ त्सुकविग्रहमिव विविधवर्णाश्रमोपजीव्यमानानेकामिनवार्थसंचयमप्सरोगणमिव प्रकरमनोरमारंभमैंद्रिचसकरोदयमिवो
७५ द्धसत्पद्माकरकमलामोदमुष्करकिरणमिव निजलक्ष्मीकृतकमलोपकारं नारकमिव प्रकटयन्ताकोकशोभितं शोणितपुर
मिव बाणयोग्यावासोपेतं पुराणमिव यथाविभागावस्थापितसकलभुवनकोशं पुरीचिंझोदयमिव कृतुकरसहस्रसंवर्द्धितरत्न
त्रयं दिग्गजमिवाविच्छिन्नमहादानसंतानं ब्रह्माण्डमिव सकलजीवलोकव्यवहारकारणोत्पन्नहिरण्यगर्भमीशानबाहुवनमि
व महाभोगिमंडलसहस्राधिष्ठितकोष्ठं महाभारतमिवानंतगीताकर्णनानंदितनरं यदुवंशमिव कुलक्रमागतसूरशीमपुरुषोत्त
मबलपरिपालितं व्याकरणमिव प्रथममध्यमोत्तमपुरुषविभक्तिस्थितानेकादेशकारकाख्यातसंप्रदानक्रियाव्ययप्रपंचसु
स्थितं कुरुक्षेत्रमिव नयांतःप्रविष्टसपक्षभूमिभृत्सहस्रसंकुलं भुवानिरुद्धसमागममिव चित्रलेखादर्शितविचित्रसकलत्रिभुवना
कारं बलियज्ञमिव पुराणपुरुषवामनाधिष्ठितान्यंतरं शुक्लपक्षमिव प्रदोषमिव वितत शशिकिरणकलापधवलांबरविलानं। ७५

ग्र४ न४

76

नरवाहनदत्तचरितमिवांतःसंवर्द्धितप्रियदर्शनराजदारिकागांधर्वदत्तोत्कंठं।महातीर्थमिवसद्योनेकपुरुषप्रायाभिषेकफलं।
प्राग्वंशमिवनानासदपात्रसंकुलंनिशासमयमिवानेकनक्षत्रमालालंकृतंप्रभातसमयमिवपूर्वदिग्भागरागानुमेयमित्रोद
यंगांधिकभवनमिवस्नानद्रव्यविलेपनवर्णकोज्वलं।तांबूलिकभवनमिवकृतलवलीलवंगैलाकंकोलपत्रसंचयंप्रथमवेश्या
समागममिवाविदितहृदयाभिप्रायचेष्टाविकारं।कामुकजनमिवबहुचाटुसंलापसुभाषितरसास्वादहृतजनसहृदंहृतमंड
लमिवदीयमानमणाशनसरुप्रालंकरणकृतलेख्यपत्रसंचयंधर्मारंभमिवाशेषजनमनःप्रह्लादनंमहावनमिवविविधश्वा
पदद्विजोपद्रुतंरामायणमिवकपिकग्रामसमाकुलंमाद्रीकुलमिवनकुलालंकृतंसंगीतभवनमिवानेकस्थानाव्यस्थापितमृदं
गंरघुकुलमिवभरतगुणानंदितंज्योतिषमिवग्रहसोद्धकलाभागनिपुणानारदीयमिवावर्ण्यमानराजधर्मंयंत्रमिवविविध
शहरसलब्धास्वादंमृदुकाव्यमिवानन्यद्विदितस्वभावाभिप्रायावेदकंमहानदीप्रवाहमिवसर्वदुरितापहरंवनमिवनकुस्य

= कादंबरीपुनर्भव्येकाकिल्का शाख्रभेद्यो: २

का॰पू॰ चिन्नांकांस्कलीयं संध्यासमयमिव दृश्यमानचंद्रापीडोदयं। नारायणवक्षःस्थलमिव श्रीरत्नप्रभाभासितदिगंतं वल्

७६ मद्भमिव कांस्वरीरसविशेषवर्णनाकुलमतिं। ग्रहगणमिव प्रासनोपदेशदर्शितभूमंडलं। स्कंदमिव शिखिक्रीडारंभ

वं चलं कुलांगनाप्रचारमिव सर्वदोपजातशंकं वेश्याजनमिवोपचारचतुरं कुर्जनमिवोपगतपरलोकमयमंत्यजजन

मिवागम्यविषयाभिलाषमगम्यविषयाक्रमं पिप्रशंसनीयमंतकमरमिवकृताकृतसुकृतविचारं सुकृतमिवादिम

ध्यावसानकल्याणाकरं तोसरारंभमिव परिस्फुरत्पद्मरागानुरागी। क्रियमाणनिशांतेहि वस्तुनिगणमिव कलापिसना

थश्वेतकेतुशोभितं। भारतसमरमिव कृतवर्मशिखीस्वरवचक्रसंभारभीषणपांचालमिव महाकेतुसहस्राध्यासितं वर्ष

पर्वतसमूहमिवांतःस्थितपरिमाणाद्गोहेमकूटं मेरुद्वारमपि दुःप्रवेशमवंतिविषयगतमपि मागधजनाधिष्ठितं स्फी

तमपि प्रसन्नं सलोकं राजकुलं विवेश। ससंभ्रमोपगतैश्च कृतप्रणामैः प्रतीहारमंडलैरुपदिश्यमानमार्गः सर्वतः प्रचलि ७६

= स्युर्मागधाः स्तुमागधाः वंदिनः स्तुतिपाठकाः

कि२

७७

तेनचपूर्वकृतावस्थानेनदूरपर्यस्तमौलिशिथिलितचूडामणिमरीचिचुंबितवसुधातलेनराजलोकेनप्रत्येकशःप्रतीहा
रनिवेद्यमानेनसादरंप्रणम्यमानःपदेपदेचाभ्यंतरविनिर्गताभिराचारकुशलाभिरंतःपुरवृद्धाभिःक्रियमाणावतरणम
गलोभुवनांतराणीवविविधप्राणिसहस्रसंकुलानिसप्तकक्षांतराण्यतिक्रम्याभ्यंतरावस्थितमनवरतशस्त्रग्रहश्यामि
कालीढकरतलैःकरचरणालोचनवर्जमसितलोहजालकावृतशरीरैरालानस्तंभैरिवगजमदपरिमललोभनिरंतरनिली
नमधुकरपटलजटिलैःकुलक्रमागतैरनन्यसाधारणैरनुरक्तैर्महाप्राणतयातिकर्कशतयाचदानवैरिवानिशायाकारसंभाव्यमा
नपराक्रमैःसर्वतःशरीररक्षाविकारनियुक्तैःपुरुषैःपरिवृतमुभयतोवारविलासिनीभिरनवरतमुद्धूयमानधवलचाम
रसहस्रममलपुलिनतलशोभिसुरकुंजरमिवमंदाकिनीवारिशीहंसधवलशयनतलेनिषण्णंपितरमपश्यत्।आलोकये
तिचप्रतीहारवचनानंतरमवनितलचलितचूडामणिनाशिरसाकृतप्रणाममेह्येहीत्यभिदधानोदूरादेवप्रसारितभु

भि२

तला — पिठ समीपेश् यं२

का॰पू॰ जयुगलं शयनादीर्घभुजो सितमूर्द्धनिरानंदजलाप्लूयमानलोचनः समुद्गतपुलकतया सीव्यन्निवैकीकुर्वन्निव पिबन्निव नेपि
७७ ताविनयावनतमालिलिंग। आलिंगितोन्मुक्तश्च पितुश्चरणापीठलुलितांकृतमूर्द्धा आत्मनोस्थलकरंकवाहिन्यासत्वरमास
नीकृतमपनयेति शनैर्वदन्नथ चरणोनसमुत्सार्य चंद्रापीडः क्षितितल एव निषसाद। अनंतरंतिहितेचासने राज्ञा सुतनि
विशेषमुपगूढो वैशंपायनोऽप्युपसीदत्। मुहूर्त्तमिव च विस्मृतचामरोत्क्षेपनिश्चलानां वारविलासिनीनां साभिलाषैरनि
लचलितकुवलयदलदामदीर्घैरजिह्मतरलतरतारसारैरवलुप्यमान इव दृष्टिपातैः स्थित्वा गच्छ वत्स पुत्रवत्सलां मातरम
भिवाद्य दर्शनलालसां यथाक्रमेण सर्वा जननीर्दर्शनेनानंदयेति विसर्जितः पित्रा सविनयमुत्थाय निवारितपरिजनो वैशं
पायनद्वितीयोऽन्तःपुरप्रवेशयोग्येन परिजनेनोपदिश्यमानवर्त्मान्तःपुरमाययौ। तत्र चैव च कंचुकावच्छन्नशरीरैरनेकयान
संरक्ष्यैरिव विवृद्धोदकर्कशैर्वृद्धैः समंतान्निरुद्धान्तेन वैशिकैरतिप्रशांताकारामिव काषायरक्ताम्बरधारिणीभिः सं ७३

गप१

ध्याभिरिव सकललोकवंचनाभिः प्रलंबस्व याप्याशाभिर्विहितानेककथारसांताभिर्भूतसर्वाः पुराण्याः कथाः कथयं
तीभिः इतिहासान्वाचयंतीभिः [illegible] भिः पुस्तकान्वाचयंतीभिर्धर्मोपदेशान्निवेदयंतीभिर्जरत्प्रव्राजिकाभिर्वि
नोद्यमानामुपरचितश्रीविषयभावेन गृहीतविकटवेषसाधनेन वर्षधरजनेन संसेव्यमानामनवरतविधूयमानवाल
व्यजनकलापामंगनाजनेन च वसनाभरणकुसुमपटवासतांबूलतालवृंतांगरागभृंगारधारिणा मंडलोपविष्टेनोपा
स्यमानां पयोधरयोर्वलेवितमुक्ताफलामचलद्वयमध्यप्रवृत्तगंगाप्रवाहामिव मेदिनीमासन्नदर्पणगयतितमुखचंद्रप्रतिबिं
बामर्कबिंबप्रविष्टशशिमंडलामिव दिवं समुपसृत्य मातरं ननाम। सा तु तं ससंभ्रममुत्थाय सत्यप्याज्ञासंपादनदक्षे
पार्श्ववर्तिनि परिजने स्वयमेव कृतावरासनमहाप्रस्नुतपयोधरस्रवत्पयोबिंदुकुलेन द्रवीभूयेव स्नेहाकुलेन निर्गच्छता वक्ष
स्थलेनांतःस्तुमशतानीव ध्यायंती मूर्ध्न्युपघ्राय तं सुचिरमाश्लिष्टवा। अनंतरं च तथैव कृतपयोवितसमुपचारमाश्लिष्टवे

नर४ न२

78

का॰पू॰ शंपायनात्स्वयमुपविश्य क्षितितले समुपविशंतमाकृष्य बलादनिच्छंतमपि चंद्रापीडमुत्संगमारोपितवती। स
७८ संभ्रमपरिजनोपनीतायामासंद्यामुपविष्टे वैशंपायने चंद्रापीडं पुनः पुनरालिंग्य ललाटदेशे वक्षसि भुजशिखरयो
श्च मुहुर्मुहुः करतलेन परामृशंती विलासवती तमवादीत्। वत्स कठिनहृदयस्ते पिता येनेयमाकृतिरीदृशी त्रिभुवनलाल
नीया क्लेशमतिमहांतमियंतं कालं लंभिता। कथमसि सोढवानतिरीदृशीमिमां गुरुजनयंत्रणाम्। अहो बालस्यापि सतः क
ठोरस्येव महद्धैर्यम्। अहो विगलितशिशुजनक्रीडाकौतुकलाघवमर्भकत्वेऽपि हृदयम्। अहो गुरुजनस्योपरि भक्तिरसाधारणी।
सर्वथा यथा पितुः प्रसादात्समस्ताभिरुपेतो विद्याभिरालोकितोऽस्येवमचिरेणैव कालेनानुरूपाभिर्वधूभिरुपेतमालो
कयिष्यामीत्येवमभिधाय लज्जास्मितावनतमस्य मुखच्छवितिबिंबगर्भे विकचकमलच्छत्रकर्णपल्लवावतंस इव कपो
ले पर्यचुंबदेनं। एवं च तत्रापि नातिचिरमेव स्थित्वा क्रमेण सर्वांतःपुराणि दर्शनेनानंदयामास। निर्गत्य च राजकुलात् ७८

ते ४

रावस्थितमिंद्रायुधमारुह्यत्तथैवतेनराजपुत्रलोकेनानुगम्यमानःशुकनासेनसहमयासीनयामावस्थितविविधमृग
जातसंकरमनेकसहस्रसंबाधमपरिमितजनसमूहसहस्रसंमर्दसंकुलमेकदेशोपविष्टैःसहस्रशोनिबद्धपक्षवाहैर
नेककार्यागतैर्दर्शनोत्सुकैःसमंततोविविधशास्त्रांजनाभ्यासीलितबुद्धिलोचनैश्चीवरकुजनाविनयानुरागिभिर्धर्मप
टैरिवावगुंठितैःशाक्यमुनिशासनपथधौरेयैरक्तपटैःपाशुपतैर्द्विजैश्चदिवानिशमासेव्यमानमभ्यंतरप्रविष्टानांच २
सामंतानांजनेनोपविष्टपुरुषोत्संगादवस्थितछत्रपताकुल्याभिरतिनिविरावस्थाननिर्वैरप्रसुप्तघोररवाभिरपर्यायाभि
सपर्यागताभिःनिश्चलावस्थानप्रचलायिताभिःसौतसहस्यसःकशिराभिराकीर्णांशुकनासगृहद्वारमासाद्यसत्त्वैयप्र
विनैर्द्वारदेशावस्थितैःप्रतीहारपुरुषैरनिवार्यमाणोपिराजकुलइवराजपुत्रोबाह्यांगणएवतुरंगमादवततार।द्वारदे
शावस्थापिततुरंगश्चवैशंपायनमवलंब्यपुरःप्रधावितैःसमुत्सारितपरिजनैस्तथैवप्रतीहारमंडलैरुपदिश्यमा

रु

का॰सू॰
७९

भयः

नमार्गस्तथैवचलितमुकुटकोटिभिर्नरेंद्रवृंदैः सेवासमुपस्थितैरुत्थायोत्थायप्रणम्यमानस्तथैवप्रचंडप्रतीहारहुं
कारैर्मूकीभवत्परिजनानिष्प्रचलितवेत्रलताचकितसामंतचक्रचरणाशतचलितवसुंधरातिकांतरालौ निरीक्ष्
मायास्तथैवनवनवसुधावदातप्रासादसहस्रनिरंतरं द्वितीयमिवराजकुलं शुकनासभवनंविवेश। प्रविश्यचांते
कनरेंद्रसहस्रमध्योपविष्टमपरमिवपितरमुपदर्शितविनयोदूरावनतेनमौलिना शुकनासंववंदे। शुकनासस्तोस
संभ्रममुत्थायानुपृष्ठैर्गौरोच्छ्रितराजलोकः सादरमभिमुखवदनोऽविरलपदः प्रहर्षविस्फारितलोचनागतानंदजलक
णः सहवैशंपायनेनप्रेम्णागाढमालिलिंग। आलिंगितो च शुकनासस्तदारोपनीतमयसयंरत्नासनमवनावेवराजपु
त्रः समुपाविशत्। तदनुवैशंपायनः समुपविष्टे च राजपुत्रे शुकनासवर्जमन्यदखिलमवनिपालचक्रमुत्सृतनि
जासनमवनितलमभजत। स्थित्वाचतूष्णींक्षणमिवशुकनासः समुद्गतप्रीतिपुलकैरंगैरावेद्यमानहृदयह ७९

र्षप्रकर्षेणसमभ्यवदीत्तातचंद्रापीडास्यखलुदेवस्यतारापीडस्यसमग्रविद्यमुपारूढयौवनमालोक्यभवंतंसु
चिराद्भुवनराज्यफलप्राप्तिरुपजातोद्यसंहृष्टाःसर्वेगुरुजनाशिषोऽद्यफलितमनेकजन्मांतरोपात्तमवदातंकर्म
प्रसन्नाःकुलदेवतानांनह्यपुण्यभाजामेवंविधाःशक्तिर्भुवनविस्मयहेतवःपुत्रतांप्रतिपद्यंते।क्वेवयःक्वेयममानु
षीशक्तिःक्वेदमशेषविद्याग्रहणसामर्थ्यमहोधन्याःप्रजायासांभरतभगीरथप्रतिमोभवानुत्पन्नःपालयिता
किंखलुकृतमवदातंकर्मवसुंधरयाययासिभर्तासमासादितोहरिवक्षःस्थलनिवासमसहव्यसनिनीहतारव
सुलक्ष्मीर्याविग्रहवतीनोपसर्पतिभवंतंसर्वथा कल्पकोटीर्मेसवराहदंष्ट्रावलयेनवहबाहुनावसुंधराभारंसह
पित्रेत्यभिधायवस्त्रस्वयंमाल्याभरणांबरसनकुसुमांगरागादिभिरभ्यर्च्यविसर्जयांचकार।विसर्जितश्चोत्थायांतःपुरंप्र
विश्यदृष्ट्वावैशंपायनमातरंमनोरमामभिवंद्यनिर्गत्यसमारुह्येंद्रायुधंपित्रास्वयंकल्पितंप्रतिष्ठद्दरकमिवराजकु

१५२

तस्यद्वारावस्थापितसलिलपूर्णकलशमाबद्धरुचिरवंदनमालमुल्लसितसितपताकासहस्रंमंगल्याहतमं
गलतूर्यरवपरिपूरितदिगंतरमुपरचितविकचकमलकुसुमप्रकरमविरहृतामिकायमुज्ज्वलविविक्तपरिजन
मुपयाहित्राशेषगृहप्रवेशमंगलंकुमारोऽनुगवनंजगाम। गत्वाचश्रीमंडपावस्थितेशयनेमुहूर्त्तमुपविश्यसहतेन
राजपुत्रलोकेनाभिषेकादिकमशनावसानमकरोद्दिवसविधिं। अभ्यंतरेचतस्यशयनीयगृहएवैशंपायनस्यावस्था
नमकल्पयत्। एवंप्रायेणाचास्योदंतेनतदहःपरिणातिमुपययौ। ततःक्रमेणानन्तलोहितरत्नांदिवसश्रियःपद्मराग
नूपुरमिवरथ्यमापिहितरंध्रेरविमंडलेमुकुरपात्रपपात। सलिलप्रवाहइवरथचक्रमार्गानुसारेणादिवसकरस्य
वासरालोकःप्रतीचींककुभमगात्। अभिनवपल्लवलोहिततलेनकरेणाधोमुखप्रस्तेनेवदिवसकरबिंबेनवासरःके
मच्छरागमपरोक्षममार्जे। कमलिनीपरिमलपरिचयागतालिमालाकुलितकंठंकोलपाशैरिवचक्रवाकमिथुनमाकृ ८०

कुमेर

दिव

ब्यमाराणां विजृम्भे करपुटैरादिवसान्तमापीतमरविंदमधुरसमिव रक्तातपच्छलेनोद्गगनगमनखेदाद्दिवसकर
बिंबे वामाकामेरा च्चंघतीचाकर्णपूर रक्तोत्पलेलोकांतरमुपगते भगवति गभस्तिमालिनि समुच्छसितायाम्
परतलतडागविकचकमलिन्यां संध्यायां कृष्णायुरुपंकपत्रलताश्चिवं तिमिरलेखासु स्फुरंतीषु दिशां मुखेषु लि
कुलमलिनेन कुवलयवनेनेव रक्तकमलाकरेण तिमिरनिकरेणेंद्वमार्यमाणो संध्यारागे कमलिनी निपीतमानपञ्जु
न्मूलयित्वं मधुकारपल्लवेष्वविविशत्सु रक्तकमलोदराणि मधुकरकुलेषु शनैः शनैश्च निशाविलासिनीपुरवावतंसपल्ल
वेगलितसंध्याशागे दिक्तिविशिष्टेषु संध्यादेवतार्चनबलिपिंडेषु शिखरदेशलग्नतिमिरास्त्वनारहृदसमसरारखपिंसर
शविश्रिप्तास्त्ववमयूरयष्टिषु गवाक्षविवरनिलानेषु प्रासादतलहर्म्यकपोतपालिकेषु पारावतेषु दिमानविलासिनी संवाह
ननिश्चलकांचनपीठसुखकोप्तुनद्धांश्च तेतःपुरिकासु भवनसहकारशाखावलंबितपंजरेषु विगनालापेषु शुकसारि

द्रे ~ छिवन्ना रागणो २

का॰ सू॰ कानिवहेषु संगीतकविरामविश्रांतरवासु सुप्तसारसासु वापीषु युवतिनूपुररवोपशमनिभृतेषु भवनकल
८२ हंसेषु बध्यमानकर्णशंखचामरनक्षत्रमालामंडनेषु मधुकरकुलसंछन्नकपोलभित्तिषु मत्तवारणेषु प्रदीप्यमाने
षु राजवल्लभतुरंगममंदुराप्रदीपेषु प्रविशंतीषु प्रथमयामकुंजरघटासु ऊनरा[illegible]यनेषु निष्क्रामत्सु पुरोहितेषु वि
सर्जितराजलोकविरलयाङ्गनेषु विस्तारितेष्विव राजकुलकक्षांतरेषु प्रज्वलितदीपिकासहस्रप्रतिबिंबचुंबितेषु मुक्त
तविकचचंपकदलोपहारेष्विव मणिभूमिकुट्टिमेषु निपतितदीपालोकासु रविविरहार्तेन नलिनीविनोदनागतबाल
तपास्विव भवनदीर्घिकासु निद्रालसेषु पंजरकेसरिषु समारोपितकार्मुकैरहीनसायकैर्यामिकैः संवीतैः पुरप्रविष्टैर्म
करकेतावधवतंसपल्लवेष्विव सरागेषु कर्णोत्क्षिप्यमाणेषु सुरतदूतीवचनेषु स्फुर्यकांतमणिष्विव संक्रांतानलेषु ज्वलत्सु
मानिनीनां शोकविधुरेषु हृदयेषु प्रवृत्ते प्रदोषसमये चंद्रापीडः प्रज्वलितदीपिकाचक्रवालपरिवारः स्वरगात्स्वामेव राज ८२

नी॰

कुलंगत्वापितुःसमीपेमुहूर्त्तंस्थित्वाइच्छाचविलासवतीमामत्यस्वभवनमनेकरत्नप्रभाशबलमुरगराजफण
मंडलमिवत्स्पीकेषःशयनतलमधिशिश्येअमात्यायांचनिशीथिन्यांसमुत्थायसमनुज्ञातःपित्राअभिनवमृगयाकौ
तुकादाकृष्यमाणहृदयोभगवत्यनुदितएवसहस्ररश्मावाकृष्टचेतसुरगमयतोवाल्लेयप्रमाणानोकर्षड्डिण्डिमीकरस्थं
८२ रवलाभिःकौलेयकानुबंधरचव्याघ्रचर्मशबलवसनकंचुकधारिभिरनेकवर्णपटचीरिकोट्टबद्धमौलिभिरुग्र चित्तश्म
श्रुभिरुन्मुखैरेककर्णावसक्तरुमतालीपुटैराबद्धनिबिडकक्षैरनवरतश्रमोपचितोरुपिंडकैःकोदंडपाणिभिःश्वपो
षकैरनवरतकृतकोलाहलैःअभावाड्डिर्हेमुरगोकृत [illegible] गमनोत्साहोबहुगजतुरगपदातिपरिवृतोवनंय
यौ।तत्रचकर्णांतावकृष्टविकचकुवलयपलाशकोटिभिर्मर्दहैर्मेदकलकलसमुत्कुंभमिन्त्तिभिदुरैश्चनाराचैश्चापटंकाररवम
यचकितवनदेवताद्राक्षिणोवाञ्छितोवनवराहान्केसरिणःशरभांश्चामराननेककुरंगकोटीसहस्रशोजघान।अन्यांश्च
तुरगै २ वनं २

तरा४

का॰सू॰ जीवतएवमहाप्राणतयास्फुरतोजस्राहासमारूढेचमध्यमह्नःसवितरिवनान्मानोस्थितेनेवश्रमसलिलबिंदुवर्षम
८२ नवरतमुक्तामुक्तघुर्घुरश्वासविघट्टनैःखणखणायितखरखलीनेनश्रमशिथिलमुखविगलितफेनिलरुधिरलवेनप
र्याणपट्टकानुसारोच्छ्वसितफेनराजिनाकर्णावतंसीकृतमुकुलकुसुमशबलमलिपटलझंकारमुखरखवनगमनचिह्नप
ल्लवस्तबकेनमुखकृतेनमुखेनोह्यमानःसमुत्फुल्लखेदतयापीतरांह्रीकृतमेडकेनमृगरुधिरलवशबलेनचारवाणेनद्विगु
णतरमुपजनितकान्तिरनेकतुरगानुसारसंभ्रमपरिभ्रष्टछत्रतयाछत्रीकृतेननवपल्लवेननिवार्यमाणातपोविविधव
नलताकुसुमरेणुधूसरोवसंतइवविग्रहवानश्वखुररजोमलिनलतागमिव्यसनावदातस्वेदजलेखोद्भिन्नविच्छिन्नेन
पदातिजनेनस्पृष्टश्रीरुतपुरोभागःशंजविन्तुरंगमाधिरूढैरल्पावशिष्टैःसहराजपुत्रैरेवंमृगयापतिरिवंवराहएवंवनमहि
षःएवंभारमेवंहरिणाइतिनमेवंमृगयापतनंतंमुखारयन्नेवमवनमाजगाम।अवतीर्यचतुरंगमात्ससंभ्रमप्रधावितप ८२

भारि४

83

रिजनोपनीते समुपविश्यासने वारबाणमवतार्य यथनीयचाशेषं तुरंगाधिरोहणोचितं वेषपरिग्रहं मितजनः प्रच
लिततालवृन्तपवनापनीयमानश्रमो मुहूर्तं विश्राम्य विश्रम्य च मणिरजतकनककलशशतसनाथां मंतर्विन्य
स्तकांचनपीठां स्नानभूमिमगात्। निर्वर्तिताभिषेकव्यापारस्य च विविक्तवसनपरिमृष्टवपुषः स्वच्छदुकूलपल्ल
वाकलितमौलेर्गृहीतनवाससः कृतदेवतार्चनस्याङ्गरागभूमौ समुपविष्टस्य राज्ञा विसर्जिता महाप्रतीहारी हारि विस्थिता
राजकुलपरिचारिकाः कुलवर्द्धनासनाथाश्च विलासवतीदास्यः सर्वान्तःपुरप्रेषिताश्चान्तःपुरपरि पटकेलैविनिहि
तानि विविधान्याभरणानि माल्यान्यङ्गरागान्वासांसि चादाय पुरस्तस्योपतस्थुः। उपनिन्युश्च। यथाक्रममादा
यताभ्यः प्रथममेव स्वयमुपलिप्य वैशंपायनमुपरचिताङ्गरागो दत्त्वा च समीपवर्तिभ्यो यथार्हमाभरणवसनाङ्गरागकु
सुमानि विविधमणिभाजनसहस्रसारं शारदमम्बरतलमिव स्फुरितातारगणमाहारमण्डपमगच्छत्। तत्र च वहिर्युपी ह

त म चारिकाः

का॰दू॰ नकुथासनोपविष्टः समीपोपविष्टेन तत्क्षणोपदर्शितेन परेण वैशंपायनेन यथार्हभूमिभागोपवेशितेन राजपुत्रलो
केनैरमस्मै दीयताम् इदमस्मै दीयताम् इति प्रसादविशेषदर्शनसंवर्द्धितसेवारसेनोपचारविधिमकरोत् । उपस्पृश्य
८३ चगृहीततांबूलस्तस्मिन्मुहूर्तमिवस्थित्वा इंद्रायुधसमीपमगमत् । तत्रचानुपविष्टएव तत्क्षणोपवर्णनशायात्ता
पाः कथाः कृत्वा सत्वराज्ञाप्रतीक्षणोन्मुखे पार्श्ववर्तिनि परिजने तत्क्षणात्स्वहस्तेन स्वयमेवैकेन मुखस्य पुरो यवस
माकीर्य निर्गत्य राजकुलमयासीत् । तेनैव च क्रमेण गत्वा लोक्य राजानमागत्य निशामनैषीत् । अपरेद्युश्च प्रभा
तसमय एव सर्वतः पुराधिकृतैः मतानि पतेः परमसंमतमनुमार्गागतया प्रथमे वयसि वर्तमानया राजकुल
संवासप्रगल्भया पत्र्याकृतिविनयया किंचिदुपारूढयौवनया शक्रगोपकालोहितरागेणांशुकेन रचितावगुंठ
नया सनाथातपत्रेव पूर्वया ककुभा अत्यच्छलितमनःशिलाहरविशीर्णेनांगलावण्यप्रभाप्रवाहेणाप्लुतरसनदी ८३

स्फुरितोष्ठं मदनमाधूरयंत्या ज्योत्स्नयेव राहुत्राससमयादपहाय रत्ननिकरमंडलोगाम वतीर्णया राजकुलदेवतयेव मू
र्त्तिमत्या क्वणितमणिनूपुरकलित चरणयुगलया कूजत्कलहंससंकुलितकमलयेव कमलिन्या मरालैर्हे
ममेखलाकलापकलितजघनस्थलया नातिनिर्भरोद्भिन्नपयोधरया मंदमंदभुजलता विक्षेपप्रेंखितनखमयूख
कुलेन चारामिरिव लावण्यरसमनवरतं क्षरंत्या दिङ्मुखविसर्पिणा हारलतानां रश्मिजालेन निमग्नशरीरतया क्षीरसा
गरोन्मग्नवदनयेव लक्ष्म्या बहलतांबूलकृष्णिकांधकारिताधरलेखया समसुवृत्ततुंगनासिकया विकसितपुंडरीकध
वललोचनया मणिकुंडलमकरपत्रभंगकोटिकिरणातपाहतकपोलया सकर्णपूरदर्पणमिवमुखमुद्वहंत्या पर्युषितधू
सरचंदनरसतिलकालंकृतललाटपट्टया मुक्ताफलजालालंकारया राजेयराज्ञलक्ष्मीतोपक्षाहितांतरागया नव
वनलेखयेव कोमलतनुलतया जयेव सुप्रतिष्ठितचरणया मरवशालयेव वेदिमध्यया मेरुवनलतयेव कनकपत्रालं

84

का॰ पू॰ कृतया महत्तु मावाकारयानुगम्यमानं कन्यया कैलासनामानं कंचुकिनमायांतमपश्यत्। स कृतप्रणामः समुप
८७ सृत्य क्षितितलनिहितदक्षिणकरो विज्ञापयामास। कुमार महादेवी विलासवती समाज्ञापयति। अयं खलु कन्यका महाराजेन
पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती वंदीजनेन सहानीयांतःपुरपरि
चारिकामध्यमुपनीता सा मया विगतनाथा राजदुहितेति जातस्नेहया दुहितृनिर्विशेषमियंतं कालमुपला
लिता संवर्द्धिता। तदियमिदानीमुचिता भवतस्तांबूलकरंकवाहिनीति कृत्वा मया प्रेषिता। न चास्यामायुष्मता परिज
नसामान्यदृष्टिना भवितव्यं बालेव लालनीया स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया शिष्येव द्रष्टव्या सुहृदिव सर्व
विश्रंभेष्वभ्यंतरीकरणीया। दीर्घकालसंवर्द्धितस्नेहतया स्वसुतायामिव हृदयमस्यामस्ति मे बलवानस्यां पक्षपातो
महाभिजनराजवंशप्रसूता चार्हतीयमेवं विधानि कर्माणि नियतं च स्वयमेवेयमतिविनीततया कतिपयैरेव दिवसैः कुमा ८७

85

रंमाराया यिष्यति।केवलमतिचिरकालोपचिताबलवतीमेप्रेमप्रवृत्तिरस्यामविदितशीलेयमस्याःकुमारइतिसंदि
ह्यते।सर्वथातथाकल्याणिनाद्रष्टयितव्यंयथेयमतिचिरंभृत्यापरिचारिकातेभवतीत्यभिधायविरतवचसिकैलासे
कृताभिज्ञातप्रणामांपत्रलेखांमतिमियलोचनेनसुचिरमालोक्यचंद्रापीडोयथाज्ञापयत्यंबेत्येवमुक्त्वाकंचुकिनंप्रेषया
मास।पत्रलेखातुततःप्रभृतिदर्शनेनैवसमुपजातसेवारसातदिवानरात्रौनसुप्तस्यनासीनस्यनोत्थितस्यनभ्रम
तो।नराजकुलगतस्यछायेवराजसूनोःपार्श्वमुमोच।चंद्रापीडस्यापितस्यांदर्शनात्प्रारभ्यप्रतिक्षणमुपचीयमानामह
तीप्रीतिरासीत्।अभ्यधिकंप्रतिदिवसमस्याःप्रसादमकरोत्।आत्महृदयादव्यतिरिक्तामिवचैनांसर्वविश्रंभेष्वमन्यत।एव
मतिक्रामत्सुकेषुचिद्दिवसेषुराजाचंद्रापीडस्ययौवराज्याभिषेकंचिकीर्षुःप्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश।
समुपस्थितयौवराज्याभिषेकंचतंकदाचिद्दर्शनार्थमागतमारूढविनयमपिविनीततरमिच्छन्कर्तुंशुकनासःसविस्तरमुवाच॥

प॰ ९४

का॰सू॰ तात चंद्रापीड विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति केवलं च निसर्गत एवाभानुभेद्यमरत्ना
८५ लोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनंतमोयौवनप्रभवमपरिणामोपशमोदारुणोलक्ष्मीमदः।कष्टमनंजनवर्तिसा
ध्यमपरमैश्वर्यतिमिरांधत्वं।अशिशिरोपचारहार्योऽतितीव्रोदर्पदाहज्वरोष्मासततममूलमंत्रगम्योविषमोविष
यविषास्वादमोहोनित्यमस्नानशौचवध्योबलवान्रागमलावलेपोजस्रमक्षपावसानप्रबोधाघोराराज्यसुखसंनिपात
निद्राभवतीत्यतोविस्तरेणाभिधीयसे।गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वंचेतिमहतीखल्व
नर्थपरंपरा।सर्वाविनयानामेकैकमप्येषामायतनंकिमुतसमवायः।यौवनारंभेचप्रायःशास्त्रजलप्रक्षालननि
र्मलापिकालुष्यमुपयातिबुद्धिरनुज्झितधवलतापिसरागैवभवतियूनांदृष्टिः।अपहरतिचवात्येवशुष्कपत्रंसमु
द्भूतरजोभ्रांतिरतिदूरमात्मेच्छयापुरुषंप्रकृतिरिंद्रियहरिणहारिणीचसततमतिदुरंतेयमुपभोगमृगतृष्णिका।नव ८५

यौवनसमये

का

यौवनकषायितात्मनोम्भसलिलानीवतान्येवविषयस्वरूपाण्यास्वाद्यमानानिमधुरतराण्यापतंतिमनसोनाशाय
तिचदिङ्मोहइवो[illegible]न्मार्गप्रवर्त्तकःपुरुषमत्यासंगोविषयेषुभवादृशाएवभवंतिभाजनान्युपदेशानामपगतमलेहिमनसि
स्फटिकमणाविवरजनिकरगभस्तयोविशंतिसुखमुपदेशगुणाः।गुरुवचनममलमपिसलिलमिवमहदुपजनयति
श्रवणस्थितंशूलमभव्यस्येतरस्यचकरिणइवशंखाभरणमाननशोभासमुदयमधिकतरमुपजनयति।हरतिसक
लमतिमलिनमपिदोषजातमुपदेशःप्रशमहेतुःपरिणामइवपलितरूपेणशिरसिजजालममलीकुर्वन्गुणरूपे
णतदेवपरिणमति।अयमेवचानास्वादितविषयरसस्यतेकालउपदेशस्यकुसुमशरप्रहारजर्जरितेहिहृदयेजलमिवगल
त्युपदिष्टं।अकारणंचभवतिदुःप्रकृतेरन्वयःश्रुतंवाविनयस्यचंदनप्रभवोनदहतिकिमनलः।किंवाप्रशमहेतुनापिनप्र
चंडतरीभवतिवडवानलोवारिणा।गुरूपदेशश्चनामपुरुषाणामखिलमलप्रक्षालनक्षमम[illegible]जलंस्नानं।अनु

मयर शर३

का॰ सू॰ पजातपलितादिवैरूप्यमजरंवृद्धत्वमनारोपितमेदोदोषंगुरुकरणमसुवर्णविरचनमग्राम्यंकर्णाभरणमतीतज्योति
८६ रालोकोनोद्वेगकरःप्रजागरोविशेषेणराज्ञांविरलाहितेषामुपदेष्टारःप्रतिशब्दकइवराजवचनमनुगच्छतिजनोभया
दुद्दाममदश्वयथुस्थगितकर्णविवराश्चोपदिश्यमानमपितेनशृण्वंति।शृण्वंतोपिचगजनिमीलितेनावधीरयंतःखेद
यंतिहितोपदेशदायिनोगुरूनहंकारदाहज्वरमूर्च्छांधकारिताविह्वलाहिराजप्रकृतिरलीकाभिमानोन्मादकारीणिधनानि
राज्यविषविकारतंद्राप्रदाराजलक्ष्मीरालोकयतुतावत्कल्याणाभिनिवेशीलक्ष्मीमेवप्रथममियंहिसुभटखड्गमंडलोत्पलव
नविभ्रमभ्रमरीलक्ष्मीःक्षीरसागरात्पारिजातपल्लवेभ्योरागमिंदुशकलादेकांतवक्रतामुच्चैःश्रवसश्चंचलतांका
लकूटान्मोहनशक्तिंमदिरायामदंकौस्तुभमणेरतिनैष्ठुर्यमित्येतानिसहवासपरिचयवशाद्विरहविनोदचिह्ना
निगृहीत्वैवोद्गता।नह्येवंविधमपरमपरिचितमिहजगतिकिंचिदस्तियथेयमनार्यालब्धापिखलुदुःखेनपरिपाल्यते ८६

१

यतै २

दृढगुणपाशसंदाननिस्पंदीकृतापिनश्यति।उद्दामदर्पभटसहस्रोल्लासितासिलतापंजरविधृताप्यपक्रामति।मदजलदु
र्दिनांधकारगजघटितघनघटापरिपालितापिप्रपलायते।नपरिचयंरक्षति।नाभिजनमीक्षते।नरूपमालोकयते।नकुलक्रम
मनुवर्तते।नशीलंपश्यति।नवैदग्ध्यंगणयति।नश्रुतमाकर्णयति।नधर्ममनुरुध्यते।नत्यागमाद्रियते।नविशेषज्ञतांविचारयति
नाचारंपालयति।नसत्यमनुबुध्यते।नलक्षणंप्रमाणीकरोति।गंधर्वनगरलेखेवपश्यतएवनश्यति।अद्याप्यारूढमंदरपरिवर्ता
वर्तभ्रांतिजनितसंस्कारेवपरिभ्रमति।कमलिनीसंचरणव्यतिकरलग्ननलिननालकंटकेवनक्वचिन्निर्भरमाबध्नातिपदं।अति श्रा ४
प्रयत्नविधृतापिपरमेश्वरगृहेषुविविधगंधगजगंडमधुपानमत्तेवपरिस्खलति।पारुष्यमिवोपशिक्षितुमसिधारासुनिवसति।वि
श्वरूपत्वमिवग्रहीतुमाश्रितानारायणमप्रत्ययबहुलाचदिवसांतकमलमिवसमुपचितमूलदंडकोशमंडलमपिमुंचतिभूभुजं।
लतेवविटपकानध्यारोहति।गंगेववसुजनन्यपितरंगबुद्बुदचंचला।दिवसकरगतिरिवप्रकटितविविधसंक्रांतिः।पातालगुहेवतं

वसा २ ल २

8१

का॰सू॰ मोबहुला हिडंबेवभीमसाहसैकहार्यहृदया प्रावृडिवाचिरद्युतिधारिणी दुष्टपिशाचीवदर्शितानेकपुरुषोच्छ्राया स्वल्पसत्व
८७ मुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिंगति जनं। गुणवंतमपवित्रमिव न स्पृशति। उदारसत्वममंगलमिव न बहुमन्य
ते। सुजनमनिमित्त मिव न पश्यति। अभिजातमहिमिव लंघयति। शूरं कंटकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। वि
नीतं पातकिनमिव नोपसर्पति। मनस्विनमुन्मत्तमिवोपहसति परस्परविरुद्धं चेंद्रजालमिव दर्शयंती प्रकटयति जगति निजं चरि
तं। तथा हि। सततमूष्माणमारोपयंत्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। तोयराशिसंभवापि तृ
ष्णां वर्द्धयति। ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति। बलोपचयमाहरंत्यपि लघिमानमापादयति। अमृतसहोदरापि कटुविपा क २
का। विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। रेणुमयीव स्वच्छमपि कलुषीकरोति। यथा यथा चपलेयं दीप्यते तथा
तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। तथा हीयं संवर्द्धनवारिधारा तृष्णाविषवल्लीनां। परामर्षधूमलेखास ८७

व्याधगीतिरिंद्रियमृगाणां

88

दुरितचित्राणां।विभ्रमशय्या मोहदीर्घनिद्राणां।निवासजीर्णवलभी धनमदपिशाचिकानां।तिमिरोद्गतिः शास्त्रदृष्टीनां।पुरःपताका सर्वा
विनयानां।उत्पत्तिनिम्नगा क्रोधावेगग्राहाणां।आपानभूमिर्विषयमधूनां।संगीतशाला भ्रूविकारनाट्यानां।आवासदरी दोषाशीविषा
णां।उत्सारणवेत्रलता सत्पुरुषव्यवहाराणां।अकालप्रावृड्गुणकलहंसकानां।विसर्पणभूमिर्लोकापवादविस्फोटकानां।प्रस्ताव
ना कपटनाटकस्य।कदलिका कामकरिणः।वध्यशाला साधुभावस्य।राहुजिह्वा धर्मेन्दुमण्डलस्य।न हि तं पश्यामि यो ह्यपरिचितयानया न नि
र्भरमुपगूढो यो वा न विप्रलब्धः।नियतमियमालेख्यगतापि चलति।पुस्तकमय्यपीन्द्रजालमाचरति।उत्कीर्णापि विप्रलभते।श्रुताप्यभि
संधत्ते।चिन्तितापि वञ्चयति।एवंविधया चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः।सर्वाविनयाधि
ष्ठानतां च गच्छन्ति।तथाहि।अभिषेकसमय एव चैषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्।अग्निकार्यधूमेनेव मलिनीभवति हृदयम्।पुरो
हितकुशाग्रसन्मार्जनीभिरिवापनीयते क्षान्तिः।उष्णीषपट्टबन्धेनेवाच्छाद्यते जरागमनस्मरणम्।आतपत्रमण्डलेनेवापवार्यते पर

तितपचाघ्य १

का॰सू॰ लोकदर्शनं। चामरपवनैरिवापह्रियते सत्यवादिता वेत्रदंडैरिवोत्सार्यंते गुणाः। जयशब्दकलकलैरिव तिरस्क्रियंते साधुवादाः।
८८ ध्वजपटपल्लवैरिव परामृश्यते यशः तथा हि केचिच्छ्रमवशशिथिलशकुनिगलपुटचपलाभिः खद्योतोन्मेषमुहूर्तमनोहराभिर्मन
स्विजनगर्हिताभिः संपद्भिः प्रलोभ्यमाना धनलवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन दुष्टासृजेव रागावेशेन बाध्य
माना विविधविषयग्रासलालसैः पंचभिरप्यनेकसहस्रसंख्यैरिवेंद्रियैरायास्यमानाः प्रकृतिचंचलतया लब्धप्रसरेणैकेनापि
शतसहस्रतामिवोपगतेन मनसाकुलीक्रियमाणा विह्वलतामुपयांति। ग्रहैरिव गृह्यंते भूतैरिवाविश्यंते सत्त्वैरिवावष्टभ्यंते। वायुनेव
विडंब्यंते पिशाचैरिव ग्रस्यंते मदनशरैर्मर्माभिहता इव मुखभंगसहस्राणि कुर्वंते। धनोष्मणा पच्यमाना इव विचेष्टंते। गाढप्रहारा
हता इवांगानि न धारयंति। कुलीरा इव तिर्यक्परिभ्रमंति। अधर्मभग्नगतयः पंगव इव परेण संचार्यंते। मृषावादविषविपाकसंजा
तमुखरोगा इवातिकृच्छ्रेण जल्पंति। सप्तच्छदतरव इव कुसुमरजोविकारैरासन्नवर्तिनां शिरःशूलमुत्पादयंति। आसन्नमृत्यव इव बं ८८

धुजनमपिनाभिजानंति।उत्कुपितलोचनाइवतेजस्विनोनेक्षंतेकालदष्टाइवमहामंत्रैरपिनप्रतिबुध्यंते।जातुषाइवसोष्माणं
नसहंते।दुष्टवारणाइवमहामानस्तंभनिश्चलीकृतानगृह्णंत्युपदेशं।तृष्णाविषमूर्छिताःकनकमयमिवसर्वंपश्यंति।इषवइ
वपानवर्द्धिततैक्ष्ण्याःपरप्रेरिताविनाशयंतिदूरस्थितान्यपिदंडविक्षेपैर्महाकुलानिशातयंति।अकालकुसुमप्रसवाइवमनोहरा
कृतयोपिलोकविनाशहेतवः।श्मशानाग्नयइवातिरौद्रभूतयः।तैमिरिकाइवादूरदर्शिनः।उपसृष्टाइवक्षुद्राधिष्ठितभवनाः।श्रूयमा
णाअपिप्रेतपटहाइवोद्वेजयंतिचिंत्यमानाअपिमहापातकाध्यवसायाइवो[illegible]पद्रवमुपजनयंत्यनुदिवसमापूर्यमाणाः
पापेनेवाध्मातमूर्तयोभवंतितदवस्थाश्चव्यसनशतशरव्यतामुपगतावल्मीकतृणाग्रावस्थिताजलबिंदवइवपतितमप्यात्मानंनावगच्छंत्यप
रेतुस्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रैरास्थाननलिनीबकैर्द्यूतंविनोदइतिपरदाराभिगमनंवैदग्ध्यमितिमृगयाश्रमइतिपानंविलास
इतिप्रमत्ततांशौर्यमितिस्वदारपरित्यागमव्यसनितेतिगुरुवचनावधीरणमपरप्रणेयत्वमितिअजितभृत्यतांसुखोपसेव्यत्वमिति

89

का॰सू॰ ८८ नृत्तगीतवाद्यवेश्याभिरसिकैःरसिकोतेति महापराधावकर्णनं महानुभावतेति परिभवसहत्वं क्षमेति स्वच्छंदता प्रभुत्वमिति देवा
वमाननं महासत्वत्तेति वंदिजनख्यातिर्यश इति तरलतो त्साह इति अविशेषज्ञता पक्षपातित्वमिति दोषानपि गुणपक्षमध्या
रोपयद्भिरंतः स्वयमपि विहसद्भिः प्रतारणाकुशलैर्धूर्तैरमानुषलोकोचिताभिः स्तुतिभिः प्रतार्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया
तथैवेत्यात्मन्यारोपितालीकाभिमाना मर्त्यधर्माणोपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचि
तचेष्टानुभावाः सर्वजनस्योपहास्यता मुपयांत्यात्मविडंबनां चानुजीविना जनेन क्रियमाणामभिनंदंति। मनसा देवता
ध्यारोपणाप्रतारणादसद्भूतसंभावनोपहताश्चांतःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं संभावयंति त्वगंतरिततृतीयलोचनं स्वलला
टमाशंकंते। दर्शनप्रदानमप्यनुग्रहं गणयंति दृष्टिपातमप्युपकारपक्षे स्थापयंति। संभाषणमपि संविभागमध्ये कुर्वंति। आज्ञा
मपि वरप्रदानं मन्यंते। स्पर्शमपि पावनमाकलयंति मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमंति देवताभ्यो न पूजयंति द्विजातीन्न मा ८८

नयंतिमान्यान्नार्चयंत्यर्चनीयान्नाभिवादयंत्यभिवादनार्हान्नाभ्युत्तिष्ठंतिगुरून् । अनर्थकायासांतरितविषयोपभोगसुख
मित्युपहसंतिविद्वज्जनंजरावैक्लव्यप्रलपितमितिपश्यंतिवृद्धजनोपदेशंआत्मप्रज्ञापरिभवइत्यसूयंतिसचिवोपदेशायकुप्यंति
हितवादिनेसर्वथातमभिनंदंतितमालपंतितंपार्श्वेकुर्वंतितंसंवर्द्धयंतितेनसहसुखमवतिष्ठंतेतस्मैददतितंमित्रतामुपजनयंतितस्य
वचनंशृण्वंतितत्रवर्षंतितंबहुमन्यंतेतमाप्ततामा पादयंतियोहर्निशमनवरतमुपरचितांजलिरधिदैवतमिवविगतान्यक
१० र्त्तव्यःस्तौतियोवामाहात्म्यमुद्भावयतिकिंवातेषांसांप्रतंयेषामतिनृशंसप्रायोपदेशनिर्घृणंकौटिल्यशास्त्रंप्रमाणं । अभिचार
क्रियाक्रूरैकप्रकृतयःपुरोधसोगुरवः । पराभिसंधानपरामंत्रिणउपदेष्टारःनरपतिसहस्रभुक्तोज्झितायांलक्ष्म्यामासक्तिर्मारणात्म
केषुशास्त्रेष्वभियोगःसहजप्रेमार्द्रहृदयानुरक्ताभ्रातरउच्छेद्यास्तदेवंप्रायेतिकुटिलकष्टचेष्टासहस्रदारुणेराज्यतंत्रेस्मिन्महामो
हकारिणिचयौवनेकुमारतथाप्रयतेथायथानोपहस्यसेजनैर्ननिंद्यसेसाधुभिर्नधिक्क्रियसेगुरुभिर्नोपालभ्यसेसुहृद्भिर्नशोच्य

का॰सू॰ से सुहृद्भिर्यथा च न प्रकाश्यसे विटैर्न प्रतार्यसे कुशलैर्नास्वाद्यसे भुजंगैर्नावलुप्यसे सेवकवृकैर्न वंच्यसे धूर्तैर्न प्रलोभ्यसे वनि
८९ ताभिर्न विडंब्यसे लक्ष्म्या न नर्त्यसे मदेन नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विषयैर्न विकृष्यसे रागेण नापहृयसे सुखेन कामं भवा
न्प्रकृत्यैव धीरः पित्रा च महता प्रयत्नेन समारोपितसंस्कारस्तरलहृदयमप्रतिबुद्धं च मदयंति धनानि तथापि भवद्गुणसंतो
षो मामेवं मुखरीकृतवानिदमेव च पुनः पुनरभिधीयसे विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रय
त्नवंतमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्या
भिषेकमंगलं कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरमवनमय द्विषतां शिरांसि उन्नमय बंधुवर्गमभिषेकानंतरं प्रारब्धदिग्विजयः
परिभ्रमन्विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुंधरामयं च ते कालः प्रतापमारोपयितुमारूढप्रतापो हि राजा
त्रैलोक्यदर्शी सिद्धादेशो भवतीत्येतावदभिधायोपशशाम। उपशांतवचसि शुकनासे चंद्रापीडस्ताभिरुपदेशवाग्भिः प्र ८०

क्र—

क्षालितइवोन्मीलितइवस्वच्छीकृतइवनिर्मृष्टइवाभिषिक्तइवालिप्तइवालंकृतइवपवित्रीकृतइवोद्भासितइवप्रीतहृदयोमुहूर्तं
स्थित्वास्वभवनमाजगाम।ततःकतिपयदिवसापगमेचराजास्वयमुत्क्षिप्तमंगलकलशःसहशुकनासेनपुण्येहनिपुरोधसा
संपादिताशेषराज्याभिषेकमंगलमनेकनरपतिसहस्रपरिवृतःसर्वेभ्यस्तीर्थेभ्यःसर्वाभ्योनदीभ्यःसर्वेभ्यश्चसागरेभ्यःसमाहृ
9) तेनसर्वौषधीभिःसर्वफलैःसर्वमृद्भिःसर्वरत्नैश्चपरिगृहीतेनानंदवाष्पजलमिश्रेणमंगलपूतेनवारिणासुतमभिषिषेच।अभि
षेकसलिलार्द्रदेहंचतंलतेवनिजपादपंपादपांतरमसुंचत्यपितारापीडंतत्क्षणमेवसंचक्रामराजलक्ष्मीः।अनंतरमखिलांतः
पुरपरिवृतयाप्रेमार्द्रहृदययाविलासवत्यास्वयमापादतलादामोदिनाचंद्रातपधवलेनचंदनेनानुलिप्तमूर्तिरभिनवविकसि
तकुसुमकृतशेखरोगोरोचनाकुरितदेहोदूर्वाप्रवालरचितकर्णपूरोदीर्घदशमनुपहतमिंदुधवलंदुकूलयुगलंवसानःपुरोहित
प्रतिबद्धप्रतिसरससाक्षितपाणिरभिनवराजलक्ष्मीकमलिनीमृणालेनाभिषेकदर्शनार्थमागतेनसप्तर्षिमंडलेनेवहारेणाद्वि

का॰सू॰ गितवक्षःस्थलः सितकुसुमग्रथिताभिराजानुलंबिनीभिर्दिंडुकरकलापकोमलाभिर्वैकक्षकस्रग्भिर्निरंतरनिचितशरीरतया
८१ धवलवेषपरिग्रहतया च नरसिंह इव विधुतकेसरनिकरः कैलास इव सवल्कुजतस्विनीस्रोतोराशिरैरावत इव मंदाकिनीस्टणाल
जालजटिलः क्षीरोद इव स्फुरितफेनलवाकुलः स्फटिकाचलप्रतिमनवेत्रदंडेन पित्रा स्वयं पुरः आरब्धसमुत्सारणाः सभामंडपमुपगम्य
कांचनमयं शशीव मेरुशृंगं चंद्रापीडः सिंहासनमारुरोह। आरुह्य च स्वयं कृतयथोचितसकलराजलोकसम्मानस्य मुहूर्तं स्थित्वा
दिग्विजयप्रयाणशंसी प्रलयघनघटाघोषसदृशरटत्कोणिकः रक्षिदिव मंदरपातेर्वसुंधरापीडमिव युगान्तनिर्घातैरुत्पातजलधर इव नडिइड
पातैः पातालकुक्षिरिव महावराहघोणाभिघातैः कनककोणैरभिहन्यमानः प्रस्थानदुंदुभिरगमंभीरं रध्वान। येन बनगासमाध्मातानी
वोत्क्षिप्तानीव पृथक्कृतानीव विस्तारितानीव गर्भीकृतानीव प्रदक्षिणीकृतानीव रवेण भुवनान्तराणि। विश्लेषिता इव दिशामन्यो
न्यबंधसंधयो यस्य च भयवशविजृंभमाणविनिर्गतानफणासहस्रेण ह्रियमाण इव रसातलेशोषः सगमुहुर्मुहुरभिमुखरवैर्दंतोर्वेणैराहूयमा ८१
दत्त१

रव ३

नइवसिन्धुरकुंजरैःसंत्रासरचितरेचकमंडलैःप्रदक्षिणीक्रियमाणइवनभसिदिवसकररथतुरंगैरसर्वशर्वरीहरासशंकाहर्ष
हुंकृतेनाश्रुतपूर्वेणभासमानइवकैलासशिखरिणाच्यंबकवृषभेणकृतगंभीरकंठगर्जितेनअभ्युद्गम्यमानइवविबुधसमन्यै
रावतेनाश्रुतपूर्वरोषावेशतिर्यग्वलितविषाणमंडलेनप्रणम्यमानइवकृतांतमहिषेणासंत्रस्तलोकपालाकर्णितोबभ्रा
मत्रिभुवनमखिलंतिनादस्ततोहुंडुभिरवमाकर्ण्यजयशब्देतिसर्वतःसमुत्क्षुभ्यमाणजयशब्दःसिंहासनात्सहृष्टितांप्रियासं
चचालचंद्रापीडः।समंताच्चसंभ्रमोत्थितैश्चपरस्परसंघट्टविघट्टितहारस्रस्तविगलितानल्पचवरतमाशाविजयप्रस्थानमंगलक्ष्मी
लाजांजलिमुक्ताफलप्रकरान्क्षरद्भिःपारिजातइवसितकुसुमस्तबकुलपातिभिःकल्पपादपैरैरावतइवविधुरकरशीक
रैराशागजेर्गगनाभोगइवतारावर्षिभिर्दिगंतरैर्जलदकालइवस्थूलजललवासारस्यंदिभिर्जलधरैरनुगम्यमानोनरपतिसह
स्रैरास्थानमंडपान्निरगात्।निर्गत्यचसर्वाकंठयापत्रलेखयासमभ्यासितांतरासनाद्युपपादितप्रस्थानसमुचितमे

ल २

का॰सू॰ गर्त्योल्लिकारांससंभ्रमाधोरणोपनीतांकरेणुकामधिरुह्यचामरेणकचग्राहीकृतक्षीरोदावर्त्तपांडुरेणादर्शवदनबाहुदं
९२ डावस्थितकैलासकांतिनामुक्ताफलजालिनाशतिशंखकेनातपत्रेणनिवार्यमाणातपोनिर्गत्यमार्गेनिर्गत्यश्चा
भ्यंतरावस्थितस्यबहुशाकारांतरितदर्शनानांद्वारावस्थितानांप्रतिपालयतोराज्ञामुन्मयूखानांचूडामणीनामलक्तक
द्रवद्युतिमुषाबहलेनालोकवालातपेनराज्याभिषेकानंतरप्रवृत्तेनस्वजनानुरागप्रवर्द्धिनेवाप्यपिंजरीक्रियमाणादश
दिशोयौवराज्याभिषेकजन्मनानिजानुरागेणोवरज्यमानमवनितलमासन्नरिपुविनाशपिशुनेनदिग्दाहेनेवपाटली
क्रियमाणमंबरतलमभिमुखागतभुवनलक्ष्मीचरणालक्तकरसेनेवलोहितायमानंदिवसंददर्श।विनिर्गतस्यसंभ्र
मप्रचलितगजघटासहस्रैरन्योन्यसंघट्टजर्ज्जरितातपत्रमंडलैराहर्ताणांवरतपुण्यामधिशयितमणीमुकुटपंक्तिमिरावर्ज्जितरत्नकर्णपूरैःकपोलस्थलस्खलितकुंडलैराजसेनायतिनिर्दिश्यमाननामभिःरवनिभुजांचक्रवालैःप्रणा ९२

नल२ घघरा१ ९२

ततः ४ ब४

म्यमानो बहलसिंदूररेणुपाटलेन ह्लादितलशोणायमानस्थूलमुक्ताकलापावचूलेन सितकुसुममालाजनितशेखरेण शिरसा
संछन्नसंध्यातपेन तिर्यगावर्जितस्वर्गगंगाप्रवाहेण तारागणाहंकुरितशिखरशिलातलेन मेरुगिरिरिव गंधमादनेनानुगम्यमा
नः कनकालंकारप्रभाकल्माषितावयवेन च दत्तकुंकुमस्थासकेनेव चारुश्यमाणेनेंद्रायुधेन सनाथीकृतपुरोभागः शनैः प्रथम
93 मेव शांतकृतवीमाशामभिप्रतस्थे चलितमजद्ध्याकेपिन धवलातपत्रमनेककल्लोलपर्यस्तपतितचंद्रमंडलप्रतिबिंबसहस्रमसाभ्र
जलधि५ लग्नं जलमिव क्षालितमहीतलमद्भुताद्भुतकलकलमखिलं संचचाल बलं। उच्चलितस्य चास्य स्वभवनादुपपादितप्रस्थानमंगलो
धवलवासाः सितकुसुमांगरागो महतावलसमूहेन नरेंद्रवृंदैश्चानुगम्यमानो धृतधवलातपत्रो द्वितीय इव युवराजः त्वरितपद
संचारया करिण्या वैशंपायनः समाजगाम। आगत्य च रजनिकर इव रवेरासन्नवर्ती बभूव। अनंतरमितश्चेतश्च निर्गतो युवराज
इति समाकर्ण्य प्रधावतां चरणाप्रस्खलितकुलशैलकीलितजलधिं तरंगगतेव तत्क्षणमाचकंपे मेदिनी। संमुखागतैरन्यैश्च प्रा

बलानां— जल—

कादं. ९३ मद्भिर्भूमिपालैरंशुलताजालजटिलचूलिकानांमणिमुकुटानांमालैकेनोन्मिषितबहुलरोचिषांचापत्रसंगिनीनांके
सरमंडलीनांप्रभासंतानेनक्वचिद्विकीर्यमाणाचाषपक्षक्षोदाइवक्वचिदुत्पतितशिखिकुलचलच्चंद्रकशतशाराइवक्व
चिरकालजलधरतडित्तरलाइवक्वचित्सकल्पतरुपल्लवाइवक्वचित्संतप्तचापाइवक्वचित्स्फुरद्बालातपाइवाकिरंत इवशक्रदि
शः।धवलमन्यदपिविविधमणिनिकरकल्माषैरुत्सर्पिभिरंशुभिर्मणिमरीचिभिर्मनोहराणीवारत्नराशिमानयत्राणि।दशो नच
तुरगमयमिवमहीतलंकुंजरमयमिवदिक्चक्रमातपत्रमंडलमयमिवांतरिक्षंध्वजमयमिवांबरतलमिभमदगंधमयइवसमी
रणोभूपालमयीवप्रजासृष्टिःरत्नरश्मिमयीवदृष्टिःकिरीटमयइवातपश्चामरमयइवदिवसोजयशब्दमयमिवचत्रिभुवनम
भवत्।सर्वतश्चकुलपर्वताकारैःप्रचलद्भिर्मत्तवारणैरुत्पातचंद्रमंडलनिभैश्छत्रैरवरुद्धातपत्रैःसंवर्तकांभोदगंभीरभीमनादेन ९३
चध्वनता दुंदुभिना तारकावर्षसहस्रेणेव विसर्पता मदजलशीकरनिकरेण धूमकेतुसहस्रैरिवोल्लसद्भिरवनिरजोदंडकैर्निर्वर्त्यमान

गंभीरघोषैश्च करिकंठगर्जितैः स्फुरत्कनकवर्णवस्त्ररागैर्भ्रमतां मत्तगजकुंभसिंदूररेणुना संक्षुभितजलधिजलकल्लोलचंच
लाभिश्च विसर्पंतीभिस्तुरंगममालाभिरेकीकृतदिगंतरेखा चानवरतक्षरन्नागमदजलधारादुर्दिनेन कलुषकरेण च भुवनांतर
व्यापिना महाप्रलयकाल इव संजज्ञे। बलबहलकोलाहलभीतानीव चवलध्वजनिवहनिरंतरावृतान्ययुः क्वापि दिशो मलि
नाव निरजः संस्पर्शशंकिनमिव समरगजव्रातबृंहितसहस्रसंरुद्धमतिदूरमंबरतलमपससार। प्रबलदेविवेत्रलतासमुत्सार्य
माणाद्द्वनुरगखुररजोधूसरमर्ककिरणा मुमुक्षुः पुरोगामिमकरशीकरनिर्वापणाक्षत्तड्वातपत्रसंक्रांतिताप इव दिवसो नना
शा। वलभरजर्जरीकृता मरकतकरिवरराशतता डिताद्विति येवप्रयाणभेरीभैरवं भूमीररास। गुल्फद्वयसेचतुरंगममुखविनिः
सृत्वसितफेनपल्लवितेमरदयपयसि मरस्तुतां करिणां च स्रवद्भुः पदे पदे पराजयः। हरितालपरिमलतिमेन चातिपङ्कुना गजमदा
मोदेनातुलितस्य सामस्पेवसमपय यो निखिलान्यगंधग्रहणासामर्थ्यं घ्राणेंद्रियस्य। क्रमेण च प्रसर्पतो बलस्य पुरः प्रव

वर्त्तां जनकर्दवकानांकोलाहलेन तारतरहीर्झराणवकाहलानांनिनादेन खुररवविमिश्रेणचवाजिनांहेषारवेणानवरतकर्णताल
स्वनसंपृक्तेनचदंतिनामाडंवरखेणाग्रैवेयककिंकिणीक्कणितानुस्तेनचगतिवशाविषमविरावीणांचंयनाटंकृतेनम
गलशंखशब्दसंवर्द्धितध्वनीनांचप्रयाणपरहानांनिनादेनमुहुर्मुहुरितस्ततस्ताड्यमानानांचडिंडिमानांनिस्वनेनजर्जरीकृतश्रु
वणापुरस्यसूर्येवानवज्ञनस्य।शनैःशनैश्चबलसंक्षोभजन्मा क्षितेरनेकवर्णतयाक्कचिज्जीर्णशफरक्रोडधूम्रःक्कचिक्रमे
लकबद्धसंनिभःक्कचित्परिणतरल्लुकरोमपल्लवमलिनःक्कचित्पत्तोर्णं तंतुपांडुरःक्कचिज्जरठष्टणालदंडधवलःक्कचिज्जर
त्कपिकेशकपिलःक्कचिद्वृद्धमरोमंथफेनपिंडपांडुरःत्रिपथगाप्रवाहइवहरिचरणप्रभवःकुपितइवमुंचन्नूष्माभारवप
हासइवरुंधन्नयनानिलक्षितइवपिबन्नकरिकरशीकरजलानिपल्लवानिवोत्पतन्गगनतलंमृगपतिरिवरचयन्नकरिकुंभ
स्थलीषुपदं।ऽपात्तविजयइवग्रहन्पताकांजरागमइवपांडुरीकुर्वन्शिरांसि।आजिघ्रन्निवमकरंदमधुपकलापःकर्णोत्प ६८४

=पत्त्रोर्णं धौतकौशेयंबहुमूल्यंमहाधनमित्यमरः४

अलिनिवहइवचुंबन्गजमदलेखां२

ताडः१ राहु४ कलाप२

ह्यानि मदकलकरिकर्णताडनत्रस्त इव विशन् कर्णशंखोदरविवराणि पीयमान इवोन्मुखीभिरवनिपतितकुकुरमणिप

चनंगमकरिकाभिरभ्यर्च्यमान इव तुरगमुखविक्षेपविधुतैः फेनपल्लवकुसुमस्तवकैरनुगम्यमान इव मत्तगजघटाकुंभभि

त्तिसंभवेन धातुसलिलवलयेनालिंग्यमान इव चलच्चामरैर्विधुतेन परवासपांसुना प्रोत्साह्यमान इव नरपतिशेखरसरस्वपरि

95 च्युतैः कुसुमकेसररजोभिरुन्मानमारुत [illegible] इव दिवसकरमंडलमकांड एव पिबन्नुपग्रस्थानप्रतिसरवलयमालिकासु

गोरोचनाचूर्णायमानः कुंकुमपंकचंदनक्षोदधूसरो रेणुरुत्पपात। अपरिमाणबलसंघट्टसमुपचीयमानश्च शनैः शनै

संरुरन्निव विश्वमशेषमकालकालमेघपटलमेदुरो विस्तारमुपगंतुमारेभे। तेन च क्रमेणोपचीयमानबहलमूर्तिना दिग्विज

यमंगलध्वजेन रिपुकुलकमलमलयनीहारेण राजलक्ष्मीविलासपटवासचूर्णेनाहितातपत्रपुंडरीकखंडतुषारेण सैन्य

भरपीडितमहीतलमूर्छांचकारेण चलद्बलजलस्कालकुसुमोज्जमेन दिवसकरकरकमलवनोद्दलनस्तूपेन गगनमहीतल

कदंब१ द्विप१

का·सू·
९५

ज्ञौवनप्रलयपयोधिपूरेण त्रिभुवनलक्ष्मीशिरोवगुंठनपटेन महावराहकेसरनिकरकर्बुरेण प्रलयानलधूमरा
जिमांसलेन पातालतलादिवोत्तिष्ठता चरणेभ्य इव निर्गच्छता लोचनेभ्य इव निष्पतता दिग्भ्य इवागच्छता नभस्तलादिव पत
ता पवनादिवोल्लसता रविकिरणेभ्य इव संभवता नयन्तचेतनेन निद्रागमेनानवगणितसूर्येणांधकारेणात्मर्मकालोप
स्थितेन भूमिरुहेणानुद्दिततारागणानिवहेन बहुलनिशाप्रदोषे र्णीयजिनसलिलेन जलधरसमयेनाभ्रांतभुजं
गेन रसातलेन हरिचरणेनेव संवर्द्धमानेन त्रिभुवनमलंघ्यनरजसा। विकचकुवलयवनमिवर्नवोदकेन गगनतलमव
ष्टभ्यमानमलक्ष्यत क्षीरोदफेनपांडुनाक्षितिस्रोतेन। वहलरजोधूसरितमशिशिरकिरणबिंबमवधूतचामरमिव निष्प्र
भमभवत्। कुक्कुरपक्षबलाकराजिकेव कलुषतामाजगाम गगनापगा। नरपालिवदभ्रमत्तिमुखमसहमाना पुनरिवमा
शवतारणार्थममरलोकमातुरोह रजोनिभेन मही। निःशेषनिपीतातपमंतर्दह्यमानमिव जलधिजलेषु धूसरितरवि ९५

छ२

यश्चजपरमपतद्रजः। मुहूर्तेन च गर्भवासमिव संसारसागरजलमिव कृतान्तजठरमिव महाकालमुखमिव नारायणोद
रमिव ब्रह्माण्डमिव विवेश पृथिवी। मृन्मय इव बभूव दिवसः पुस्तमय्य इव चकासिरे ककुभो रेणुरूपेणोपरि गतमंबरतलमेक
महाभूतमयमिव त्रैलोक्यमासीत्॥ अथ निजमदोऽप्रसंतप्तानां दंतिनां हिमशिशिरशिकरविवरविनिःसृतैः सरद्भिः क्षीरोदधवं
वलैः शीकरासारैः कर्णपल्लवप्रहृतिविक्षुतेन च विसर्पता दानबिंदुदुर्दिनेन हेषारवविप्रकीर्णैश्च वाजिनां लालाजललववज्रा
लकैरुपशमिते रजसि पुनरपि जातालोका सुदृष्टे सागरसलिलाद्रिवोन्मग्नमालोकयन्नदपरिमाणं बलमुपजातविस्मयः स
र्वतो दत्तदृष्टिर्वैशंपायनश्चंद्रापीडमाबभाषे। युवराज किं न जितं महाराजाधिराजेन तारापीडेन यज्जेष्यसि का दिशो न वशीकृ
ता या वशीकरिष्यसि कानि दुर्गाणि न प्रसाधितानि यानि प्रसाधयिष्यसि कानि द्वीपांतराणि स्वायत्तानि यान्यात्मीकरिष्यसि कानि र
त्नानि नोपार्जितानि यान्युपार्जयिष्यसि के वा न प्रणता राजानः कैर्न विरचितः शिरसि बालकमलकुड्मलकोमलः सेवांज
नाल्मी कृतानि २

का.स. लिः। कैर्न मषीकृताः प्रतिबद्धसेमपट्टैर्ललाटैः समाभुवः। कैर्नेहस्ताः पादपीठे चूडामणयः। कैर्ने प्रतिपन्नावेत्रयष्टयः। कैर्नो
९६ द्धूतानि चामराणि। कैर्नोद्घारिता जयशब्दाः। केषां न पीताः किरीटपत्रमकरैः सलिलधारा इव निर्मलास्त्वच्चरणनखमयूख
राजयः। एते हि चतुरुदधिजलावगाहदुर्ललितबलमहाबलिभारस्सारयभगीरथैर्दिलीपालर्कमांधातृप्रतिमाः कुलाभिमा
नशालिनः सोमपायिनो मूर्द्धाभिषिक्ताः पृथिव्यां सर्वपार्थिवा रक्षाभूतिमिवाभिषेकपयःपातस्य ते चूडामणिपल्लवे
रुद्दहंति मंगल्यां नवचरणोसंहृति मेभिश्रियमादिपूर्वैर्नैरिवापरैस्ते नाथ पृथिवी। एतानि चाप्यमीषामाप्ता विन्दश दिगंतराणि से
न्यानि भवंतमुपासते। तथा हि। पश्य पश्य यस्यां दिशि विक्षिप्यते वज्ञलस्यां तस्यां रसातलमिवोद्दिरन्निव भुवेवस्रुतककु
भइव वमंति गगनमिव वर्षंति दिवस इव सृजंति बलानि। अपरिमितबलभराक्रांतामन्ये स्मरति महाभारतसमरसंक्षोभ
स्याधः स्थितिः। एष शिखरदेशेषु परिस्खलितमंडलो ध्वजानामातपत्रमिव कुतूहलाद्भ्रमति कदलिकावनांतरेषु भ सरस्वमा। ९६

संधिर

९७

णी। सर्वतश्च मदजलमुचां करिणामेलापरिमलसुरभिणा वेगिकावाहिनि मदवारिणा निरंतरमम्बरान्निपतितमधुक
रकुलकलंककलिता कालिंदीजलकल्लोलकलिलेव भाति भूतधात्री। सैन्यभरसंक्षोभभयात्सरित इव गगनतलमु
त्पतिताः संछादयंत्येता दिक्चक्रवालमिंदुधवला ध्वजपंक्तयः। सर्वथा चित्रं यन्नाद्य विदीर्णसकलकुलशैलबंधा सहस्रधाः
शकलीभवति बलभरेणाद्य धरित्री। यच्च बलभरपीडितप्रसुप्ताधारणा विधुरानदत्तं तिफणी नांप्यसुः फणामित्ययइत्येवं व
दत एव तस्य युवराजः समुच्छ्रितानेकतोरणां सुधामयप्राकारमंदिरसहस्रसंबाधां मुक्ताशितधवलपटमंडपसंशोभिनीं
प्राप्तासभूमिमवाप। तस्यां चावतीर्य राजवल्लभो क्रियाश्च कार सर्वैश्चैतैः समेत्य नरपतिभिरमात्यैश्च विविधाभिः कथा
भिर्विनोद्यमानस्तं दिवसमशेषमभिनवपितृवियोगाज्जन्मना शोकावेगेनायास्यमानहृदयो दुःखेनात्यवाहयत्। अति
वाहितदिवसश्च यामिनीमपि स्वशयनीयस्य नातिदूरे निहितशयननिषण्णेन वैशंपायनेनान्यैश्च समीपे स्थितैरुविन्य

तै

सकुभप्रसुप्तयापत्रलेखयासहान्तरापितृसक्रमंतरामातृसंबद्धमंतराशुकनासमयंकुर्वन्नालापंनात्युपजातनिद्रःप्रा
येणाजागरीदेवनिन्ये।अन्येद्युश्चोत्थायतेनैवक्रमेणानवरतप्रयाणकैःप्रतिदिवसमुपचीयमानेनसेनासमुदायेनजर्ज
रयन्वसुंधरामाकंपयन्गिरीन्नुत्सिंचन्सरितोरिक्तीकुर्वन्सरांसिचूर्णयन्काननानिसमीकुर्वन्विषमाणिदलयन्दुर्गाणिपू
रयन्निम्नानिनिम्नयन्स्थलानिप्रातिष्ठत।शनैःशनैश्चस्वेच्छयापरिभ्रमन्नुन्नतान्नमयन्नाश्वासयन्भीतान्रक्षयन्शरणाग
तानुन्मूलयन्विटपकानुत्सादयन्कंटकानभिषिंचन्स्थानस्थानेषुराजपुत्रान्समर्जयन्रत्नानिप्रतीच्छन्नुपायनानिगृह्ण
न्करान्नादिशन्देशव्यवस्थांस्थापयन्स्वचिह्नानिकुर्वन्कीर्तनानिलेखयन्शासनानिपूजयन्नग्रजन्मनःप्रणमन्मुनीन्पाल
यन्नाश्रमान्जनानुरागंप्रकाशयन्विक्रममारोपयन्प्रतापमुपचिन्वन्यशोविस्तारयन्गुणान्प्रख्यापयन्स्वचरितमाष्टू[illegible]वे ८७
लावनानिवलरेणुभिराधूसरीकृतसकलसागरसलिलःपृथिवींविचचार।प्रथमंप्राचींततस्त्रिशंकुतिलकांततोवरु

98

णा लांछनामनंतरं च सप्तर्षिताराशबलां दिशं विजिग्ये। वर्षत्रयेण चास्य कृताशेषद्वीपांतरं सकलमेव चतुरंभोधिरवा

तवलयपरिखाप्रमाणं बभ्राम महीमंडलं। ततः क्रमेण च विजितसकलभुवनतलः प्रदक्षिणीकृत्य वसुधां परिभ्रमन्कै

लाससमीपचारिणां हेमजटनाम्नां किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृष्टं पूर्वजलनिधेर्जि

त्वा जग्राह। तत्र च निखिलधरणितलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान्दिवसानतिष्ठत्। एकदा

तु तत्रस्थ एवेंद्रायुधमारुह्य मृगयानिर्गतो विचरन्कानने शैलशिखरावतीर्णं यदृच्छया किंनरमिथुनमद्राक्षीत्। अपूर्व

दर्शनतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषस्तत्समीपमादरादुपसर्पिततुरगः समुपसर्पन्नदृष्टपूर्वपुरुषदर्श

नत्रासप्रधावितं तत्पलायमानमनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेंद्रायुधेनैकाकी निर्गत्य निजबलस्य दूरमप

ससार। अनुगम्यमानं इदं गृहीतमिदं गृहीतमित्यतिरभसाकृष्टचेता महाजवतया तुरंगमस्य मुहूर्तमात्रेणैकपदमिवासहाय

अनुगत्येत १ जै२

है२

ववि॰ विहस्यात्

का॰पू॰ तस्मात्प्रदेशात्पंचदशयोजनमात्रमध्वानंजगाम । तच्चानुबध्यमानं किंनरमिथुनमालोकयत एवास्य संमुखापतितमचल
९९ तुंगशिखरमारुरोह । आरूढे च तस्मिन्नुपशनैस्तदनुसारिणीं निवर्त्य दृष्टिमचलशिखरप्रस्तरप्रतिहतगतिप्रसरो विधृत
तुरंगश्चंद्रापीडस्तस्मिन्काले समुपारूढश्रमः स्वेदार्द्रशरीरमिंद्रायुधमात्मानं चावलोक्य क्षणमिव विचार्य स्वयमेव चिंतयत् । कि
मिति निरर्थकमयमात्मा मया शिशुनेवायासितः किमनेन गृहीतेनागृहीतेन वा किंनरयुगलेन प्रयोजनं यदि गृहीतमिदं
ततः किम् अथ न गृहीतमिदं ततः किं अहो मे मूर्खतायाः प्रकारः अहो यत्किंचनकारितायामादरः अहो निरर्थकव्यापारेष्व
भिनिवेशः अहो बालिशचरितेष्वासक्तिः साधुफलं कर्म क्रियमाणं तथा जातं अवश्यकर्तव्या क्रिया प्रस्तुता विफलीभूता
सुहृत्कार्यमुपपाद्यमानं नोपपन्नं राजधर्मः प्रवर्तितो न निष्पन्नो गुर्वर्थः प्रारब्धो न परिसमाप्तः विजिगीषुव्यापारप्रयत्नो न
सिद्धः कस्मादहमाविष्ट इवो त्सृष्टपरिवार एतावतीं भूमिमायातः । कस्माच्च मया निःप्रयोजनमिदमनुसृतमश्वमुखद्वय ९८

म्निति विचार्यमाणो यत्नस्य मात्मैव मे पर इव सासमुपजनयति। नजानेकियत्ताध्वनाविछिन्नमितो वलमनुयायि मे महाजवो
हिञ्युग्मेनानिमिषमात्रेणापिदूरमतिक्रामति। नचागछता मयातुरगवेगवशात्किंनरमिथुने वद्धदृष्टिनास्मिन्नविरलतरुश
तशाखावाहुल्यलतासंतानगहने निरंतरनिपतितशुष्कपर्णविकीर्णतलेमहावनेपंथानिरूपितः। येनप्रतिनिवृत्य यास्यामि। न
चास्मिन्प्रदेशेप्रयत्नेनापिपरिभ्रमन् मर्त्यधर्माकश्चिदासाद्यते यः सुवर्णपुरगामिनंपंथानमुपदेक्ष्यति। श्रुतंचमयावहुशः
कथ्यमानमुत्तरेणसुवर्णपुरंसीमंतलेखापृथिव्याःसर्वजनपदानांततःपरतोनिर्मानुषमरण्यंतदतिक्रम्यकैलासगिरिरि
ति। अयंचकैलासस्तदिदानींप्रतिनिवृत्यैकाकिनास्वयमुत्प्रेक्ष्योत्प्रेक्ष्यदक्षिणा।माशांकेवलमंगीकृत्यगंतव्यमात्मकृतानां
हिदोषाणांनियतमनुभवितव्यंफलमात्मनैवेत्यवधार्यवामकरतलचलितरश्मिपाशस्तुरंगमंव्यावर्त्तयामास। व्यावर्ति
ततुरंगमश्चपुनश्चिंतितवान्अयमुड्डासितयुगमाभास्वरोभगवान्भानुरधुनादिवसश्रियोरसनामणिरिवमध्यमलंकरोति।

का॰ सू॰ परिश्रान्तश्चायमिंद्रायुधस्तदेनंतावद्गृहीतकतिपयदूर्वाप्रवालंकस्मिंश्चित्सरसिशिलाप्रस्रवणेवासरिदंभसिवास्नात
९९ पीतोदकमपनीतश्रमंकृत्वास्वयंचसलिलंपीत्वाकस्यचित्तरोरधःछायायांमुहूर्तमात्रंविश्रम्यततोगमिष्यामीतिचिंतयि
त्वासलिलमन्वेषमाणोमुहुर्मुहुरितस्ततोदत्तदृष्टिःपर्यटन्नलिनीजलावगाहोत्थितस्याचिरापक्रांतस्यमहतोगिरिवरस्ये
वनगजयूथस्य स्यचरणोत्थितैःपंकपटलैरार्द्रीकृतंकरावकृष्टैश्चसमृणालमूलनालैःकमलकलापैःकल्माषितमार्द्रै
श्चशैवलप्रवालैःश्यामलितोद्देशमुद्दलितैश्चकुमुदकुवलयकह्लारकुड्मलैरंतरांतराविच्छुरितमुद्धूतैश्चसकर्दमैःशालू
रु ककंदैराकीर्णंखंडितैश्चकुसुमस्तबकशारैर्वनपल्लवैराच्छादितमालूनाभिश्चकुसुमोपविष्टोच्छूसद्भ्रमरामिर्वनलताभि
राकुलितमभिनवकुं लकुसुमपरिमलवाहिनाचतमालपल्लवरसश्यामलेनमदज लेनचसर्वतःसिक्तंमार्गमद्राक्षी
त्। उपजातजलाशयाशा स्वतंप्रतीपमनुसरन्नुन्नविटपैरुपरिच्छिन्नमंडलाकारैःसरलसालसल्लकीप्रायैरविरलैरपिनि: ९८
व२

=टंकलः पर्वतीयोऽश्वः ४

100

शाखत्तयाविरलैरिंद्रोपलस्थगितमार्गैःपा रुपैरुपेतेन स्थूलकपिलवालुकेन शिलातलबहुलतयाविरलतरुगो
ल्मेन वनद्विपदशनदलितमनःशिलाकपिलेनाभंगिनीभिरुत्कीर्णाभिरिव पत्रभंगकुटिलाभिः पाषाणभेदक
मंजरीभिर्जटिलीकृतशिलांतरालेनानवरतगलद्गुग्गुलुद्रुमद्रवार्द्रीकृतदृषदा शिखरच्युतशिलाजतुरसपिच्छि
लोपलेन टंकोल्लेखखुरखंडितहरितालक्षोदपांशुलेनाखुनखरोत्खातविवरविकीर्णकांचनचूर्णेन सिकता
निमग्नचमरकस्तूरिकामृगीखुरपंक्तिना सेशीर्णजीर्णांकुरच्छकरोमप्रकरनिचितेन विषमशिलाच्छेदोपविष्ट
जीवंजीवकयुगलेन वनमानुषमिथुनाध्यासितदरीगृहामुखेन गंधपाषाणपरिमलामोदिनावेत्रलताप्रतानप्र
रूढवेणुना कैलासतलेन कंचिदध्वानं गत्वा तस्यैव कैलासशिखरिणः पूर्वोत्तरे दिग्भागे जलभारालसजलधरव्यूह
मिव बहुलधूमांधकारमिव पुंजीकृतमत्यायतं तरुखंडं ददर्श तेन च संमुखागतेन कुसुमरजःकषायामोदिना जल

का॰ टु॰ संसर्गशिशिरेणाशीकरेणाचंदनरससमस्पर्शेनालिंग्यमानइवजलतरंगमारुतेनकमलमधुपानमत्तानांचश्रोत्र
२०० हारिभिःकलहंसानांकोलाहलैराहूयमानइवविवेश।प्रविश्यचतस्यतुषंडस्यमध्यभागेमणिदर्पणमिवत्रैलोक्यल
क्ष्म्याःस्फटिकभूमिगृहमिववसुंधरादेव्यानिर्गमनमार्गमिवसागराणांनिस्यंदमिवदिशामंशावतारमिवगगनत
लस्यकैलासमिवद्रवतामापन्नंतुषारगिरिमिवविलीनंचंद्रातपमिवरसतामुपेतंहराट्टहासमिवजलीभूतंत्रिभुवनपु
ण्यराशिमिवसरोरूपेणावस्थितंवैडूर्यगिरिजालमिवसलिलाकारेणपरिणतंशरदभ्रवृंदमिवद्रवीभूयैकत्रनिस्यं
दितमादर्शभवनमिवप्रचेतसःस्वच्छतयामुनिमनोभिरिवसज्जनगुणैरिवहरिणलोचनप्रभाभिरिवमुक्ताफलांशु
भिरिवनिर्मितमापूर्णपर्यंतमप्यंतःस्वच्छत्वस्पष्टसकलवृत्तांततयारिक्तमिवोपलक्ष्यमाणमनिलोद्धूतजलतरंगशीक
रस्थलिजन्मभिःसर्वतःसमुपचितैः [illegible] संरक्ष्यमाणमिवेंद्रचापसहस्रैःप्रतिमानिभेनांतःप्रविष्टसकान २००

कैला

नशैलश्रृङ्गग्रहचक्रवालं त्रिभुवनमुद्भिन्नपंकजेनोदरेणानारायणमिव बिभ्राणं आसन्नकैलासावतीर्णोस्य
चशतशो भगवतः खंडपरशोर्मज्जनोन्मज्जनक्षोभचलितजूडामणिचंद्रखंडच्युतेनामृतरसेन जलक्षालितैर्वा
माईकपोलगलितलावण्यप्रवाहानुकारिणा संमिश्रितजलमुपह्लतमालवनप्रतिबिंबांधकारितास्यंतरे
दृश्यमानरसातलद्वारैरिवसलिलप्रदेशैर्गंभीरतरं दिवाप्युपजातनिशाशंकैश्चक्रवाकमिथुनैः परिह्रियमाण
नीलोत्पलवनगहनमसकृत्पितामहपरिस्पर्शितकमंडलुपरिपूतजलमनेकशैवालरिक्त्यकदंबककृतसंध्योपास
नं बहुशः सलिलावतीर्णासावित्रीमग्नदेवतार्चनकमलसहस्रैस्सप्तर्षिमंडलस्नानपवित्रीकृतं सर्वदा सिद्धवधूयौवन
कल्पलतावल्कलपुण्यीकृतोदकमुदककेलीडादोहदागतानां च गुह्यकेश्वरांतःपुरकामिनीनां मकरकेतुचापर
काह्रुतिभिरतिविकटैराचांतिमिर्निर्मिमंडलैरापीतसलिलं। क्वचिद्दरूराहसोपानकमलवनमकरंदकचि

का॰पू॰ दिग्गजमज्जनजर्जरितजरत्कूणालखंडं क्वचिच्चंवकवृषभविषाणकोटिखंडिततटशिलाखंडं क्वचिद्यममहिषशृं
१०२ गशिखरविक्षिप्तफेन पिंडं क्वचिदैरावतस्नानमुशलखंडितकुमुदखंडं यौवनमिवोत्कलिकाबहुलमुत्कंठित
मिवमृणालवलयालंकृतं। महापुरुषमिवमीनमकरकूर्मचक्रप्रकरलक्षणं वसुरवचरितमिवश्रूयमाणकौ
चवनितास्रलापंभारतमिवपांडुधार्त्तराष्ट्रकुलपक्षक्षतक्षोभं। अमृतमथनसमयमिववारिवस्थितशितिकंठ
पीयमानविषंकुसुमवालचरितमिवतरकस्वंशाखाविरूढहरिकृतजलप्रयाणक्रीडंमदनध्वजमिवमकराधिष्ठि
तंस्त्रियमिवानिमिषलोचनरमणीयमरण्यमिवविजृंभमाणपुंडरीकमुरगकुलमिवानंतशतपत्रपद्मोद्भासि शंख ४
तंकेसवनमिवमधुकरकुलोपगीयमानकुवलयापीडंकर्णस्तनयुगलमिवनागसहस्रपीतपयोगंडूषंमल
यमिवचंदनशिशिरवनमसक्तसाधनमिवाहृष्टांतमतिमनोहरमाह्लादनंदृष्टेरच्छोदंनामसरोदृष्टवान्॥ १०२

-पुंडरीकं सितच्छत्रेभेभेजेवसितोत्पले-व्याघ्रेगणाधरे दंतिन्यपरे वागजहृगाधिपे ३

ल२

मुख१

102

आलोकमात्रेणैवापगतश्रमोऽच्छोदमनस्यकरोत्। अहो निष्फलमपि मे तुरगमिथुनानुसरणमेतदालोकयतः
सरः सफलतामुपगतं। अद्य परिसमाप्तमीक्षणयुगलस्य द्रष्टव्यदर्शनफलमालोकितः खलु रमणीयानामन्तो दृष्टा
आह्लादनीयानामवधिः वीक्षिता मनोहराणां सीमान्तलेखा। उपलब्धा प्रीतिजननानां परिसमाप्तिः विलो
किता दर्शनीयानामवसानभूमिः। इदमुत्पाद्य सरः सलिलममृततरसं सम्भुत्पादयता वेधसा पुनरुक्तामिवनीतास्य
सृष्टिः। इदमपि खल्वमृतमिव सर्वेन्द्रियाह्लादनसमर्थं मतिविमलतया चक्षुषः प्रीतिमुपजनयति। शिशिरतयास्प
र्शसुखमुपपादयति। कमलसुगन्धितया घ्राणमाप्याययति। हंसमुखरतया श्रुतिमानन्दयति। स्वादुतया रसना
माह्लादयति। नियतं चास्यैव दर्शनतृष्णया न परित्यजति भगवान् कैलासनिवासव्यसनमुमापतिः। न खलु सांप्र
तमाचरति जलशयनदोहदी देवो रथाङ्गपाणिः सोऽयं हिममृततरसमसुरभिसलिलमपहाय लवणरसमपत्तुमपयस्सु

८२

का॰स्॰ हृद्यंनिर्व्वापिता।नूनंचेदंनप्रथममासीत्सरोयेनप्रलयवराहघोरणाभिघातभीताभूतधात्रीकलशयोनिपानपरिकल्पि
१-२ तसकलसलिलंसागरमवतीर्णा।अन्यथाअगाधपातालगंभीरांभसिनिमग्नामवेक्ष्यमहासरसिकिमेकेनमह
वराहसहस्रैरपिनासादिताभवेत्।नूनंचास्मादेवसलिललेशमादायाराध्यमहाप्रलयेषुप्रलयपयोदाःप्रलयदुर्दि
नांधकारितदशदिशःप्लावयंतिभुवनांतराणि।मन्येचयत्सलिलमयंब्रह्माण्डरूपमादौभुवनमहद्भिरिंपिंडीभूयस
रोव्यपदेशेनावस्थितमिति विचारयन्नेवतस्यशिलाशकलकर्कशबालुकाप्रायंविद्याधरोद्धृतसनालकुमुदकला
पार्चितानेकवारुसैकतलिंगमतुंगनीरतटदिनकरार्घ्यपयः पर्यस्तरक्तकमलशोभितसुपक्वशिलातलोपविष्ट
सभानुपनिषेव्यमाणातपमभ्यर्णतयाचकैलासस्यज्ञानागतमात्हमंडलपदपंक्तिमुद्रांकितमवकीर्णमिस्मस्
चितमग्रोस्थितमग्राहंशेडूलनमवगाहावतीर्णगणपतिभंडस्थलमदप्रच्युताभिसिक्तमतिभमाराणपाशान्तुमी। १-२

103

यमानत्वचितकात्यायनीसिंहावतारमार्गेदच्छिरांतीरमासाद्यतुरगादवततार। अवतीर्यचव्यपनीतपर्याणमिंद्रा
युधमकरोत्। क्षितितलुठितोत्थितंचदृष्टीतकतिपययवकवलग्रासंसरोवतार्यपीतसलिलमिच्छयाग्नातंचो त्थाप्यान्य
तमस्यसमीपवर्तिनस्तरोर्मूलशाखायामयगतखलीनंहस्तपाशग्रंथवलयाकनकमय्याचरणावबद्धापाणिका
वलूनान्रुच्छित्वाचाग्रतःकतिचित्सरस्तीरदूर्वाप्रवालकवलान्पुनरपिसलिलमवततार। ततश्चप्रक्षालितकरयुगल
श्चातकइवकृत्वाजलमयमाहारंच कोकूपेइवास्वाद्यमृणालशकलानिशिशिरांशुरिवकराग्रैःस्पृष्ट्वाकुमुदानिफ
णीवामिनंद्यजलतरंगवातानंगशरप्रहारातुरइवोरसिनिधायकमलिनीदलोत्तरीयमरण्यगजइवशीकराई पु
ष्करोपशोभितकरःसरःसलिलादुदगात्। प्रत्यग्रमग्नशिशिरैश्चमृणालिकेर्जलकणिकाचितैःकमलिनीपत्रै
श्चोर्लतामंडपपरिच्छिन्नशिलातले स्रस्तरमास्तीर्यनिधायशिरसिपिंडीकृतमुत्तरीयंनिषसाद। मुहूर्तं विश्रांत

का॰ ९८ श्चतस्यसरसउत्तरेतीरप्रदेशेसमुद्भ्रान्तमुग्धमुक्तकवलेननिश्चलश्रवणपुटेनतन्मुखीकृतेनोद्ग्रीवेरंगमायुग्मेनप्र
१॰३ थममाकर्णितंश्रुतिसुभगंवीणातंत्रीझंकारमिश्रममानुषंगीतशब्दमशृणोत्।श्रुत्वाचकुतोत्रविगतमर्त्यसंपाते
प्रदेशेगीतध्वनेःसंभूतिरित्युपजातकौतुकःकमलिनीपत्रस्रस्तरादुत्थायतामेवगीतसंपातसूचितांदिशंचक्षुःप्रा
हिणोत्।अतिदवीयस्तयातुतस्यप्रदेशस्यप्रयत्नव्यापृतलोचनोऽपिविलोकयन्नकिंचिद्ददर्श।तमेवकेवलमनव
रतंगीतशब्दंशुश्राव।कुतूहलवशाद्गीतध्वनिप्रभवजिज्ञासयाकृतगमनबुद्धिरुत्तपर्याणमिंद्रायुधमारुह्यप्रिय
गीतैःप्रथमप्रस्थितैरप्यर्थितैरपिवनहरिणैरुपदिश्यमानवर्त्मासमदरवकुलैलालवंगलवलीलतालोलकुसुम
सुरभिपरिमलयालिकुलविरुतिमुखरितयातमालनीलयादिङ्नागमदवीथ्येवपश्चिमयासरसीरवनलेखया
तिमिरीकृत्यतंगीतध्वनिमभिप्रतस्थे।क्रमेणाचसंमुखागतैरच्छनिर्झरजलकणजालजनितजडिमभिर्जर्जरित १॰३

104

भूर्जवल्कलैर्दूर्जटिलमरोमंथफेनविंदुवाहिभिःखगमुखशिखंडिशिखाचुंविभिरंविकाकरोत्करपल्लवोल्लासनतु
र्ललितैरुत्तरकुरुकामिनीकरार्गोत्पलप्रेंखोलनदोहदिभिरार्कपितकंदैर्नमेरुकुसुमपांशुपातिभिःपक्षपतिजरा
वंधार्वासुकिपरियीतशेषैराह्लादिभिःपुरायैःकैलासमारुतैरभिनंद्यमानोगत्वाचतंप्रदेशंसर्वतोमरकतहरितैर्हारिहारीत
रुतिरमणीयैर्भृङ्गराजनखरजर्जरितजरठकुड्मलैरुन्मरकोकिलकुलकवलीकृतसहकारकोमलाग्रपल्लवैरुन्मद
मधुकराचक्रवालवाचालितविकचचूतकलिकैरचकितचकोरचंचुचुंवितमरिचांकुरैश्चंपकपरागपुंजपिंजरकपिंजलजग्धपि
प्पलीफलैःफलभरनिकरनिपीडितनिविडदाडिमनीडप्रस्तनकलविंकैःक्रीडितचपलकपिकुलकरतलताडनतरलितताली
पुटैरन्योन्यकलहकुपितकपोतपोतपक्षपालीपातितकुसुमैःकुसुमरजोराशिसारिसारिकाश्रितशिखरैःशुकशतमुखन
खशिखरशकलितपक्वस्फीतैर्जलधरजलतुष्टविप्रलब्धमुग्धचातकध्वनमुखरिततमालखंडैरिभकलभकोद्धूनय

स्तबवेल्लितलवलीवल्लैयैरालीयमाननवयौवनमत्तपारावतपक्षक्षेपपर्यस्तकुसुमस्तवकैस्तनुयवनकंपितकोमल
कदलीदलवीजितैरविरलफलनिकरावनतनालिकेरवैरेरकठोरपत्रपुरस्सगविरपिपरिहृतैरनिवारितविहंगकुंड
खंडितपिंडखर्जूरजालकैर्मदमुखरमयूरीमधुररवविराविताङ्गनैरंकुलितकलिकाकलापैरंतुरैरंतरांतराकैलाश
तरंगिणीतरंगितसिकतिलतलभूमिभागैर्वनदेवताकरतलनिवहनिमग्नलक्ष्मकजललवसिक्तमिवकिसलयनिकर
मतिसुकुमारमुद्वहद्भिःग्रंथिपर्णिकयासमुद्दीपितचमरीकुलनिषेवितमूलैःकर्पूरागुरुप्रायैरिंमुग्धैरिवव्रनावस्थानैः
कुमुदैरिवारक्तदिनकरकरप्रवेशशिशिरान्यंतरैर्दाशरथिवत्सैरिवांजननीसनलपरिगतप्रांतैःप्रासादैरिवसपारावतैर्भव
नतापसैरिवसंनिहितवेत्रासनैरुद्रैरिवनागलताबद्धपरिकरैरुदधिकूलपुलिनैरिवनिरंतरोद्भिन्नप्रवालरक्तांकु
रजालकैरभिषेकसलिलैरिवसर्वौषधिकुसुमफलकिसलयसनाथैरालेख्यगृहैरिववहुवर्णचित्रपत्रशकुनिसं १०४

शि३

शोभितैः कुरुभिरिव भारद्वाजद्विजोपसेवितैर्महासमरैरिव पुंनागसमाकृष्टशिलीमुखैर्महाकरिभिरिव प्रलंबबालप
ल्लवस्पृष्टभूतलैः प्रमत्तपार्थिवैरिव पर्यंतावस्थितबहुगुल्मकैरैशितैरिव भ्रमरसंघातकवचाच्छन्नकायैः प्रयाणाभिमुखैरिव

रिव वानरकराङ्गुलिस्पृष्टपुंजैरवनिपालशयनैरिव सिंहपादैः कितवत्वैः शारद्रूपंचनयः क्रियैरिवोच्छिखशिखिमंडलपरि
वृतैर्दीक्षितैरिव दकृत्तकृष्णसारविषाणकंडूयनैर्जरद्भुमुनिभिरिव जटालवालकमंडलुधरैरिंद्रजालिकैरिव दृष्टिहारिभिः
पादपैः परिवृतं चंड अच्छोदनाम्नस्तस्य सरसः पश्चिमे तीरे कैलासैकपादस्य ज्योत्स्नावदातया प्रभया धवलयतस्तं प्रदेशं भूतलमा
गसंनिविष्टं भगवतः शूलपाणेः सिद्धायतनं ददर्श। तत्र पवनोद्धूतैरितस्ततः समापतद्भिः केतकीगर्भधूलिभिर्धवलीक्रियमाण
कायः पशुपतिदर्शनहेतोर्वेलादिवजनितापाद्यमानो भस्मच्छुरितमायतनप्रदेशपुण्यैरिव परिगृह्यमाणः प्रविश्याद्राक्षीत्। च
तुरशीमनेन स्फटिकमंडपिकातलप्रतिष्ठितम् चिरोद्धृतैराश्रमैर्दलशिखरगलज्जलबिंदुभिरुद्धविपाटितचंद्रबिंबदलैरिव

च१

निजाट्टहासावयवैरिवशेषफणाशकलैरिवपाँजन्यसहोदरैरिवक्षीरोदहृदयाकारैरुपपादितमौक्तिकमुकुटविभ्रमैः
शुचिभिर्मंदाकिनीपुंडरीकैःकृतार्चनममलमुक्ताशिलाघटितलिंगमशेषत्रिभुवनवंदितचरणंचराचरगुरुंचतुर्मुखंभ
गवंतंत्र्यंबकं।तस्यचदक्षिणांमूर्तिमाश्रित्याभिमुखीमासीनामुपरचितब्रह्मासनामतिविस्तारिणासर्वदिङ्मुखव्याव
केनप्रलयविघ्नुतक्षीरपयोधिपयःपूरपांडुरेणातिदीर्घकालसंचितेनतपोराशिनेवसर्वतोविसर्पता।पादपांतरैस्ति
स्रोतोजलनिभेनपिंडीभूयवदवैर्हत्तेवदेहप्रभावितानेनसगिरिकाननंदंतमयमिवतंप्रदेशंकुर्वतीमन्ययैवधवलयंतीकै
लासगिरिमंतर्दंतुरपिलोचनपथप्रविष्टेनस्वेतिमानमिवमनोनयंतीमतिधवलप्रभापरिगतदेहतयास्फटिकगृहगता
मिवदुग्धसलिलमग्नामिवविमलचीनांशुकांतरितामिवादर्शतलसंक्रां[illegible]पितशरदभ्रपटलतिरस्कृतामिवापरिस्फु
टविभाव्यमानावयवांपंचमहाभूतमयमयहायइव्यात्मकसंगनिष्पादनोपकरणकलापंधवलगुणेनेवकेवलेनोत्पा ९५

106

दितां दक्षाध्वरक्रियामिवोद्धतगणकचग्रहभयोपसेवितञ्चंवकोरतिमिव मदनदेहमिव सिंहरप्रसादनार्थमागृहीतहरारा
धनां क्षीरोदधिदेवतामिव सहवासपरिचितहरचंद्रलेखोत्कंगकृष्टामिंदुमूर्तिमिव स्वमांतुमयकृतत्रिनयनशरगागमनामैरा
वतदेहच्छविमिव गजाजिनावगुंठनोत्कंठितशितिकंठचिंतितोपनतांपशुपतिदंष्ट्रिरामुरवहासच्छविमिव निर्गत्यकृतावस्थानां
शरीरिणीमिव हरोद्गूरुनस्मृतिमाविर्भूतांज्योत्स्नामिव हरकंठंगवकारविद्रवनोद्यमप्राप्तांगौरीमनःशुद्धिमिव कृतदेहपरिग्रहां
कार्तिकेयकौमारव्रतक्रियामिव मूर्तिमतींगिरिशाद्धसमरे हद्युतिमिव पृष्ठगवस्थितामायतनतरुकुसुमसमृद्धिमिव शंकरार्थ्यवर्तिनीं
यस्वयमुद्यतां पितामहतपःसिद्धिमिव महीतलमवतीर्णामादियुगप्रजापतिकीर्तिमिव सप्तलोकभ्रमणखेदविश्रांतां जयीमिव कलि
युगध्वंस्पर्शशोकगृहीतवनवासामागामिकृतयुगबीजकलामिव प्रमदाह्रस्येणावस्थितां देहवतीमिव मुनिजनध्यानसंपद
ममरगजवीथीमिवाभ्रगंगाभ्यागमवेगपतितां कैलासश्रियमिव दशमुखोन्मूलनक्षोभनिपतितां श्वेतद्वीपलक्ष्मीमिवान्य

का०२ द्वीपांतरावलोकनकुतूहलागतां काशकुसुमविकाशकांतिभिव शरत्समयमुदीर्णमाणांशेषशरीरच्छायामिव रसातलमपत्य
१०६ य निर्गतां सुशल्लायुधेरूप्रभामिव मधुमदविह्वलानीयास विगलितां शुक्लपक्षपरंपरामिव पुंजीकृतां सर्वहंसैरिव धवलतया
कृतसंविभागां धर्महृदयादिव निर्गतां शंखादिवोत्कीर्णां मुक्ताफलादिवाकृष्टां मृणालैरिव विरचितावयवां दंतदलैरिव घ
टितां मिंदुकरकूर्चकैरिव प्रक्षालितां वर्णसुधाच्छटाभिरिव च्छुरितां अमृतफेनपिंडैरिव पांडुरीकृतां पारदरसधाराभिरिव धौतां
रजतद्रवेणेव निर्घृष्टां चंद्रमंडलादिवोत्कीर्णां कुटजकुंदसिंदुवारकुसुमच्छविभिरिवोल्लासितामियत्तामिव धवलिम्नः स्कंधावल
बिनीभिरुदयतस्ताम्रार्कबिंबदुद्भूत बालरश्मिप्रभाभिरिव निर्मिताभिरुन्मिषत्पिंजररत्नेजस्ताभिराभिः रचिरज्ञानावस्थितंवि
रलवारिकणतयाजरामलग्नपशुपतिचरणभस्मरज्जभिरिव जटाभिरुद्भासितशिरोभागां जटापाशग्रथितभुजंग भोगे
नमणिमयं नामांकमीश्वरचरणद्वयमुद्वहंतीरविरथतुरगखुरक्षुण्णतन्दुनच्छोदविशदेन भस्मना कृतललाटप १०६

108

ह्रिकां शिखरशिलाश्लिष्टशशांककलामिव शैलराजमेखलां मत्तत्वमक्तिप्रसाधितया लक्ष्यीकृतलिंगया द्वितीय
येव पुंडरीकमालया हृष्टासंभावयंती भूतनाथमनवरतगीतपरिस्फुरिताधरपुटवशाद्दंतिस्तुतिभिः शुद्धहृदयमसूरवै
रिव गीतगुरोरिवस्तुतिवर्णैरिव स्फुरितैर्मद्भिर्मुखान्निष्यतद्भिर्दशनांशुभिः पुनरुक्तयंती गौरीपतिमतिविमलैश्चवेदार्थैरि
वसाक्षात्पितामहमुखादाकृष्टैर्गायत्रीवर्णैरिवग्रथनानुयगतैर्नारायणनाभिपुंडरीकवीजैरिवोद्धृतैः सप्तर्षिभिरिवकर
स्पर्शपूतमात्मानमिच्छद्भिस्तारकाद्भुयेणागतैरामलकीफलस्थूलैर्मुक्ताफलैरुपरचितेनाक्षवलयेनाधिष्ठितकराग्रभागां।
परिवेशपरिगतचंद्रमंडलामिव पौर्णमासीं निशामघोमुखरुहरशिरःकपालमंडलाकारेणाभोगवहारकलशकांतिनास्तनयुग
लेनैकहंसमिथुनसनाथामिव श्वेतगंगां गौरीसिंहसटामयेनेवचामररुचिराकृतिनास्तनयुगलमध्यनिबद्धयेथिनाकल्प
तरुलतावल्लोलेनकृतोत्तरीयकृत्यामतुग्मलोचनसकाशात्प्रसादलब्धेन चूडामणिचंद्रमयूखेनेव मंडलीकृतेनवल्लस्सू

ज्ञाले१

का॰सू॰ २०७

त्रेणपवित्रीकृतकायामाप्रपदीनेनचस्वभावसितेनापिब्रह्मासनवंशेनेवचरणतलप्रभापरिष्वंगाल्लोहितायमाने
नडुकूलपटेनशारदनितंबांयौवनेनापिस्वकालोपसर्पिणातिर्विकारविनीतेनशिष्येणेवोपास्यमानांलावण्येनापि
कृतपुण्येनेवस्वछात्मनापरिगृहीतांरूपेणापिसुचिरलोचनेनविगतचापलेनायतनस्थेनेवसेवितांमुक्तांगगतांचस्वसु
तामिवसूक्ष्मशंखखंडिकांगुलीयकस्फुरितांगुलिनात्रिपुंड्रकावशेषभस्मपांडुरेणप्रकोष्ठबद्धशंखखंडकेननखमयूखद
तुरतयागृहीतदंतकोणेनेवदंतमयींदक्षिणकरेणवीणामास्फालयंतीप्रत्यक्षामिवगंधर्वविद्यांमातामंडपिकासंमल
ग्नाभिरनानुरूपाभिःसहचरीभिरिवसवीणाभिःप्रतिमाभिरुपेतांसुधूनाईलिंगसंक्रांतप्रतिबिंबतयातिप्रबलभक्त्या
राधितस्यहृदयमिवप्रविष्टांहरस्यहारलेखयेवप्रासक्तकंठयोगयाग्रहपंक्त्येवबहुवप्रतिबद्धयाकुंडयेवदरमुखवर्णां २०७
यामसयेवहीरगीतमंद्रतारयाउन्मनयेवानेककृततालयामीमांसयेवानेकभावनानुविद्धयागीत्यादेवंविरूपाक्षमुप

वीणायंतीमतिमधुरगीतावकृष्टैर्ध्यानमिवाभ्यस्यद्भिर्निश्चलकर्णपुटैर्मृगवराहवानरवारणशरभसिंहप्रभृतिभिर्वन
चरैरावद्धमंडलैराकर्ण्यमानगीतामुदिहृविपंचीघोषाममरापगामिवनभसोवतीर्णांदीक्षितवाचमिवाप्राकृतांत्रिपुर
रिशरशलाकामिवतेजोमयींपीतामृतामिवविगततृष्णामीशानशिरःशशिकलामिवानुयजातरागाममथितोदधिजल
108 संभवांमिवांतःप्रसन्नामसमस्तपदस्पृष्टामिवाद्दंडांबौद्धबुद्धिमिवनिरालंबनांवैदेहीमिवप्राज्ञज्योतिःप्रवेशांद्यूतकलाकुश
लामिववशीकृताक्षहृदयांमहीमिवजलभृतदेहांहिमसमयदिनमुखलक्ष्मीमिवपरिपीतभास्करातपांभार्यामिवसमुपा
त्तप्रतिग्रहांचित्तमात्रामालिखितामिवाचलावस्थानांस्तंभमयीमिवतनुच्छायानुलिप्तभूतलांनिर्ममांनिरहंकारांनिर्म
त्सराममानुषाकृतिंदिव्यत्वादन्यथाज्ञायमानवयःप्रमाणामष्टादशवर्षदेशीयांमिवोपलक्ष्यमाणांप्रतिपन्नपाशुपतव्र
तांकन्यकांददर्श। ततोवतीर्यतरुशाखायांबद्ध्वातुरंगमुपसृत्यभगवतेभक्त्याप्रणम्यत्रिलोचनायतामेवदिव्ययोषित

का॰सू॰ मनिमिषपक्ष्मणानिश्चलेननिबद्धलक्ष्येणचक्षुषापुनर्निरूपयामास।उदपादिचास्यतस्यारूपसंपदाकांत्याप्रशां
१०८ त्याचाविर्भूतविस्मयस्यमनसि।अहोजगतिजंतूनामसमर्थितोपनतान्यापतंतिवृत्तांतांतराणि।यथाहिमयास्य मृ
गयायांयदृच्छयानिरर्थकमनुबध्नतातुरगमिथुनमयमतिमनोहरोमानवानामगम्योदिव्यजनसंचरणोचितः
प्रदेशोवीक्षितःस्थितेऽत्रस्वच्छसलिलमध्येसमारोहन्हृदयहारिसिद्धजनोपस्पृष्टजलंसरोदृष्टंतत्तीरलेखाविश्रां
तेनचामानुषगीतमाकर्णितं।तच्चानुसरतामानुषदुर्लभदर्शनादिव्यकन्यके॰यमालोकिता।नहिमेसंशीतिरस्यादि
व्यतांप्रतिआकृतिरेवानुमापयत्यमानुषतां।कुतश्चमर्त्यलोकेसंभूतिरेवंविधानांगांधर्वध्वनिविशेषाणां।तद्यदिमेस
हसादर्शनपथान्नापयातिनारोहतिवाकैलासशिखरंनोत्पततिवागगनतलंततःकात्वंकिम॰भिधानावाकिम
र्थंवास्मिन्प्रथमेवयसिप्रतिपन्नाव्रतमितिसर्वमेतदेनामुपसृत्यपृच्छामि।अतिमहानयमवकाशआश्चर्याणामित्यव १०८

109

चार्यतस्यामेवस्फटिकामंडपिकायामन्यतमंस्तंभमाश्रित्यसमुपविष्टोगीतसमाप्त्यवसरंप्रतीक्षमाणस्तस्थौ।अथ
गीतावसानेतूष्णींभूतवीणाप्रशांतमधुकरमधुररुतेवकुमुदिनीसाकन्यकासमुत्थायप्रदक्षिणीकृत्यकृतहरप्रणामापरि
वृत्यस्वभावधवलयातपःप्रभावप्रगल्भयादृष्ट्यासमाश्वासयंतीवपुण्यैरिवस्पृशंतीतीर्थजलैरिवप्रक्षालयंतीतपोभिरिवपाव
यंतीशुद्धिमिवकुर्वाणावरप्रदानमिवोपपादयंतीपवित्रतामिवनयंतीचंद्रापीडमावभाषे।स्वागतमतिथये।कथमिमांभूमिमनुप्रा
प्तोमहाभागस्तदुत्तिष्ठागम्यतामनुभूयतामतिथिसत्कारइति।एवमुक्तस्तुतयासंभाषणमात्रेणैवानुगृहीतमात्मानंमन्यमानः
उत्थायभक्त्याकृतप्रणामोभगवतियथाज्ञापयसीत्यभिधायदर्शितविनयःशिष्यवत्तांव्रजंतीमनुवव्राज।व्रजंश्चसमर्थयामासहं
ततावदियंमांदृष्ट्वातिरोभूता।कृतंहिमेकुतूहलेनप्रश्नाशयाहृदिपदं।यथाचेयमस्यारूपमखिलजनदुर्लभमपिसुलभायाअपिदाक्षिण्या
तिशयप्रतिपत्तिरभिजाताविभाव्यतेतथासंभावयामिनियतमियमखिलमात्मोदंतमभ्यर्थ्यमानामयाकथयिष्यतीत्येवंचकृ

च २

का०पू० २०८ तमनिःपदशतमात्रमिवगत्वानिरंतरैर्दिवापिरजनीसमयमिवदर्शयद्भिस्तमालतरुभिरंधकारितपुरोभागामुक्तकुसुमेषु
लताकुंजेषुकूजतांमंदंमंदंमदमत्तमधुलिहांविरुतिभिर्मुखरीकृतपर्यंतामनिर्झरपातिनीनांचबहलशिलातलप्रतिघातोत्पत
नफेनिलानामपांप्रवाहेणोरुत्कोटिग्रावविटंकविपाट्यमानैरुच्चरद्भिर्निर्भरवशीर्यमाणानुसारशिशिरशीकरासारैराच
म्यमाननीहारांहिमहारहरहाससवर्णैश्चामयतःस्फुरद्भिर्निर्झरैर्दूरावलंबितचलच्चामरकलापामिवोपलक्ष्यमाणामंतःस्था
पितमणिकमंडलुमंडलामेकांतावलंबितयोगपट्टिकांविशाखिकाशिखरनिबद्धनालिकेरीफलवल्कलमंत्रौनोपानद्युपेता गो४
मवशीर्णागमस्थूसरवल्कलशयनीयसनाथैकदेशामिंदुमंडलेनेवटंकोत्कीर्णेनशंखमयेनभिक्षाकपालेनाधिष्ठितांस
न्निहितभस्मालाबुकांगुहामद्राक्षीद्तस्याश्चद्वारिशिलातलेसमुपविष्टोवल्कलशयनशिरोभागविन्यस्तवीणांततःपराप्र
ष्टनिर्भरादागृहीतमर्घ्यसलिलमादायतांकन्यकांसमुपस्थितामलममतियंत्रणयाकृतमतिप्रसादेनभगवतिप्रसीदविसृ २०८

य७

110

च्यंतामयमत्यादरस्त्वदीयमालोकनमपिसर्वपापप्रशमनमत्रसर्वेणाभिवपवित्रीकरणायालंभास्यतामित्यब्रवीत्।अनु
बध्यमानश्चतया तां सर्वामतिथिसत्क्रियामतिदूरावनतेनशिरसासप्रश्रयंजग्राह।कृतातिथ्ययाचतया द्वितीयशिलातलो
पविष्टयाक्षणमिवतूष्णीं स्थित्वाक्रमेणपरिपृष्टोदिग्विजयादारभ्यकिंनरमिथुनानुसरणप्रसंगेनागमनमात्मनःसर्व
माचचक्षे।विदितसकलवृत्तांताचोत्थायसाकन्यकाभिक्षाकपालमादायतेषामायतनतरूणांतलेषुविचचार।अचिरेणच
तस्याःस्वयंपतितैःफलैरापूर्यतभिक्षाभाजनं।आगत्यचतेषामुपयोगायनियुक्तवतीचंद्रापीडं।आसीच्चास्यचेतसिनास्तिखल्व
साध्यंतपसां।किमतःपरमाश्चर्यंयदव्यपगतचेतनाअपिसचेतनाइवास्यैभगवत्यैसंमतिसृजंतःफलान्यात्मानमुपपादयं
तिवनस्पतयः।चित्रमिदमालोकितमस्माभिरदृष्टपूर्वमित्यधिकतरोपजातविस्मयश्चोत्थायतमेवप्रदेशमिंद्रायुधमानीयव्यप
नीतपर्याणंनातिदूरेसंयम्यनिर्झरजलेनिर्वर्तितस्नानविधिस्तान्यमृतरसस्वादूनि उपभुज्यफलानिपीत्वाचतुषारशिशिरंप्रस्रव

नाम३

ग४ छु१

का॰पू॰ ११० ाजलमुपस्पृश्यैकान्ते तावद्वत्स्य यावत्तयाधिकन्यया आहृतो जलफलमूलमयेष्वाहारैः प्रणयइति। परिसमापिताहारो
निर्वर्तितसंध्योचिताचारो शिलातले विश्रब्धमुपविष्टां निभृतमुपसृत्य नातिदूरे समुपविश्य मुहूर्त्तमिव स्थित्वा चंद्रापीडः स
विनयमब्रवीत्। भगवति त्वत्प्रसादजन्मना हि कौतूहलेनाकुलीक्रियमाणो मानुषतासुलभेन लघिम्ना बलादनिच्छं
तमपि मां प्रश्नकर्मणि नियोजयति। जनयति हि प्रभुप्रसादलवोपि प्रागल्भ्यमधीरप्रकृतेः। स्वल्पाप्येकदेशावस्थानकाल
कला परिचयमुत्पादयति। अणुरप्युपचारपरिग्रहः प्रणयमारोपयति। तद्यदि नातिखेदकरमिव ततः कथ्यतां आत्मानमनुग्रा
ह्यमिच्छामि। अतिमहद्भवद्दर्शनात्प्रभृति कौतुकमस्मिन्विषये कतरन्मरुतामृषीणां गंधर्वाणां गुह्यकानामप्सरसां वा कुल
मनुगृहीतं भगवत्या जन्मना। किमर्थं वास्मिन्कुसुमसुकुमारे नवे वयसि धृतमहद्वतं क्वेदं नयः क्लेशमाकृतिः क्वचायं लावण्या
तिशयः क्वेयमिंद्रियाणामुपशांतिस्तदद्भुतमिव मे प्रतिभाति किं निमित्तं चानेकसिद्धसाध्यसंबाधानि सुरलोकसुभगान्यप २२०

मे ३

हा यदिव्याश्रमपदानि एकाकिनी वनमिदं समानुयम विवससि ।कथ्थायं प्रकारो यैस्तैरेव पंचभिर्महाभूतैरारब्धमीदृशं वव
स्तां वत्ते शरीरं ।नेदमस्माभिरन्यत्र दृष्टं श्रुतं सर्वमपनयतु नः [illegible] कौतुकमावेदयतु भवती सर्वमिदमित्येवमभिहि
ता सा किमप्यंतर्ध्यायंती तूष्णीं मुहूर्तमिव स्थित्वा निश्वस्य स्थूलस्थूलैरंतर्गतो हृदयस्य द्विमिवाशयनिर्गछद्भिरिंद्रि
यप्रसादमिव वर्षद्भिस्तपोरसनिस्यंदमिव स्रवद्भिर्लोचनविषयं मवलिमानमिव द्रवीकृत्य पातयद्भिरछाच्छैरमलकपोल
स्थलस्खलितैरव शीर्णहारमुक्तमुक्ताफलतरलपातैरनुबद्धविंदुभिर्वल्कलोहृतकुचशिखरजर्जरितशीकैरस्रुभिरा
मीलितलोचना निःशब्दं रोदितुमारेभे ।तां च प्ररुदितां दृष्ट्वा चंद्रापीडस्तत्क्षणमचिंतयत् ।अहो दुर्निवारता व्यसनोपनि
पातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां कुर्वंति ।सर्वथा न न कंचन स्पृशंति शरीरधर्माणामुपतापाः ।ब
लवती हि द्वंद्वानां प्रवृत्तिः ।इदमपरमधिकतरमुपजनितं महन्मनसि मे कौतुकमस्या बाष्पसलिलपातेन ।न स्वल्पीयसा

शोककारणेन स्त्रीक्रियन्ते एवंविधा मूर्त्तयः।न हि कुसुमनिर्घातपाताभिघाताच्चलति वसुधेति संवर्द्धितकुतूहलश्च शोकस्य
रणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादंजलिना मुखप्रक्षालनोदकमुपनिन्ये।सा तु तदनुरो
धादविच्छिन्नबाष्पजलधारासन्तानापि किंचित्कषायितोदरे प्रक्षाल्य लोचने वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णं च
निःश्वस्य शनैः प्रत्यवादीत्।राजपुत्र किमनेनातिनिष्ठुरहृदयाया मम मन्दभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तां
तेनाश्रवणीयेन श्रुतेन।तथापि यदि महत्कुतूहलं तत्कथयामि श्रूयताम्।एतत्प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषय
मापतितमेव यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्तीति तासां च चतुर्दश कुलानि एकं भगवतः कमलयोनेर्मनसः
समुत्पन्नमन्यद्वेदेभ्यः संभूतमन्यदग्नेरुद्भूतमन्यत्पवनात्प्रसूतमन्यदमृतान्मथ्यमानादुत्थितमन्यज्जलाज्जातमन्यद
र्ककिरणेभ्यो निर्गतमन्यत्सोमरश्मिभ्यो निःपतितम् ‸ द्भूमेरुद्भूतमन्यत्सौदामिनीभ्यः प्रवृत्तमन्यन्मृत्युना निर्मितमप १११
न्य‸

112

रंभकरकेतुनासमुत्पादितमन्यत्तुदक्षस्यप्रजापतेर्[illegible]तीनांसुतानांमध्येद्वेसुतेमुनिररिष्टाचवभूवतुस्ताभ्यांगंधर्वैःस
हकुलद्वयंजातमेवमेतान्येकत्रचतुर्दशकुलानिगंधर्वाणांतुदक्षात्मजाद्वितयसंभवंतदेवकुलद्वयंजातं।अत्रतुमुनेस्तनय
श्चित्रसेनादीनांपंचदशानांभ्रातृणामधिकोगुणैःषोडशश्चित्ररथोनामसमुत्पन्नःसकिलत्रिभुवनप्रख्यातपराक्रमो
भगवतासमस्तसुरमौलिमालालालितचरणारविंदेनाखंडलेनसुहृच्छब्देनोपबृंहितप्रभावःसर्वेषांगंधर्वाणामाधि
पत्यमसिलतामरीचिनिचयमेचकितेनवाहुनासमुपार्जितंशैशवएवाभवत्।इतश्चनातिदूरेतस्यास्माद्भारतवर्षा
दुत्तरेणानंतरेकिंपुरुषनाम्निवर्षेवर्षपर्वतोहेमकूटोनामनिवासस्तत्रचतद्भुजयुगपरिपालितान्यनेकानिगंध
र्वशतसहस्राणिप्रतिवसंतितेनैवचेदंचैत्ररथंनामातिमनोहरंकाननंनिर्मितमिदंचाच्छोदाभिधानमतिमहत्सरः
खानितंअयंचभवानीपतिरूपरचितोभगवान्।अरिष्टायास्तुपुत्रस्तुंबुरुप्रभृतीनांसोदर्याणांषण्णांज्येष्ठोहंसोनाम

का०ट्ट०
११२

जगद्विदितोगंधर्वस्तस्मिन्द्वितीयेगंधर्वकुलेगंधर्वराजेनचित्ररथेनैवाभिषिक्तोबालएवराज्यपदमासादितवान्।अपरिमि
तगंधर्वबलपरिवारस्यतस्यापिसएवगिरिरधिवासः।यत्तुतत्सोममयूखसंभूतमप्सरसांकुलंतस्मात्किरणजलानुसारम
लितेनसकलेनैवरजनिकरकलाकलापलावण्येननिर्मितात्रिभुवननयनाभिरामाभगवतीद्वितीयेवगौरीगौरीतिना
म्नाहिमकरकिरणावदातवर्णाकन्यकाप्रसूता।तांचसद्वितीयगंधर्वकुलाधिपतिर्हंसोनाममंदाकिनीमिवक्षीरसागरः
प्रणयिनीमकरोत्।सातुभगवतामकरकेतनेनेवरतिःशरत्समयेनेवकमलिनीहंसेनसंयोजितासदृशसमागमोपज
नितामतिमहतींमुदमुपगतवतीनिखिलांतःपुरस्वामिनीचाभवत्।तयोश्चतादृशयोर्महात्मनोरहमीदृशीविगतलक्षणा
शोकायकेवलमनेकदुःखसहस्रभाजनमेकैवात्मजासमुत्पन्ना।तातस्त्वनपत्यतयासुतजन्मातिरिक्तेनमहोत्सवेनाभिनं
दितवान्।साहंपितृभवनेबालतयाकलमधुरप्रलापिनीवीणेवगंधर्वाणामंकादंकंसंचरंतीअविदितशैशवाकायासम ११२

अथाप्रेवदरामेकुं...नयपोचित... ...

113

नोहरं शैशवमतिलीनवती। क्रमेण च कृतं मे वपुषि वसंत इव मधुमासेन मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कु-
सुम इव मधुकरेण मधुकर इव मदेन मद इव नवयौवनेन पदं। अथ विजृंभमाणे नववनलिनवनेषु अकठोरचूतकलि-
काकलापकृतकार्मुकोत्कलिकेषु कोमलमलयमारुतावतारतरंगितानंगध्वजांशुकेषु मदकलितकामिनीगंडूषसीधुसेक-
पुलकितवकुलेषु मधुकरकुलकलंककालीकृतकालेयकुसुमकुड्मलेषु अशोकतरुताडनारणितरमणीमणिनूपुर-
झंकारसहस्रमुखरेषु विकसन्मुकुलपरिमलपुंजिताल्लिजालमंजुसिंजितसुभगसहकारेषु अविरलकुसुमधूलिवालुकापुलि-
नधवलितधरातलेषु मधुमदविडंबितमधुकरीकैः कृतसंवाह्यमानलतादोलेषु उत्फुल्लपल्लवलवलीलीलायमानमत्तकोकिलो-
ल्लासितमधुशीकरोद्दाममधुदिनेषु घोषितजनजायाजीवोपहारहृष्टमन्मथेषु मन्मथास्फालितचापरवभयस्फुरितपथिकहृद-
यरुधिरार्द्रे[illegible]ष्विव किंशुकसमाकीर्णमार्गेषु अविरतपतत्कुसुमशरयंत्रितपत्रस्फुटकारवधिरीकृतदिङ्मुखेषु दिवापियवृ

देव२

सार्

कान्द्र न्तांतर्मदनरागो वाभिसारिकार्थसंकुलेषु उद्देखरतिरससागरष्लरष्लावितेषु सकलजीवलोकहृदयानंददायकेषु मधु

११३ मासदिवसेषु एकदाहमेवं वयासहमधुमासदिवसा शितशोभं प्रोत्फुल्लनवनलिनकुमुदकुवलयकह्लारमिदमच्छोदं सरः स्ना

तुमभ्यगां । अत्र च स्नानार्थमागतया भगवत्या [illegible] पार्वत्या तटशिलातलेषु विलिखितानि सन्ध्या गि[illegible]रीतिपा

स्तुतिमयरूपशपदमंडला भुषितमुनिजनप्रणामप्रदक्षिणानिर्झरवकपतितिबिंबकानि वंदमाना भ्रमरभरभुग्नगर्भकेसर

जर्जरकुसुमोपहाररम्योयं लतामंडपः । परभृतनखकोटिपाटितकुड्मलनालविवरविगलितमधुनिकरधारः सुधिष्ठितो

यं सहकारतरुः उन्मदमयूरकुलकलकलभीतभुजंगमुक्तशिला शिशिरेयं चंदनवनवीथिका । विकचकुसुमपुंजपातसू

चितवनदेवताप्रेंखोल्लनशोभनेयं लतादोला बद्धकुसुमरजः परस्परमग्नकलहंसपदलेखमसिरभणीय मिदं तीरतरुत

लमिति स्निग्धमनोहरतरादेशदर्शनलोभाक्षिप्तहृदयासखीजनेन अचरं । एकस्मिंश्च प्रदेशे भगितिवनानिलेनोपनीतं ११३

ह२ मह पाटळी४

निर्भरविकासितेपिकाननैरभिभूतान्यकुसुमपरिमलं विसर्पंतमतिसुरभितयानुलिंपंतमिवतर्पयंतमिवपूरयंतमि
वघ्राणेंद्रियमहमहमिकयामधुकरकुलैरनुवध्यमानमनाघ्रातपूर्वममानुषलोकोचितंकुसुमगंधमभ्यजिघ्रं कुतोय
मित्युपारूढकुतूहलश्चाहंमुकुलितलोचनस्तेनकुसुमगंधेनमधुकरीवाकृष्यमाणाकौतुकतरलाभ्यधिकतरोपजाततनू
पुरमणिझंकाराकृष्टसरःकलहंसानिकतिचित्पदानिगत्वाहरहुताशनेनधवलीकृतमदनशोकविधुरं वसंतमिवतपस्यंतं
114 माखिलमंडलप्राप्त्यर्थमीशानशिरःशशांकमिवकृतव्रतमयुगललोचनवशीकृतकामंकाममिवस[illegible]नियमतितेजस्वित
याप्रचलत्तडिल्लतापंजरमध्यगतमिवग्रीष्मदिवसदिवसकरमंडलोदरप्रविष्टमिवज्वलनज्वालाकलापमध्यस्थितमिव
विभाव्यमानमुनिमिवस्निग्धवहुलवहुलयादीपिकालोकपिंगलयादेहप्रभयाकपिलीकृतकाननंकनकमयमिवतंप्रदेशं
कुर्वाणंगोरोचनारसक्षालितप्रतिसरसमानसुकुमारपिंगलजटंपुण्यपताकायमानयासरस्वतीसमागमोत्कंठीकृतचंद्र

का॰ ५८ नलेखयेव भस्मललाटिकया वालपुलिनलेखयेव गंगाप्रवाहमुद्भासमानं। अनेकशापभंकुरितभवनतोरणेन भ्रूलता
११८ द्वयेन विराजितमत्यायततया लोचनमयीं मालामिव ग्रथितामुद्वहंतं सर्वकर्णशोभिदत्तलोचनशोभासंविभागमायतेन तुं
गश्रुतिवंशमप्राप्तहृदयप्रवेशेन तनयोक्तरागेणेव सर्वात्मना पारवशीकृतनाधररुचं मनुद्भिन्नश्मश्रुराजितवदनास
दितमधुकरावलीवलयपरिक्षेपविलासमिव बालकमलमाननं रसानमनंगकार्मुकगुणेनेव कुंडलीकृतेन तपस्तडाग
कमलिनीसूत्रजालेनेव यज्ञोपवीतेनालंकृतमेकेन सनालवकुलफलाकारेकमंडलुमयेन मकरकेतुविनाशशोक
रुदितायारतेरिव बाष्पजलबिंदुभिरारचितां स्फटिकगुलिकाक्षमालां करेणाकलयंतं। अनेकविद्यापगासंगमावर्त्त
निभयानाभिचक्रेणोपशोभमानमंतर्ज्ञाननिराकृतस्य मोहांधकारस्यापयानपद्धतीमिवांजनरजोलेखाश्यामलां रोम ११८
राजिमुदरेणातनीयसीं बिभ्राणमात्मतेजसा विजित्य सवितारमागृहीतेन परिवेषमंडलेनेव मौंजमेखलागुणेन प

शिरसिजत्वनमागमभ्रगंगास्रोतोजलप्रक्षालितेनजरच्चकोरलोचनपुटपाटलकांतिनामंदारस्तबकेनोपपादितोव
रवयोजनमलंकारमिवब्रह्मचर्यस्ययौवनमिवधर्मस्यविलासमिवसरस्वत्याःस्वयंवरपतिमिवसर्वविद्यानांसंकेत
स्थानमिवसर्वश्रुतीनांनि॰ दाघकालमिवसाग्डहिमसमयकाननमिवस्फुरितप्रियंगुमंजरीगौरंमधुमासमिवकुसु
मधवलतितलकरतिस्थितसुखमामानुरूपेणासवयसापरेणदे[illegible]तार्चनकुसुमान्युच्चिन्वतातापसकुमारेणानुगत
मतिमनोहरंस्नानार्थमागतंमुनिकुमारकमपश्यं।तेनचकर्णा[illegible]सीकृतांवसंतदर्शनानंदितायाःस्मितप्रभामिवब
नश्रियोमलयमारुतागमनार्थलाजांजलिमिवमधुमासस्य[illegible]लीलामिवकुसुमलक्ष्म्याःसुरतपरिश्रमस्वेदजलल
कणजालकावलीमिवरतेर्भ्रजविरुहचामरपिच्छिकामिवमनो[illegible]स्यमधुकरकामुकाभिसारिकाकृतिकातारास्तबक
नुकारिणीममृतबिंदुनिस्यंदिनींमहस्पृहदीकुसुममंजरीमपश्यं।अस्याःपरिमलान्यकुसुमामोदानवयंपरिमलइति

का॰सू॰ मनसा निश्चित्य तं तयोर्वनस्युवानमीक्षमाणा रुमचिंतयं । अहो रूपातिशयनिष्पादनोपकरणकोशस्याक्षीणता वि
२२५ धातुर्यत्त्रिभुवनाद्भुतरूपसंभारं भगवंतं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपातिशयराशिरयमपरोऽपुनि
र्माणमयो मकरकेतुरुत्पादितः मन्ये च सकलजगन्नयनानंदकरं शशिबिंबं विरचयता लक्ष्मीलीलावासभवनमिति क
र४ मलानि सृजता प्रजापतिना प्रथममेतद्वदनाकारकरणकौशलाभ्यास एव कृतः । अन्यथा किमिव हि सदृशवस्तु विरच
नायां कारणमन्तीकं चेदं यथा किल सकलाः कलाः कलावतो बहुलपक्षे क्षीयमाणस्य सुषुम्नानाम्नो रश्मिरापिबतीति ताः
खल्वस्य गभस्तयः समस्ता वपुरिदमाविशंतीति । कुतोऽन्यथा रूपापहारि क्लेशबहुले तपसि वर्तमानस्येदं लावण्यमिति
चिंतयंतीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती नवयौवनसुलभः कुसुमायुधः कुसुमसमयमद इव मधु २२५
करीं परवशामकरोत् । उच्छ्वसितैः सह विस्मृतनिमेषेण किंचिदाकुलितपक्ष्मणा जिह्मिततरलतरतारशारदेण इद

सु१ पि२ रश्मिन्यः४

116

ह्लिरोन वञ्जुमासस्पृहमाधिवस्तीव किमपि याचमानेव त्वदायत्तास्मीति वदन्तीवाभिमुखं हृदयमर्पयंती

व सर्वात्मना प्रविशंतीव तन्मयतामिव गंतुमीहमाना मनोभवाभिभूतां त्रायस्वेति शरणमिवोपयांती देहि मे हृदया

वकाशमित्यर्थितामिव दर्शयंती हाहा किमिदमसांप्रतमतिकृपणमकुलकुमारीजनोचितमिदं मयाप्रस्कृतमिति

जानानाप्यप्रभवन्ती करणानां स्तंभितेव लिखितेवोत्कीर्णेव संयतेव मूर्छितेव केनापि विष्टेनेव निस्पंदसकलाव

यवा तत्कालाविर्भूतेनावष्टंभेनाकथितशिक्षितेनानाख्येयेन स्वसंवेद्येन केवलं न विभाव्यते किं तद्रूपसंप

किंमनसा १ दा किं मनसिजेन किमभिनवयौवनेन किमनुरागेणोपदिश्यमाना किमन्येनैव केनापि प्रकारेणाहमपि न

जानामि कथं कथमिति तमतिचिरं व्यलोकयं। उत्क्षिप्य नीयमानेव तत्समीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव

हृदयेन स्पृष्टलज्जेर्यमाणेव पुष्पधन्वना कथमपि मुक्तप्रयत्नमात्मानमधारयं। अनन्तरं च मे मदनेनाव

मपि२२

मम४ काम — सुखः

का·पू· काशमिवसन्तुमाहितसंतानानिरीयुः श्वासमरुतः साभिलाषं हृदयमाख्यातुमिवस्फुरितमभूत्कुचयुग
२२६ लं। स्वेदसलिललवलेखाक्षालितेवागलद्धृङ्गज्ञा मकरध्वजशरनिकरपातत्रस्तेवाकंपत गात्रयष्टिः। तद्रूपाति
शयंद्रष्टुमिवकुतूहलादालिंगनलालसेभ्योंगेभ्यो निरगाद्रोमांचजालकं। अशोभत स्वेदांभसाधौतश्रवण
युगलोरिवहृदयमविशदनङ्गः। आसीच्चमनसि शान्तात्मनिदूरीकृतसुरतव्यतिकरेऽस्मिन्जनेमांनिक्षिपताबि
मिदमनार्येणासदृशमारब्धंमनसिजेन· एवंचनामातिमूढहृदयमंगनाजनस्य यदनुरागविषययोग्यतामपिवि
चारयितुंनालं क्वेदमतिभास्वरंधाम तेजसां तपसां च क्वचेमं प्राकृतजनाभिनंदितानि मन्मथपरिस्पंदितानि· नि
यतमयंमामेवमकरलांछनेनविडम्ब्यमानामुपहसतिमनसा चित्रंचेदंयदहमेवमवगच्छन्त्यपिनशक्नोम्यात्मनो
विकारमुपसंहर्तुं· अन्याअपिकन्यकास्त्रपामपहायस्वयमुपयाताः पतीन् अन्याश्चाप्यन्येनदुर्विनीतेनमन्म २२६

117

थेनोन्मत्ततां नीता नार्यो न पुनरहमेका। यथाकाममनेन स्त्रैणेनाकारमात्रालोकनाकुलीकृतमेवमस्वतंत्रता
मुपैत्यंतःकरणं कालो हि गुणाश्च दुर्निवारतामारोपयन्ति मदनस्य सर्वथा यावदेव सचेतना स्थिया वदेव च न
परिस्फुटमनेन विभाव्यते मदनदुश्चेष्टितलाघवमेतत्तावदेवास्मात्प्रदेशादपसर्पणं श्रेयः कदाचिदनभिमत
स्मरविकारदर्शनकुपितोयं शापाभिभूतां करोति मां॥ अदूरकोपा हि मुनिजनप्रकृतिरित्यवधार्यापसर्पणा
भिलाषिण्यहमभवम्॥ अशेषजनपूजनीया चेयं जातिरिति निकृत्वा तद्वदनाकृष्टदृष्टिप्रसरमचलितपक्ष्मम
लमदृष्टभूतलमीषदुल्लसितकर्णपल्लवोन्मुखकपोलमण्डलमालोलालकलतालसत्कुसुमावतंसमंसदे
शादोलायितमणिकुण्डलमुत्कंपितोन्नमितमस्तकन्यस्तैकहस्तपल्लवमस्मै प्रणाममकरवम्॥ अथ कृतप्रणा
मायामयि उत्कृष्टशासनतया भगवतो मनोभुवः मदजननतया मधुमासस्यातिरमणीयतया चैतस्य प्रदेशस्य

का॰सू॰ २२७ अविनयबहुलतयाचाभिनवयौवनस्यचंचलप्रकृतितयाचेंद्रियाणांदुर्निवारतयाचविषयाभिला
षाणांचपलतयाचमनोवृत्तेः तथाभवितव्यतयाचतस्यतस्यवस्तुनः किंबहुना ममममंदभाग्यतयादौ
रात्म्यादस्यवेधसः अस्यक्लेशस्यविहितत्वादिममपि मद्विकारदर्शनापहृतधैर्यप्रदीपमिवपवनस्तरलतामनय
दनंगः। तदातस्याप्यभिनवागतंमदनेप्रत्युक्तवानिवराभोक्रमः मत्सकाशमभिप्रस्थितस्यमनसोमार्गमिवो
पदिशद्भिःपुरःप्रवृत्तैःश्वासैः वेपथुप्रतभंगभीतेवावकंपनकरतलगताक्षमाला इतीयैवकर्णावसक्तकुसुमम
ञ्जरीकपोलतलसंगिनीसमुद्गच्छत्स्वेदसलिलशीकरजालिका मद्दर्शनप्रीतिविस्तारितस्यचोत्तानतारकस्य
पुण्डरीकमयमिवतमुद्देशमुपदर्शयतोलोचनयुगलस्यविसर्पिभिरंशुसन्तानैर्यद्रक्तयाछोदसलिलमप २२७
हायविकचकुवलयवनैरिवगगनतलसमुत्पतितैररुंधन्नन्यदाशादिशः॥ तयानुतस्यातिप्रकृष्ट्याविक्लवा

118

द्विगुणीकृतमदनावेगा तत्क्षणमदृष्टवर्णनयोग्यां कामप्यवस्थामन्वभवम्। इदं च मनस्यकरवम्।।
अनेकसुरतसमागमलास्यलीलोपाध्यायो मकरकेतुरेव विलासानुपदिशति· अन्यथा विविधरसासंगल
लितेषु। दृशोमुन्मतिकरेष्वप्रविष्टकुतूहलस्य जनस्य कुतश्चायमनभ्यस्तारनिरस निस्पन्दमिव रत्नी
अमृतमिव वर्षन्तीमदमुकुलितेव खेदालसेव निद्राजडेवानन्दभरमंथरतरलतारसंचारिणी।। अनिष्ट
तम्बूलतालासिनी दृष्टिः कुतश्चेदमतिनैपुण्यं यच्चक्षुमेवानङ्गशरमेवान्तर्गतो हृदयाभिलाषो कथ्यते।।
प्राप्तप्रसरा चापलस्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्।। भगवन् किंनाम भानः
कस्य चायं तपोधनस्य सुतः किंनाम्नस्तरोरियमनेनावतंसीकृता कुसुममञ्जरी· जनयति हि मे मनसि महत्कौ
तुकमस्याः समुत्सर्पन्नसाधारणसौरभोयमनाघ्रातपूर्वो गंध इति। स तु मामीषद्विहस्याब्रवीत्। बाले

का॰सू॰
११८

सकळ।

किमनेनदृष्टेनप्रयोजनं अथ कौतुकमावेदयामि श्रूयतां। अस्तिखलुत्रिभुवनप्रख्यातकीर्तिरत्यु
दारतपाःसुरसिद्धवृन्दवन्दितचरणयुगलोमहामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम। तस्यचभगवतःसु
रासुरलोकसुन्दरीहृदयानन्दकरमशोभत्रिभुवनसुन्दरमतिशायितनलकूबरंरूपमासीत्। सकदाचिद्देव
तार्चनकमलान्युद्धर्तुमैरावतमदबिन्दुबद्धचन्द्रकशतखचितजलांहरहासितसितस्नानसमन्दाकिनी
मवततार। अवतरंतंचतंतदाकमलवनेषुसंततसंनिहिताविकचसहस्रपत्रपुण्डरीकोपविष्टादेवीलक्ष्मी
र्ददर्श। तस्यास्तमवलोकयन्त्याःप्रेममदमुकुलितेनानन्दबाष्पभरतरंगतरलतारकेणलोचनयुगलेन
रूपमास्वादयन्त्याजातभिकारंमन्मथरमुखाविन्यस्तहस्तपल्लवायामन्मथविकृतंमनआसीत्। आलोकनमात्रे ११८
णचसमासादितसुरतावसानसुखायास्तस्मिन्नेवासनीकृतेपुण्डरीकेकृतार्थतात्रासीत्। तस्माच्चकुमा

रः समुदपादि ततस्तमुत्संगेनादाय सा भगवन्गृहाण तवायमात्मज इत्युक्त्वा तस्मै श्वेतकेतवे ददौ। असा
वपि बालजनोचिताः सर्वाः क्रियाः कृत्वा तस्य पुण्डरीकसंभवतया तदेव पुण्डरीक इति नाम चक्रे। प्रतिपादितव्रतं
च तमागृहीतसकलविद्याकलापमकार्षीत् सोयं· इयं च सुरासुरैर्मथ्यमानात्क्षीरसागरादुद्धृतः पारिजाततरो
ःपल्लवस्तस्य मंजरी। यथा चैनामनुचितविरुद्धमस्य श्रवणसंसर्गमासादितवती तदपि कथयामि। अद्य चतुर्दशीति
भगवन्तमम्बिकापतिं कैलासगतमुपासितुममरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्· निर्गत्य सा[illegible]
न्मधुमासलक्ष्मीदत्तहस्तावलम्बया बकुलमालिकामेखलया कुसुमपल्लवग्रथिताभिराजानुलम्बिनीभिः कं
ठमालिकाभिर्निरन्तराच्छादितविग्रहया नवचूताङ्कुरकर्णपूरया पुष्पासवपानमत्तया नन्दनवनदेवतया पा
रिजातकुसुममंजरीमिमामादाय प्रणम्याभिहितो भगवन्सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः

उलितर

का॰पू॰ १२९ सदृशोयमलंकारः प्रसादीक्रियतामियमवतंसविलासकुड्मलिता समारोप्यतां श्रवणशिखरं अजनुवसफलतां
जन्मपारिजातस्येत्येवमभिदधानां चाय मात्मनृपस्कृतिवाद त्रपावनमितलोचनस्तामनादृत्येव गंतुं प्रवृत्तः मयानुना
मनुयांती मालोक्यकौदाजस्स खेवक्रियतामस्याः प्रणयपरिग्रह इत्यभिधायवलादियमनिच्छतोप्यस्य कर्णपूरीकृता त
देनलोलाः स्मेनयोषयावेयंयथा चास्यश्रवणशिखरं समारूढा तत्सर्वमावेदितमितु स कवानितस्मिन्नतपोधनयुवा
किंचिदुपदर्शितस्मितो मामवादीत् । अयिकुतूहलिनि किमनेनप्रयासेन यदि रुचितसुरभिपरिमलग्रहणामित्यु
त्कासमुपसृत्यात्मीयात् श्रवणादपनीयकलेरलिकुलझंकारिणैः प्रारब्धरतिसमागमप्रार्थनामिव मदीयेश्रवणपुटे तामं १२९
कार्षीत् ममतु तत्करतलस्पर्शलोभेन तत्क्षणमपरमिव पारिजातकुसुममवतंसस्थाने हृदयमासीत् । सत्वमन्तकपोल
स्पर्शसुखेन तरलीकृताङ्गुलिजालकात्करतलादक्षमालां लज्जयासह गलितामपिनाज्ञासीत् ॥ अथाहं तामसंप्रा

पुस्तक॰२१

आह्वामेव भूतलमस्तमालां गृहीत्वा सलीलेत भुजपाशसंदानितकंठग्रहसुखमिवानुभवंती दर्शितापूर्वहारलता
लीलां कंठाभरणतामनयम्।इत्थं भूतेच व्यतिकरे छत्रग्राहिणी मामवोचत्। भर्तृ दारिके स्नाता देवी प्रत्यासीदति आ
हारकालस्तत्क्रियतां मज्जनविधिरिति· अहं तु तेन तस्याः वचनेन नवग्रहाकरिणी व प्रथमांकुशपातेन निःच्छया·
कथंकथमपि समाकृष्यमाणा तन्मुखलावण्यामृतपंकमग्नामिव कपोलपुलककंटकजाललग्नामिव मदनश
रशलाकाकीलितामिव सौभाग्यगुणस्यूतामिवातिकृच्छ्रेण दृष्टिमाकृष्य स्नातुमुदचलम्। उच्चलितायां च मयि
द्वितीयो मुनिदारकस्तथाविधं तस्य धैर्यस्खलितमालोक्य किंचित्प्रणयकोपइवावादीत्॥ सखे पुण्डरीक नैत
दनुरूपं भवतः। क्षुद्रजनक्षुण्णः कएष मार्गो धैर्यधना हि साधवः किं यः कश्चित् प्राकृत इव विक्लवी भवन्नमा
त्मानं न रुणत्सि कुतस्तवायमपूर्वो यमद्येन्द्रियोपप्लवः। येनास्येवं कृतः क्व तत्ते धैर्यं क्वासाविन्द्रियजयः क्व तद्

का॰ पू॰ १२० शीलत्वं चेतसः क्वासावशान्तिः क्व तत्कुलक्रमागतं ब्रह्मचर्यं क्वासौ सर्वविषयनिस्पृहता क्व ते गुरूपदेशाः क्व
तानि श्रुतानि क्व ता वैराग्यबुद्धयः क्व तदुपभोगविद्वेषित्वं क्वासौ सर्वसुखपराङ्मुखता क्वासौ तपस्यभिनिवेशः
क्वासौ भोगानामुपर्यरुचिः क्व तद्यौवनानुशासनं सर्वथा निष्फला प्रज्ञा निर्गुणो धर्मशास्त्राभ्यासः निरर्थकः संस्कारो
निरुपकारको गुरूपदेशविवेको निःप्रयोजना प्रबुद्धता निष्कारणं ज्ञानं यदत्रभवादृशा अपि रागाभिषङ्गैः क
लुषीक्रियन्ते प्रमादैश्चाभिभूयन्ते कथं करतलाकुलितामपहृतामक्षमालामपि न लक्षयसि अहो विगत
चेतनत्वं अपक्रियतां नामेयं इदमपि तावत् क्रियमाणमनयाऽनार्यया निवार्यतां हृदयमिति एवमभि १२०
धीयमानश्च तेन किंचिदुपजातलज्ज इव प्रत्यवादीत्॥ सखे कपिञ्जल किं मामन्यथा संभावयसि नाहमेवमस्या
दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिममित्यभिधायालीककोपकान्तेन प्रयत्नविरचितजी

य२

नुचम२

१ जणक कुटिभूजलेन स्तुंबनाभिलाभस्फुरिताधरेण मुखेन्दुना मामवदत्‌ चपले प्रदेशादस्मादिमा मन्द्र माला
मदत्वाप दात्पदमपिनगन्तव्यमिति तच्छ्रुत्वाहमात्मकंठादुत्कर ध्रुजलास्पार्शलीलापुष्पांजलिमेकावलीम
गवन्यग्रहणतामन्द्र मालेतिमन्मुखासक्त दृष्टेः शून्य हृदयस्यास्य प्रसारितेपाणौ निधाय स्वेदसलिलस्नाता पि
पुनः स्नातुमवातरम्‌ उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादेवयासं तमेवचिन्त
यन्ती स्वभवनमयासिषं गत्वा च प्रविश्य कन्यान्तःपुरं ततः प्रभृति तद्विरहविधुरा किमागतास्मि किं तत्रैवास्थितास्मि
किमेकाकिन्यस्मि किं परिवृतास्मि किमस्थितालापास्मि किं जागर्मि किं सुप्तास्मि किं रोदिमि किं न रोदिमि किं दुःखमि
दं किमुत्कंठेयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोयं किं दिवस एष किं निशेयं कानि रम्याणि कान्यरम्याणीति स
र्वं नाध्यवागच्छम्‌ ॥ अविज्ञातमदनवृत्तान्ताच क्व गच्छामि किं करोमि किं शृणोमि किं पश्यामि किमालपामि कस्य

किंसुखमिदं २ किंपरिवृतास्मि२

किमुत्सवोयं२

वनकुसुमपरिमलमपि४

कां॰ पू॰ १२१ कथयामिकोस्यप्रतीकारइतिसर्वंचनाज्ञासिजन्तुः।। केवलमातुर्गृह्यकुमारीपुरप्रासादंविसर्ज्यच.सखीजनं
द्वारिनिवारिताशेषपरिजनप्रवेशासर्वव्यापारानुत्सृज्यैकाकिनीमणिजालगवाक्षनिहितमुखीतामेवदिशं
तस्यनाथतयाऽप्रसाधितामिवकुसुमितामिवमहारत्ननिधानाधिष्ठितामिवामृतरससागरपूरप्लावितामिवपूर्ण
चन्द्रोदयालंकृतामिवदर्शनसुभगामीक्षमाणातस्मादिगन्तरादागच्छन्तमनिलमपिशकुनिध्वनिमपितद्वार्तां
प्रष्टुमीहमानातदुपलम्भतयातपःपरिक्लेशानपिस्पृहयन्तीतस्यैवगृहीतमौनव्रतास्मरजनितपक्षपाताच्चतस्य
रिगृहान्मुनिवेशस्याग्राम्यतांतदासन्नतयायौवनस्यचारुतांतच्छ्रवणसंपर्कात्पारिजात कुसुमस्यमनोहर
तांतन्निवासात्सुरलोकस्यरम्यतांतद्रूपसंपदाकुसुमायुधस्यदुर्जयतामध्यारोपयन्तीदूरस्थस्यापिकमलिनीवस १२१
वितुःसागरवेलेवचंद्रमसोमयूरीवजलधरस्यतस्यैवाभिमुखीतथैवतांतद्विरहातुराजीवितोजमरन्दावलीमिवा

पा४

128

हावलींकंठेनोद्वहन्ती तथैवचतया अस्मान्तद्धहस्यालापयेवकर्णलग्नयापारिजातमंजर्य्यातथैवच
तेनतत्करतलस्पर्शसुखजन्मनाकदंबमुकुलकर्णपूरायमाणेनरोमांचजालकेनकंटकितैककपोलफल
कानिस्पंदमतिष्ठम्॥ अथतांबूलकरंकवाहिनीमदीयातरलिकानाममयैवसहागतास्नानुमासीत्‌: साचप
श्चाच्चिरादिवागत्यतथावस्थितांशनैर्मामवादीत्‌· भर्तृदारिकेयौतौतापसकुमारकौदिव्याकारावस्माभिरदृष्टौ
दृसरस्तीरेदृष्टौतयोरेकोयेनभर्तृदुहितुरियमवतंसीकृतासुरतरुकुसुममंजरीसतस्माद्‌द्वितीयादात्मनो
रक्षन्दर्शनमतिनिभृतपदःकुसुमितलतासन्तानगहनान्तरेणोपसृत्यमामागच्छन्तींपृष्टवतोभर्तृदारिकामु
द्दिश्याप्राक्षीत्‌। बालिकेकेयंकन्यकाकस्यवापत्यंकिमभिधानाक्ववागच्छतीति· मयोक्तं· एतत्खलुभगवतः
श्वेतभानोरंशुसंभूतायामप्सरसिगौर्यांसमुत्पन्नादेवस्यसकलगंधर्वमुकुटमणिशलाकाशिखरोल्लेखमसृ
णितचरणनखचक्रस्यप्रणयप्रसुप्तगंधर्वकामिनीकपोलपत्रलतालीढछिन्नभुजन्तुशिखरस्यपादपीठाक्रान्त

वम ५

का·पू· १२२ लक्ष्मीकरकमलस्यगंधर्वाधिपतेर्हंसस्यदुहितामहाश्वेतानामगंधर्वाधिवासंहेमकूटाचलमभिप्रस्थितेति
कथितेचमयाकिमपिचिन्तयन्मुहूर्तमिवतूष्णीं स्थित्वाविगतनिमेषेणचक्षुषाचिरमभिवीक्षमाणोमांसानु
नयमर्थितामिवदर्शयन्पुनराह· बालिकेकल्याणिनीतवाविसंवादिन्य वपत्याबालभावेप्याकृतिरियंतत्क
थयमेवचनमेकमभ्यर्थ्यमानेति· ततोमयासविनयमुपरचितांजलिपुटयादर्शितादरमभिहितोभगवन्क
स्मादैंमिधत्से·काहमात्मनः सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विनानिखिलकल्मषापहारिणीमस्म
द्विधेषुदृष्टिमपिनपातयन्ति·किंपुनराज्ञां·तद्दिस्वयमादिश्यतांकर्तव्यं·अनुगृह्यतामयंजनइति·एवमुक्त १२२
स्तुमयासस्नेहयासखीमिवोपकारिणीमिवप्राणप्रदामिवदृष्ट्वामामभिनवघनिकरवर्षिनस्तमालपादपात्प
ल्लवमादायनिष्पीड्यतटशिलातलेतेनगंधगजमदसुरभिपरिमलेनरसेनउत्तरीयवल्कलैकदेशाद्विपाट्यपीडि

कोऽस्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्येयं पत्रिका त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकि
न्यै देयेत्यभिधायार्पितवानित्युक्त्वा स्वसात्ताम्बूलभाजनादाकृष्य तामदर्शयत्। अहं तु तेन तत्संबन्धिनालापेन
शङ्खमयेनापि स्पर्शसुखमिवान्तर्जनयता श्रोत्रविषयेणापि रोमोद्गमानुमितसर्वाङ्गानुप्रवेशेन मदनावेशमन्त्रे
णेवाविश्यमाना तस्याः करतलादादाय तां वल्कलपत्रिकां तस्यामिमामभिलिखितामार्यामपश्यम्॥ ॥दूरं
मुक्तालतया बिससितया विप्रलोभ्यमानो मे। हंस इव दर्शिताशो मानसजन्मा त्वयानीतः॥ अनया च मे दृष्ट्या
दिङ्मोहभ्रान्त्येव प्रनष्टवर्त्मनो बहुलनिशयेवान्धस्य जिह्वाच्छित्येव मूकस्य इन्द्रजालिकपिच्छिकयेवातत्त्वदर्शिनः
ज्वरप्रलापतृष्णयेवासंबद्धभाषिणः दुष्टनिद्रयेव विज्ञविह्वलस्य लोकायतिकविद्ययेव धर्मरुचेः मदिरयेवोन्म
त्तस्य दुरावेशक्रिययेव पिशाचग्रस्तस्य दोषविकारोपचयः सुतरामक्रियत स्मरातुरस्य मे मनसः। येनाकुलीक्रि
यमाणा सरिदिव पूरेण विह्वलतामभ्यगमम्। तां च द्वितीयदर्शनेन कृतमहापुण्यामिवानुभूतसुरलोकवासामि

का॰पू॰ वद्देवताधिष्ठितामिव लब्धवरामिव पीतामृतामिव समासादितत्रैलोक्यराज्याभिषेकामिव मन्यमानास
१२३ न्नसन्निहितामपि दुर्लभदर्शनामिवातिपरिचिताम् अपूर्वामिव सादरमाभाष्यमाणा पार्श्वावस्थितामपि स
र्वलोकस्योपर्यवस्थितामिव पश्यन्ती कपोलयोरलकलताभंगेषु च सोपग्रहस्पृशन्ती विपरीतमिव परिजनस्य
मिसर्वंश्चसुपदर्शयन्ती · तरलिके कथय कथं स त्वया दृष्टः किं किमभिहितासि तेन कियन्तं कालमवस्थितासि त
त्र किं यदनुसरन्नस्मान् स वागत इति पुनः पुनः पर्यपृच्छत्। अनयैव च कथया तया सह तस्मिन्नेव प्रासादे त
त्रैव प्रतिषिद्धाशेषपरिजनप्रवेशा दिवसमत्यवाहयत्॥ अथ मदीयेनेव हृदयेन कृतरागसंविभागे लो
हितायति गगनतलोपान्तावलम्बिनि रविबिम्बे · सरागा दिवसकरदर्शनातुरकार्यीकृतकमलशयनायामनं
गातुरायामिव पाण्डुतां व्रजन्त्यामातपलक्ष्म्यां गैरिकगिरिसलिलप्रपातपाटलेषु कमलवनेभ्यः समुत्थाय १२३
वनगजयूथेष्विव पुञ्जीभवत्सु भास्करकिरणेषु गगनावतारविश्रामलालसानीव विरथवाजिनीहर्म्ये हेजारवग्र

तिशाद्यूकेनसहविशति मेरुगिरिगह्वरं वासरे मुकुलितरक्तपंकजपुटप्रविष्टमधुकरावलीपुरविविरसमूर्च्छीभका
रितहृदयास्विवआरब्धनिमीलनासुपद्मिनीषु ग्रासीकृतसामान्यमृणालतावियरसंक्रामितानीवपरस्परहृदयान्य
दायविधुरमानेषुरथांगनाम्नांयुगलेषु सान्छत्रग्राहिणीसमागत्याकथयत्।भर्तृदारिकेतयोर्मुनिकुमारयोरन्य
तरोद्वारितिष्ठति कथयतिचाहंमालतीमुपयाचितुमागतोस्मीति। अहंतुमुनिकुमारनामग्रहणादेवस्थानस्थि
तापिगतेवद्वारदेशंसमुपजाततदागमनाशंकासमाहूयान्यतमेकंचुकिनंगच्छप्रवेश्यतामित्यादिश्यप्राहिणवम्
॥अथमुहूर्त्तादिवतेतस्यरूपस्येवयौवनंयौवनस्येवमकरकेतनंमकरकेतनस्येववसंतसमयंवसंतसमयस्ये
वदक्षिणानिलमनुरूपंसखायमृषिकुमारकंकपिंजलनामानंजराधवलस्यकंचुकिनोनुमार्गेणचंद्रातपस्ये
वबालातपमागच्छन्तमपश्यम्।अंतिकमुपगतस्यचास्यपर्याकुलमिवसविषादमिवशून्यमिवार्थिनमिवानुप
रतारूतमाकारमलक्षयम्।उत्थायचकृतप्रणामासादरंस्वयमासनमुपाहरम्।उपविष्टस्यचबलादनिच्छ

व४

का·पू·
२२४

नोपिप्रक्षाल्यचरणावुपस्पृश्यचोत्तरीयांशुकपल्लवेनाव्यधानायांभूमावेवतस्यांतिकेसमुपाविशम्॥ अथमु
हूर्तमिवस्थित्वाकिमपिविवक्षुरिवसततस्यामस्मि मीपोपविष्टायांतरलिकायांचक्षुरपातयत्। अहंतुविदिता
भिप्रायाद्दृश्यैवभगवन्नव्यतिरिक्तेयमस्मच्छरीरादशंकितमभिधीयतामित्यवोचम्॥ एवमुक्तश्चमयाकपिंजलः
प्रत्यवादीत्· राजपुत्रिकिंब्रवीमिवागेवमेनाभिधेयविषयमवतरतित्रपया· ककुद्मूलफलाशीशान्तोवननिरतोमुनि
जनः· क्वायमनुपशान्तजनोचितोविषयोपभोगाभिलाषकलुषोमन्मथविविधविलाससंकटोरागप्रायःप्रपंचः· स
र्वमेवानुपपन्नमालोक्यकिमारब्धंदैवेन· अयत्नेनैवखलूपहासास्पदतामीश्वरोनयतिजनं। नज्ञानेकिमिदंवल्क
लानासदृशमुताहोज्ञनोसमुचितंकिंतपसोनुरूपं· आहोस्विद्धर्मोपदेशांगमिदमपूर्वमयंविडंबनाकेवलमवश्यं
कथनीयमिदमपरमुपायोनदृश्यते· अन्याप्रतिक्रियानोपलभ्यते· अन्यच्छरणंनालोक्यते· अन्यागतिर्नास्ति· अक २२४
थ्यमानेचमहाननर्थोपिनिपातोजायते· प्राणपरित्यागेनापिरक्षणीयाःसुहृदसवइतिकथयामि। अत्रभवत्याःस

मन्दमेवसमयालथानिष्ठुरमुपदर्शितकोपेनापिहितस्तथाबाभिमायपरित्यज्यतंतस्मात्प्रदेशादुप
जातमन्युरुत्सृष्टकुसुमावचयान्यंप्रदेशमगमम्॥अपयातायांचभवत्यांमुहूर्त्तमिवस्थित्वाएकाकीकि
मयमिदानीमाचरतीतिसंजातवितर्कः अतिनिभृतमविरपांतैर्विग्रहस्तप्रदेशंव्यलोकयम्।यावत्तत्रतेनाद्राक्षम्
125 आसीच्चमेमनस्येवं किन्नुमदनपरायत्तचित्तस्तामेवानुसरन्गतोभवेत्। उतगतायांतस्यांलब्धचेतनोनशक्नो
तिमद्दर्शनपथमुपगन्तुमाहोस्वित्कुपितःपरित्यज्यमांगतः उतान्वेषमाणोमामेवप्रदेशमन्यमितःसमाश्रितः
स्यादिति एवंविकल्पयन्कंचित्कालमतिष्ठम्। तेनतुजन्मनःप्रभृत्यनभ्यस्तेनतस्यक्षणमप्यदर्शनेनदूयमाना
पुनरचिंतयम्। सकृदपिविज्ञैर्यस्खलनविलक्षः किंचिदनिष्टमपिसमाचरेत्। नहिकिंचिन्नक्रियतेक्रियातन्मयुस्म
मेनमेकाकिनंकर्तुमित्यवधार्यपश्चात्तापमादरमकरवम्।अन्वेषमाणश्चयथायथातेनापश्यंतथातयासुहृत्स्नेह
कातरेणमनसातत्तदशोभनमाशंकमानस्तरुलतागहनानिचन्दनवनवीथिकाः लतामण्डपान्सरःकूलानिचवीक्ष

का॰सू॰ १२५

मार्गणोनिपुणमितस्ततोदत्तदृष्टिःसुचिरंव्यचरम्।अथैकस्मिन्सरःसमीपवर्तिनिनिरन्तरतयाकुसुममयइव
मधुकरमयइवपरभृतमयइवमयूरमयइवातिमनोहरेवसन्तजन्मभूमिस्थलेलतागहनेकृतावस्थानमुत्सृष्ट
सकलव्यापारतयालिखितमिवोत्कीर्णमिवस्तंभितमिवोपरतमिवप्रसुप्तमिवयोगसमाधिस्थमिवनिश्चलमपिस्व
स्त्राच्चलितमेकाकिनमपिमन्मथाधिष्ठितं·सानुरागमपिपांडुतामावहन्तं·शून्यान्तःकरणमपिहृदयनिवासि
दयितं·तूष्णीकमपिकथितमदनवेदनातिशयं·शिलातलोपविष्टमपिमरणेव्यवस्थितंशापप्रदानभयादिवा
दत्तदर्शनेनकुसुमायुधेनसंतप्यमानं·अतिनिस्पन्दतयाहृदयनिवासिनंप्रियांद्रष्टुमन्तःप्रविष्टैरिवासह्यसं
तापसंत्रासपलानैरिवमनःक्षोभप्रकुपितैरिवोत्सृज्यगतैरिंद्रियैःशून्यीकृतशरीरम्·निस्पन्दमीलितेनान्तर्ज १२५
लमदनदहनधूमाकुलिताभ्यन्तरेणेवपक्ष्मान्तरविवरवान्तानेकधारमनवरतमीक्षणयुगलेनबाष्पजलदु
र्दिनमुत्सृजन्तं।आलोहिनीमधरप्रभामनङ्गाग्नेःप्रदहतोहृदयमूर्ध्वंसंसर्पिणींशिखामिवादायनिष्पतद्भिःस्फुटा

सैरत्तरलीकृतासन्नलताकुसुमकेसरं·वामकपोलशायनीकृतकरतलतयासमुत्सर्पद्भिरमलैर्नखांशु
भिर्विमलीकृतमच्छाच्छचन्दनरसरचितललाटिकमिवललाटदेशमुद्वहन्तं·अचिरापनीतपारिजातकुसुमकर्ण
पूरतयासंक्रान्तपरिमलामोदलोभोपसर्पिणाकलविरुतछलेनमदनमंत्रमिवजपतामधुकरकुलेनसनीलो
त्पलमिवसतमालपल्लवमिवश्रवणदेशंदधानं·उत्कण्ठाज्वररोमांचव्याजेनप्रतिरोमकूपनिपतितानांमदनशरा
णांकुसुमकेसरशल्यशकलनिकरमिवांगलग्नंबिभ्राणं·दक्षिणकरेणचस्फुरितनखकिरणनिकरांकरनलस्य
र्मुखरवकीलितामिवमुक्तावलीमविनयपताकामुरसिधारयंतंमदनवशीकरणचूर्णेनेवकुसुमरेणुनात
रुभिराहन्यमानं·आत्मरागमिवसंक्रामयद्भिरासन्नैरशोकपल्लवैःस्पृश्यमानंसुरताभिषेकसलिलैरिवाभिनव
पुष्पस्तबकमधुशीकरैर्वनश्रियाभिषिच्यमानं·अलिनिवहनिपीयमानपरिमलैरुपरिपतद्भिश्चंपककुड्मलै
स्तत्प्रहारशल्यकैरिवसशल्यमेःकुसुमशरेणताड्यमानं·अतिबहलवनामोदमत्तमधुकरनिकरझंकारनिस्वने

रनिलचलितै३

का॰पू॰ १२६ हुंकारैरिव दक्षिणानिलेन निर्भर्त्स्यमानं मदकलकोकिलकुलकोलाहलैर्वसंतजयशब्दकलकलैरिव
मधुमासेनाकुलीक्रियमाणं प्रभातचन्द्रमिव पाण्डुतया परिगृहीतं निदाघगंगाप्रवाहमिव कृशिमानमागतं
अन्तर्गतानलं चन्दनविटपमिव छायया मन्यमिवादृष्टमिवापरिचितमिव जन्मान्तरमिवोपगतं रूपान्तरेणेव प
रिणतं आविष्टमिव महाभूताधिष्ठितमिव ग्रहगृहीतमिवोन्मत्तमिव छलितमिवांधमिव बधिरमिव मूकमिव
विलासमयमिव मदनमयमिव परायत्तचित्तवृत्तिं पराकोटिमधिरूढं मन्मथावेशस्य अनभिज्ञेयपूर्वाका
रन्तमहमद्राक्षम्। अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन हृदयेना
चिन्तयम्। एवं नामायमतिदुर्विषहवेगो मकरकेतुर्येनानेन क्षणेनायमीदृशमवस्थान्तरप्रतीकारमुपनी १२६
तः। कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशिरहो बलवन्महच्चेतथा नामायमाशैशवाद्धीरप्रकृतिरस्ख
लितवृत्तिर्ममचान्येषां च मुनिकुमारकाणां स्पृहणीयचरित आसीत्। अद्य त्वितरइव परिभूय ज्ञानमवगण

127

प्यतपःप्रभावमुन्मूल्य गांभीर्यं मन्मथेन उड्डीकृतः। सर्वथा दुर्लभं यौवनमस्खलितमिति। उपसृत्य चैतस्मि
न्नेव शिलातलैकपार्श्वे समुपविश्यांसदेशावसक्तपाणिरस्तमुन्मीलितलोचनमेव सखे पुण्डरीक कथय किमिदमि
त्यपृच्छम्। अथ सुचिरसम्मीलनालग्नमिव कथमपि प्रयत्नेनानवरतरोदनवशादुपजातारुणभावमस्रजलपट
लपूरप्लावितं उत्कूपितमिव सवेदनमिव स्वच्छांशुकान्तरिततरक्तकमलवनच्छायं चक्षुरुन्मील्य मंथरमंथरस्याद्य
श्रुत्सुचिरं विलोक्य मां आयततरं निःश्वस्य लज्जाविशीर्यमाणविरलाक्षरं सखे कपिंजल विदितवृत्तान्तोऽपि
किं मां पृच्छसीति कृच्छ्रेण शनैरवदत्। अहं तु तदाकर्ण्य तदवस्थयैवाप्रतीकारविकारोऽयं तथापि सुहृदा सुह
दसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीय इति मनसावधार्य अब्रुवम्। सखे पुण्डरीक सुविदितमेतन्म
मकेवलमिदमेव पृच्छामि यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टमुत धर्मशास्त्रेषु पठितमुत धर्मार्जनोपायोऽय
मुतापरस्तपसां प्रकार उत स्वर्गगमनमार्गोऽयमुत व्रतरहस्यमिदमुत मोक्षप्राप्तियुक्तिरियमाहोस्विदन्यो निय

का॰सू॰ मडकारः कथमेतद्युक्तं भवतो मनसापि चिंतयितुं किं पुनराख्यातुमीक्षितुं वा किमेवं जड इवानेन मन्मथहतके
१२७ नोपहासास्पदतां नीयमानमात्मानं नावबुध्यसे। मूढ हि मदनेनापास्यते का वा सुखाशा साधुजननिन्दितेष्वेवंवि
धेषु प्राकृतजनबहुमतेषु विषयेषु भवतः। स खलु धर्मबुद्ध्या विषलतावनं सिंचति कुवलयमालेति निस्त्रिं
शलतामालिंगति कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते रत्नमिति ज्वलन्तमंगारमभिस्पृशति मृणालमि
ति दुष्टवारणदन्तमुसलमुन्मूलयति मूढो विषयोपभोगेष्वनिष्टानुबंधिषु यः सुखबुद्धिमारोपयति। अधिग
तविषयतत्त्वोपि कस्मात्खद्योत इव ज्योतिर्निर्वीर्यमिदं ज्ञानमुद्वहसि। यतो न निवारयसि प्रबलरजःप्रस
रकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानींद्रियाणि। न नियमयसि च क्षुभितं मनः। कोयमनंगो नाम। धैर्यमवलं
ब्य निर्भर्त्स्यतामयं दुराचार इत्येवं वदत एव मे वचनमाक्षिप्य अनियमानान्तरालप्रवृत्तबाष्पवेणिकं प्रमृज्य चक्षुः १२७
करतलेन पाणौ मामवलम्ब्यावोचत्। सखे किं बहुनोक्तेन सर्वथा स्वस्थोसि। आशीविषविषवेगविषमाणामे

तेषांकुसुमचापसायकानांपतितोसिनगोचरेसुखमुपदिश्यतेयस्यचेंद्रियाणिसन्ति·मनोवाविद्यते·यःप
श्यतिवाशृणोतिवाश्रुतमवधारयतिवा·योवाशुभमिदंनशुभमिदमितिविवेक्तुंसमर्थःसखलूपदेशमर्हति·म
मतुसर्वमेवेदमतिदूरापेतं·अवष्टंभोज्ञानंधैर्यं·प्रतिसंख्यानमित्यस्तमितेनाकथा·कथमप्येवमेवात्मावि
धृतास्तिछिन्नस्यसर्वोदूरातीतःखलूपदेशकालः·समतिक्रान्तोधैर्यावसरोगताप्रतिसंख्यानवेला·अतीतोज्ञाना
वष्टंभसमयः·केनवान्येनास्मिन्समयेभवन्तमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणंवाकरणीयं·कस्यान्य
स्यवावचसिमयास्थातव्यं·कोवापरस्त्वत्समोमेजगतिबंधुः·किंकरोमियन्नशक्नोमिनिवारयितुमात्मानमिय
मनेनैवक्षणेनभवतादृष्टावस्था·तज्जनइदानीमुपदेशकालोयावत्प्राणिमितावदस्यकल्याणोदितद्वादश
दिनकरकिरणातपतापस्यमदनसंतापस्यप्रतिक्रियांक्रियमाणामिच्छामि·पच्यन्तइवमेऽङ्गानि·उत्क्वथ्यतइव
हृदयं·प्लुष्यतइवदृष्टिः·ज्वलतीवशरीरं·अत्रयत्प्राप्तकालंतत्करोतुभवानित्यभिधायतूष्णीमभवत्॥एवमु

128

का॰सू॰ सोप्यहमेनंप्रबोधयंपुनःपुनर्यदाशास्त्रोपदेशविशदैःसनिदर्शनैःसेतिहासैश्चवचोभिःसानुनयंसोप
१२८ ग्रहंचाभिधीयमानोपिनाकरोत्कर्णेतदाहमचिन्तयमतिभूमिमयंगतोनशक्यतेनिवर्त्तयितुमितिःइदानींनि
रर्थकाःखलूपदेशाः तत्प्राणपरिरक्षणे पितावदस्ययत्नमाचरा मीतिकृतमतिरुत्थायगत्वातस्मात्स
रसःसरसामृणालिकाःसमुद्धृत्यकमलिनीपलाशानिजललवलाञ्छितान्यादायगन्धधूलिकषायपरिमल
मनोहराणिचकुमुदकुवलयकमलान्याहृत्यागत्यतस्मिन्नेवलतागृहशिलातलेशयनमस्याकल्पय
म्।।तत्रचसुखनिषण्णस्यप्रत्यासन्नवर्त्तिनोचन्दनविटपिनोमृदूनिकिसलयानिनिःपीड्यतेनस्वभावसुरभि १२८
णातुषारशिशिरेणरसेनललाटिकामकल्पयम्।आचरणतलादंगचर्चांचास्यव्यधाम्।अभ्यर्णपादपस्फु
रितवल्कलविवरशीर्णेनचकरसंपूर्णितेनकर्पूररेणुनाप्रचुरप्रतीकारमकरवम्।उरोनिहितचं दनद्र

वाईवल्कलस्यस्वच्छसलिलशीकरनिकरस्राविणाकदलीदलेनव्यजनक्रियामन्वतिष्ठम्। एवंचमुहुर्मुहु
रन्यदन्यन्नलिनीदलशयनमुपकल्पयतोमुहुश्चन्दनचर्चांरचयतोमुहुर्मुहुःस्वेदप्रतिक्रियांकुर्वतःक
दलीदलेनचानवरतंवीजयतःसमुदभून्मेमनसिचिन्ता। नास्तिखल्वसाध्यंनामभगवतोमनोभुवः। क्वायंहरिणइ
ववनवासनिरतःस्वभावमुग्धोजनःक्वविविधविलासरसराशिर्गंधर्वराजपुत्रीमहाश्वेता। सर्वथानहिकिंचिदस्य
दुर्घटंदुष्करमनायत्तंमकरकेतोर्वाजगति। दुरुपपादेष्वप्यर्थेष्वयमवज्ञयैवविचरति। नचायंकेनापिप्रतिकूल
यितुंशक्यते। कावागणनासचेतनेष्वपगतचेतनान्यपिसंघटयितुमलंयद्यस्मैरोचते। तत्कुमुदिन्यपिदिन
करकरानुरागिणीभवति। कमलिन्यपिशशिकरद्वेषमुज्झति। निशापिवासरेणसहमिश्रतामेति। ज्योत्स्नाप्यंध
कारमनुवर्त्तते। छायापिप्रदीपाभिमुखमवतिष्ठते। तडिदपिजलदेस्थिरतांव्रजति। जरापियौवनेनसंचारिणीभ
वति। किंवातस्यदुःसाध्यमपरमेवंविधेयेनायमगाधगांभीर्यसागरस्तृणलवलघुतामुपनीतः। कृतत्रपःक्वेय

मय४

का॰पू॰ मवस्था॰ सर्वथा निःप्रतीकारेयमापदुपस्थिता॰ किमिदानीं कर्त्तव्यं किमनुचेष्टितव्यं कं देशं प्रतिगन्तव्यं किंश
१२९ रणं को वा उपायः कः सहायः कः प्रतीकारः कः प्रकारः का युक्तिः कस्समाश्रयः येनास्यासवः संधार्यन्ते॰ केन वा कौ
शलेन कतमया वा युक्त्या केन तरेण वा प्रकारेण केन वा वष्टंभेन कया वा प्रज्ञया कतमेन वा समाश्वसनेनायं जीवेदि
त्येतच्चान्यच्च मे विभ्रमहृदयस्य संकल्पाः प्रादुरासन्॰ पुनश्चाचिन्तयम्॰ किमनयात्या यतया निःप्रयोजनया
चिन्तया॰ प्राणास्तावदस्य येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयास्तेषां च तत्समागममेकमपहाय ना
स्त्यपरः संरक्षणोपायो बालभावादप्रगल्भतया च तपोविरुद्धमनुचितमुपहसनीयमिवात्मनो मदनव्य
तिकरं मन्यमानो नियतमेकोऽसावशेषजीवितोऽपि नायं तस्याः स्वयमभिगमनेन पूरयति मनोरथमकाले। स १२९
रक्षणमभ्युपायमस्य मदनविकारः सततमतिगर्हितेनाकृत्येनापि रक्षणीयान्मन्यन्ते सुहृदसून्साधवः। तदिति कृप
णमकर्त्तव्यमप्येतदस्माकमवश्यकर्त्तव्यतामापतितं॰ किं चान्यत् क्रियते का वान्या गतिः सर्वथा प्रयामि तस्याः

सकाशान्मा देव्या मे तामवस्थामिति विज्ञापयित्वा च कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय संजातल
ज्जा निवारयेदित्यनिवेद्यैव तस्मै तन्मदेशात्सव्याजमुत्थायागतोहं तदेवमवस्थिते यदत्रावसरप्राप्तमीदृशस्य
चानुरागस्य सदृशमस्मदागमनस्य चानुरूपमात्मनो वा समुचितं तत्र प्रभवति भवतीत्यभिधाय किमियं वक्ष्यती
ति मन्मुखासक्तदृष्टिस्तूष्णीमासीत्। अहं तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना· रतिरसमयमुदधिमिवा
वतीर्णा· सर्वानन्दानामुपरि वर्तमाना· सर्वमनोरथानामग्रमिवाधिरूढा· सर्वोत्सवानामतिभूमिमिवाधिशयाना
तत्कालोपजातया लज्जया किंचिदवनम्यमानवदनत्वादस्पृष्टकपोलोदरैर्ग्रथितैरिवापर्युपरिपतनानुबन्धदर्शि
तमालाक्रमैरप्राप्तपक्ष्मसंश्लेषेण तयोपजातप्रथिमभरैरमलैरानन्दबाष्पजलबिन्दुभिः स्रवद्भिरावेद्यमानहर्ष
अकर्णानल्हणमचिन्तयम्। दिष्ट्या तावदयमनङ्गो मामिव तमप्यनुबध्नाति· यत्सत्यमेतेन मे संतापयतापि कियत
पंपरोन दर्शिता नुकूलता· यदिदं सत्यमेव तस्यदृशी दशा वर्तते· ततः किमिव नोपकृतमनेन· किं वा नोपपादि

130

का॰पू॰ तंकोवानेनापरःसमानोबंधुःकथंवाकपिंजलस्यस्वैषोपिवितथाजारतीप्रशान्ताह्रदेरस्माद्धृदनान्नि
१२० ष्क्रामति॰इत्थंभूतेकिंमयाप्रतिपत्तव्यमस्यवापुरःकिमभिधातव्यमित्येवंविचारयंत्याएवप्रविश्यससंभ्रमा
प्रतीहारीममाकथयतःभर्तृदारिकेत्वमस्त्वस्यशरीरेतिपरिजनादुपलभ्यमहादेवीप्राप्तेतिःतच्छ्रुत्वाक
पिंजलोमहाजनसंमर्दभीरुःसत्वरमुत्थायराजपुत्रिमहानयमुपस्थितःकालातिपातोभगवांश्चभुवनत्रयचू
डामणिरस्तमुपगच्छतिदिवसकरस्तद्गच्छामिसर्वथाभिमतसुहृत्प्राणरक्षादक्षिणार्थमयमुपरचितोंज
लिरेषमेपरमोविभवइत्यभिधायप्रतिवचनकालमप्रतीक्ष्यैवपुरोयायिनांबायाःअविज्ञाताकनकवेत्रल
ताकरेणप्रतीहारिजनेनकंचुकिलोकेनचगृहीततांबूलकुसुमपटवासीगरागेणचामरव्यग्रपाणिनाकुब्जकि
रातबधिरवामनवर्षवरकल्मूकानुयातेनपरिजनेनसर्वतःसंरुद्धेद्वारदेशेकथमप्यवाप्तनिर्गमःप्रययौ॥ १२०
त्र्यंबातुमत्समीपमागत्यसुचिरंस्थित्वास्वभवनमयासीत्॰।तयातुतत्रागत्यकिंकृतंकिमभिहितंकिमाचेष्टित

131

मिति शून्यहृदया सर्वं नालक्षयम्। गतायां च तस्यामस्तमुपगते भगवति हारीतहरितवाजिनि सरोजिनीजीवि
तेश्वरेव चक्रवाकसुहृदि सवितरि लोहितायमाने पश्चिमाशामुखे हरितायमानेषु कमलवनेषु नीलायमाने पूर्वदिङ्मु
खपातालपंककलुषेण महाप्रलयजलधिपयःपूरेणेव तिमिरेणावष्टभ्यमाने जीवलोके किंकर्तव्यतामूढा तामेव तर
लिकामपृच्छम्। अयि तरलिके कथं न पश्यसि ईदृशमाकुलं मे हृदयमप्रतिपन्नविक्लवानि चेन्द्रियाणि न स्वयमेव
पिकर्तव्यमलमस्मिन्कालमुपदिशतु मे भवती यदत्र सांप्रतमयमेवं त्वत्समक्षमेवाभिधाय गतः कपिंजलो यदि ता
वदितरकन्यकेव विहाय लज्जामुत्सृज्य धैर्यमवमुच्य विनयमचिन्तयित्वा जनापवादमतिक्रम्य सदाचारमुल्लंघ्य
शीलमवगणय्य कुलमंगीकृत्यायशो रागांधदृष्टिरननुज्ञाता पित्रा अननुमोदिता मात्रा स्वयमुपगम्य ग्राहयामि
पाणिमेवं गुरुजनातिक्रमादधर्मो महान्। अथ धर्मानुरोधादितरपक्षावलंबनद्वारेण मृत्युमंगीकरोम्येवमपि प्र
थमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिंजलस्य प्रणयप्रसरभंगः। पुनरपरं यदि कदाचित्तस्य ज

का·पू· नस्यभक्ततादाशायामंगारकाणाविपत्तिरुपजायते·तदपिमुनिजनवधजनितंमहदेनोभवेदित्युच्चारयंत्यामेवमय्य।
१३१ सन्नचंद्रोदयजन्मनाविरलविरलेनालोकेनवसन्तवनराजिरिवकुसुमरजसाधूसरतांवासवीदिगयासीत्·।
ततःशिशिरकरकेसरिकरविदार्यमाणतमःकरिकुंभसंभवेनमुक्ताफलक्षोदेनेवधवलतामुपनीयमानमुदयगिरि
सिद्धसुंदरीकुचच्युतेनचंदनचूर्णराशिनेवपांडुरीक्रियमाणं·चलितजलधिजलकल्लोलाभिलोलासितेनपुलिनसि
कताक्रमेणेवपांडुतामापाद्यमानं·पश्चिमेनरमिन्दुधाम्नादिगन्तरमदृश्यत·।।शनैःशनैश्चदुर्दर्शनीनामदनमदस्मि
तायादर्शनाद्यमेवज्योत्स्नानिष्यंदिनीनिशायामसुखशोभामकरोत्·।तदनुरसातलादवनीमवदार्योज्जिहताशेषफ
णामण्डलेनेवरजनिकरबिंबेनाराजतरजनी·क्रमेणचसकलजीवलोकानंदकेनकामिनीजनवल्लभेनकिंचि
दुन्मुक्तबालभावेनमकरध्वजबंधुभूतेनसमुपारूढरागेणसुरतोत्सवोपभोगैकयोग्येनामृतमयेनयौवनेनेवारोह १३१
ताशशिनारमणीयतामनीयतयामिनी·।।अथतंप्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिवोदयगिरिसिंहकरतला

132

हलनिजहरिणशोणितशोणीकृतमिवरतिकलहकुपितरोहिणीचरणालक्तकरसलांछितमिवाभिनवोदय
रागलोहितंरजनिकरमुदितंविलोक्याप्रज्वलितमदनानलाप्यंधकारितहृदयातरलिकोत्संगविष्ठतशरीरापि
मन्मथहस्तवर्ष्टिनीचक्षुर्गलनयनापिमृत्युमालोकयन्तीतत्क्षणमचिन्तयम्।एकत्रखलुमदनमधुमासमलयमा
रुतप्रभृतयःसमस्ताःएकत्रचायंपापकारीचन्द्रहतकोनशक्यतेसोढुमिदमतिदुर्विषहमदनवेदनातुरंचमेहृदयमस्य
चाङ्गमनंसदाहज्वरग्रस्तस्यांगारवर्षःशीतार्दस्यतुषारपातोविस्फोटःमूर्छितस्यक्षतसर्पदंशाइत्येवंचिन्तयन्ती
मेवचन्द्रोदयोपनीतात्कमलवनग्लानिनिद्रेवमूर्छामांनिमीलितलोचनामकार्षीत्।अचिरेणचसंभ्रांततरलिकोपनी
ताभिश्चन्दनचर्चाभिस्तालवृन्तानिलैश्चोपलब्धसंज्ञातामेवाकुलाकुलांमूर्त्तेनेवाधिष्ठितांविषादेनमल्लकाटविष्ठत
स्वर्चन्द्रकान्तमणिशलाकामविच्छिन्नबाष्पजलधारांधकारितमुखीसुदन्तीतरलिकामपश्यम्।उन्मीलितलोचना
चमांसाक्षात्कृतप्रणामाचन्दनपंकार्द्रेणकरयुगलेनबद्धांजलिरवादीत्।भर्तृदारिकेकिंलज्जयागुरुजनापेक्ष्ययावाप्रसीद

का॰पू॰ प्रेषयमां॰ आनयामितेहृदयदयितंजनमुज्झित्तुस्त्वयैवानत्रगम्यतांमतः परमसमर्थास्मि सोढुमिमं प्रबलत्वचोद
१३२ यविजृंभमाणोत्कलिकाशतमुदधिमिवमकरचिह्नमित्येवं वादिनी त्वामहमवोचम्॰ उन्मत्ते किं मन्मथेन नन्वयं॰
सर्वविकल्पानपहरन् सर्वोपायदर्शनान्युत्सारयन्सर्वानन्तरायानन्तरयन्सर्वसन्देहानपनयन्सर्वशंकास्तिरस्कुर्व
ल्लज्जामुन्मूलयन्स्वयमभिगमनलाघवदोषमाहृ एवनु॰ कालातिपातं परिहरन्॰ आगत एव मृत्योस्तस्यैव वा स
काशं नेता कुमुदबांधवः। ननु निश्चयथा कथंचिदनुगतजीवितं संभावयामि हृदयदयितमायासकारिणं जनमित्यभि
दधाना मदनमूर्छाखेदविक्लवैरंगैः कथंचिदवलंब्य तामेवोदतिष्ठम्॰। उच्चलितायाश्च मे दुर्निमित्तनिवेदक
मस्पन्दत दक्षिणं चक्षुरुपजातशंका चाचिन्तयमिदमपरं किमप्युपक्षिप्तं दैवेनेति॥ अथ नातिदूरोज्झितेन त्रिभु
वनप्रासादमहाप्रणालानुकारिणा सुधासलिलप्लवानिव वहता चन्द्रनरसानि ज्झरानिव क्षरता श्वेतगंगाप्रवाहस्तस्त्रा
णीव वमता अमृतसागरपूरानिवोज्झिरता चंद्रमण्डलेन प्लाव्यमाने ज्योत्स्नया भुवनान्तराले श्वेतद्वीपनिवासिनि १३२

मनेनानुद्र५

133

सामर्लोकदर्शनसुखमिवानुभवतिजनेमहावराहदंष्ट्रामण्डलनिभेनशशिनाक्षीरसागरादिवोद्ध्रिय
माणेमहीमण्डलेप्रतिभवनमङ्गनाजनेनविकचकुमुदगर्भैश्चन्दनोदकैरुपक्रियमाणेषुचन्द्रोदयार्घेषुका
मिनीप्रहितसुरतदूतीसहस्रसंकुलेषुराजमार्गेषु॰नीलांशुकरचितावकुंठनासुचन्द्रालोकभयचकितासु॰
कमलवनलक्ष्मीष्विवनीलोत्पलप्रभापिहितास्वितस्ततःपलायमाना स्वाभिसारिकासुप्रतिकुमुदमाबद्धम सा
धुकरमण्डलासुप्रबुध्यमानासुभवनदीर्घिकाकुमुदिनीषु॰स्फुटितकुमुदवनबहलधूलिधवलितोदरेनिष्पान
दपुलिनायमानेशशिरश्मौचन्द्रोदयानन्दनिर्भरेमहोदधाविवरतिरसमयइवोत्सवमयइवविलासमयइवप्रीति
मयइवजीवलोकेशशिमणिप्रणालनिर्झरप्रमोदमुखरमयूररवरम्येप्रदोषसमयेगृहीतविविधकुसुमताम्बूल
रागपटवासचूर्णयातरलिकयानुगम्यमानातेनैवमूर्ध्निनिहितेनकिंचिद्दाश्यानचन्दनललाटिकालग्नधूसरा
कुलालकेनचन्दनरससवर्णांगरागवेषेणार्द्रार्द्रेनैतथैवच्युतयाकंठस्थितया छमालयाश्रवणशिखरचुंबिन्या

मपरिजनमात्मानमालोक्याचिंतयं। ध्रियतमामि सरागस्य हृत स्वजनस्य किमिव कृत्यं वा त्वेन परिजनेनानवेगर्थ

का॰पू॰ त्वपारिजातमंजर्यापद्मरागरत्नरश्मिविनिर्मितेनेव रक्तांशुकेन कृतशिरोवगुंठना केनचिदात्मीयेनापि परिज
१३३ नेनानुपलक्ष्यमाणा तस्मात्प्रासादशिखरादवातरम्। अवतीर्य च पारिजातकुसुममंजरीपरिमलाकृष्टेन रि
क्तीकृतोपवनेन कुमुदवनान्यपहाय धावता मधुकरजालेन नीलपटावगुंठनविभ्रममिव संपादयतानुबध्य
माना प्रमदवनपक्षद्वारेण निर्गत्य तत्समीपमुदचलम्। प्रयांतीं च तरलिकाद्वितीयां स्ववपरिजनलीलामुपद
र्शयन्ति। तथाहि। समारोपितशरासनासक्तसायको नुसरति कुसुमायुधो दूरप्रसारितकरः कर्षति शशी। प्रस्खल
नभयात्पदे पदेऽवलंबते रागो लज्जां पृष्ठतः कृत्वा पुरः सहेन्द्रियैर्धावति हृदयं निश्चयमारोप्य नयत्युत्कंठे
ति। प्रकाशं चावदम्। अयि तरलिके अपि नाम मामिवायमपि दुहृतकस्तमपि किरणकचग्रहाकृष्टमभिमु
खमानयेदित्येवंवादिनीं च मामसौ विहस्याब्रवीत्। भर्तृदारिके मुग्धासि किमस्यैतेन जनेनायमात्मनैव ता १३३
वन्मदनातुर इव भर्तृदारिकायां नास्त्यवेष्टाः करोति। तथाहि। प्रतिबिंबच्छलेन स्वेद सलिलकणिका

करमिव ५

184

चिरं चुंबति कपोलयुगलं लावण्यवति पयोधरभारे निपतति प्रस्फुरितकरः स्पृशति रसनामणीन् निर्मलनखल
ग्नमूर्त्तिः पादयोः पतति। किं चास्य मदनातुरस्येव वपुस्तापापनुत्प्रयुक्तचन्दनानुलेपपांडुतामुद्वहति मृणालवलयधवला
न्करान्धत्ते अतिमाव्याजेन स्फटिकमणिकुट्टिमेषु निपतति केतकीगर्भकेसरधूलिधूसरपादः कुमुदसरांस्यवगा
हते सलिलशीकरार्द्रान् शशिमणीन् करैरामृशति द्वेष्टि विघटितचक्रवाकमिथुनानि अविशति कमलवनान्यते
श्चान्यैश्च तत्कालोचितैरालापैस्तया सह तमुद्देशमभ्युपागमम्। तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं कै
लासतटाच्चन्द्रोदयप्रस्नुतचन्द्रकान्तमणिप्रस्रवणोऽप्रक्षालयं नीयस्मिन्प्रदेशे स आस्ते तस्मिन्नेव सरसः पश्चिमे तटे
पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षयम्। दक्षिणेक्षणस्फुरणेन च प्रथममेव मनस्याहितशंका
तेन च सुतरामवदीर्णहृदयेव किमप्यनिष्टमन्तःकथयतेव विषमेनान्तरात्मना तरलिके किमिदमिति सभयमभिदधा
ना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छम्॥ अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुत्क्रान्तेनादं

का·पू· हा हा हतोस्मि हा दग्धोस्मि हा वंचितोस्मि हा किमिदमापतितं किं वृत्तं उत्सन्नोस्मि दुरात्मन्मदनपिशाचपापनिर्घृ
१३४ णकिमिदमकृत्यमनुष्ठितं त्वया आः पापे दुष्कृतकारिणि दुर्विनीते महाश्वेते किमनेन तेऽपकृतं आः पापदुश्चरि
तचन्द्रचाण्डाल कृतार्थोसि इदानीमपगतदाक्षिण्य दक्षिणानिलहतक पूर्णास्ते मनोरथाः कृतं कर्तव्यं वहेदानीं
यथेष्टं हा भगवन् श्वेतकेतो पुत्रवत्सल न वेत्सि मुषितमात्मानं हा धर्म निष्परिग्रहोसि हा तपो निराश्रयमसि हा सरस्व
ति विधवासि हा सत्यमनाथमसि हा सुरलोक शून्योसि सखे प्रतिपालय मामहमपि भवन्तमनुयास्यामि न शक्नोमि भव
ता विना क्षणमप्यवस्थातुमेकाकी कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपदे उज्झस्यद्यासि कुतस्तवेयम
तिनिष्ठुरता कथय त्वदृते क्व गच्छामि कं शरणमुपैमि अन्धोस्मि संवृत्तः शून्या मे दिशो जाताः निरर्थकं जीवितमप्र
योजनं तपो निःसुखाश्च लोकाः केन सह परिभ्रमामि कमालपामुत्तिष्ठ देहि मे प्रतिवचनं क्व तन्ममोपरि सुहृत्प्रेम· १३४
क्व सास्मितपूर्वाभिभाषिता चेत्येतानि चान्यानि च विलपन्तं कपिंजलमद्राक्षम् ॥ तच्चाकर्ण्यापतितैरिव प्राणैर्दूरादे

कंयाचे३

वमुक्तैकताराङ्कस्थासरस्तीरलतासन्निरुध्यमानांशुकोत्तरीयधाराशीकरित्वरितैरस्नानसमविषमभागविन्यस्तैः पा
दप्रक्षेपैः अस्खलन्तीपदेपदेकेनाप्युत्क्षिप्यनीयमानेवतंप्रदेशं गत्वा सरस्तीरसभापवर्त्तिनि शिशिरशीकरासारस्ना
विणि शशिमणिशिलातले विरचितं कुमुदकुवलयकमलविविधवनकुसुमसुकुमारमृणालमयं कुसुमशरसायक
मयमिव शयनमधिशयाना अतिनिस्पन्दतया मस दशद्रुमिवाकलयन्ती मत्तकोप शमितमदनसन्तापतया कृणाल
नसुखं सुप्तमिव मनःक्षोभभया यच्छिन्नप्राणायामावस्थितमिवातिस्फुरितप्रभेण त्वक्कृतेन मनेयमवस्थेति कथयन्त
मिवाधरेण इन्दुदुकूलपरिवर्त्तितदेहतयाहृष्टभागनिपतितैर्मदनदहनविह्वलहृदयन्यस्तहस्तनखमयूखवक्ष
क्लिनच्छिद्रितमिव शशिकिरणैः स्पृष्टपाण्डुरतया स्वविनाशोत्पातोत्पन्नया मदनचन्द्रकलयेव चन्दनलेखिकया र
चितललाटिकं मन्त्रः प्रियतरस्तवापरोऽज्ञ नो तामु इति कुपितेनेव जीवितेन परित्यक्तं मन्मथव्यथया सहैतान सूत्र
यमिवोत्कुज्य निष्पन्नेतनतासुखमनुभवन्तं अनङ्गयोगविद्यामिवध्यायन्तम् सर्वप्राणायाममिवाभ्यस्यन्तमुपपादि

प्राणोत्सर्गोपिज्ञाना ॥ मदालस्यपरिवृत्ततारकेण ॥ नातिनिमीलितेन ॥ का—

का॰पू॰ २३५ तास्मद्दागमेनप्रणायादिवाधरदत्तप्राणपूर्णपात्रमनंगेनरचितचन्दनललाटत्रिपुण्ड्रं धृतसरसबिससूत्रयज्ञो
पवीतमंसावसक्तकदलीगर्भपत्रचारुचीवरमेकावलीधियालम्बमालमविरलामलकर्पूरक्षोदभस्मधव
लमाबद्धमृणालरक्षाप्रतिसरमनोहरं मनोभवव्रतवेषमास्थाय मत्समागममन्त्रमिवसाधयन्तं अविरतराव
नाताम्रेण श्रूच्छ्यादागतरुधिरेणेवोन्मदनशरशल्यवेदनाकूणितत्रिभागेन कठिनहृदये दर्शनमात्रकेणापि
नपुनरनुगृहीतोयमनुगतोजन इतिसप्रणयमिवमामुपलभमानेनेमिवचक्षुषा किंचिद्विवृताधरेनयाजीवितम
पहर्तुमन्तःप्रविष्टैरिवेन्दुकिरणैर्निर्गच्छद्भिर्दशना धवलितपुरोभागं मन्मथव्यथयाविघूर्णमानहृदयनिहि
तेनवामेनपाणिनाप्रसीद प्राणेः सम प्राणसमे नगन्तव्यमितिहृदयस्थितांमामिवधारयन्तमितरेणचनखमयू २३५
खदन्तुरतयाचन्दनमिवस्रवताललाटाङ्केनचन्द्रातपमिवनिवारयन्तमन्तिकस्थितेनच अविरोढजीवितमा
र्गमिवोद्भ्रुविणविलोकयन्तपक्ष्मसुहृदाकमण्डलुनासमुपेतं कण्ठाभरणीकृतेनचमृणालवलयेनरजनिकरकिर

मो— नांशुभि ॥

136

त

णपाशेनेव संयम्य लोकान्तरमुपनीयमानं कपिंजलेन मन्दर्शनाद् ब्रह्मण्यमित्यूर्ध्वहस्तेन द्विगुणीभूतबाष्पो
द्गमेनाक्रोशताकंठपरिष्वक्तम् ॥ विगतजीवितमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ॥ तद्दृष्ट्वा मूर्छान्धकाराच
पातालमिवावतीर्णा तदा क्वाहमगमं किमकरवं किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन्नेव क्षणे किमिति
कठिनतयास्य मूढहृदयस्य किमनेकसहस्रसहिष्णुतया हतशरीरकस्य किं विहिततया दीर्घशोकस्य किं भाजनतया जन्मान्त
रोपात्तस्य दुष्कृतस्य किं दुःखदाननिपुणतया दग्धदैवस्य किमेकान्तवामतया दुरात्मनो मन्मथहतकस्य केन हेतुना नो
जज्झिस्म तदपि न ज्ञातवती केवलमतिविराल्लब्धचेतना दुःखभागिनी वह्नौ विनिपतितमसह्यशोकमात्मानमवनौ विचे
ष्टमानमपश्यम् । अन्तर्धाना चासंभावनीयं तत्तस्य मरणमात्मनश्च जीवितमुत्थाय हा हा किमिदमिति मुक्ताक्रन्दा
हा अंब हा तात हा सख्यः इति व्याहरन्ती · हा नाथ जीवितनिबंधन · आचक्ष्व मामेकाकिनीमशरणामकरुण विमुच्य यासि
पृच्छ तरलिकां त्वत्कृते यामया अनुभूतावस्था · युगसहस्रायमाणः कष्टेन नीतो दिवसः प्रसीद सकृदप्यालप दर्शयभ

दृश्यमान

अनुरक्तास्मि पां १

का.सू. केवत्सलतामीजदपि विलोकय पूरय मे मनोरथं भार्तास्मि भक्तास्मि अनाथास्मि बालास्मि अगतिकास्मि दुःखिता
१३६ स्मि अनन्यशरणास्मि मदनपरिभूतास्मि किमिति न करोषि दयां कथय किमपराद्धं किं वा नानुष्ठितं मया कस्यां वाना
ज्ञायामादृतं कस्मि न्वा त्वदनुकूलेनाभिरतये न कुपितो दासजनमकारणात्परित्यज्य व्रजन्नाबिभेषि कौलीनाद्‌लीका
नुरागप्रता[illegible]रणाकुशलया किं वा मया वामया पापया आः अहमद्यापि प्राणिमि हा हतास्मि मन्दभागिनी कथं न लज्जा तोन
विनयेन बंधुवर्गेन परलोके किं ज्ञातुः कृतकारिता यस्याः कृते तवेयमीदृशी दशा वर्तते नास्ति मत्सदृशी नृशंसहृ
दयायाहमेवं विधं भवन्तमुत्सृज्य गृहं गतवती किं मे गृहेण किं मंब्रया किं वा तातेन किं बंधुभिः किं परिजनेन हा कमुपयामि
शरणम यि दैव दर्शय दयां विज्ञापयामि त्वां देहि दयितं दाक्षिण्यं भगवति भवितव्यते कुरु कृपां पाहि वनितामनाथां भगवत्यो व
नदेवताः प्रसीदत प्रयच्छतास्य प्राणान् वसुंधरे सकललोकानुग्रहजननि रजनि किमर्थं नानुकंपसे तात कैलास शरणाग १३६
तास्मि तद्दर्शय दयालुतामित्येतानि चान्यानि च व्याक्रोशन्ती कियद्वा स्मरामि ग्रहगृहीतेव विह्वलेवोन्मत्तेव भूतोपहतेव व्यक

पां २

137

पमूः उपर्युपरिपतितनयनजलधारानिकरच्छलेनविलीयमानेवद्रवतामिवनीयमानाजलाकारेणेवात्मी
क्रियमाणाप्रलापाक्षरैरपिदशनमयूखशिखानुगततयासाश्रुधारैरिवनिष्पतद्भिः श्वासैररुहैरव्यविरलविगलत्कु
सुमतयामुक्तबाष्पजलबिंदुभिरिवाभरणैरपिप्रसृतविमलमणिकिरणाश्रुतयाप्ररुदितैरिवोपेता तत्क्षीवितायेवा
त्ममरणाय स्पृहयंती कृतस्यापिसर्वात्मनाहृदयंप्रविष्टमिच्छन्तीकरतलेनकपोलयोराश्यानचन्दनश्वेतज
टामूलेचललाटेनिहितसरसबिसयोश्चांस योर्मलयजरसलवलुलितकमलिनीपलाशावगुंठितेचहृदयेप
राभूतोत्ती पुण्डरीकनिष्ठुरोस्येवमप्यात्मानंगणयसिमामिन्दुपलभ्रमानामुहुर्मुहुरेनमन्वनयम् मुहुर्मुहुः पर्यचुंबं।
मुहुर्मुहुः कंठेगृहीत्वाव्याक्रोशं आः पापेत्वयापिमत्प्रत्यागमनकालंयावदस्यासवोनरक्षिताइतितामेकावलीमग
हियम्॥ अयिभगवन्प्रसादप्रत्युज्जीवयेनमिमिमुहुर्मुहुः कपिंजलस्यपादयोरपतं। मुग्धतरलिकाकंठेगृहीत्वा
जारुदम्॥ अद्यापिविलयन्तीनजानामितस्मिन्कालेकुतस्तान्यशिक्षितान्यनुपादिष्टान्यदृष्टपूर्वाणिमेह

का॰सू॰ २३७ तपुण्यायाःकृपणानिवाक्सहस्राणिप्रादुरभवन्॥कुतस्तेसंलापाःकुतस्तान्यतिकरुणानिवैक्लव्यरुदिता
नि॰अन्यएवसप्रकारःअलयोर्मयइवोदतिष्ठन्तन्सर्वबाष्पवेगानांजलयंत्राणीवामुच्यन्ताश्रुप्रवाहाणांप्ररोहा
इवनिरगच्छन्प्रलापानांशिखरशतानीवावर्द्धन्तदुःखानां॰प्रसूतंइवोदपाद्यन्तमूर्च्छानामित्येवमात्मवृत्तान्तमा
वेदयन्त्याएवतस्याःसमतिक्रान्तंकथमप्यवस्थान्तरमनुभवन्त्याएवचेतनांजहारमूर्छावेगः॥निष्पतन्तीं चशि
लातलेतांससंभ्रमंप्रसारितकरःपरिजनइवजातपीडश्चन्द्रापीडोविधृतवान्॰अश्रुजलार्द्रेणचतदीयेनैवोत्त
रीयवल्कलप्रान्तेनशनैःशनैर्वीजयन्संज्ञांग्राहितवान्॰उपजातकारुण्यश्चबाष्पसलिलोत्पीडेनप्रक्षाल्य मा
नकपोलयुगलोलब्धचेतनामवादीत्॰।भगवतिमयापापेनतवायंपुनरभिनवतामुपनीतःशोकोयेनैदृशींदशा
मुपनीतासि॰तदलमनयाकथया॰संह्रियतामियमस्ममप्यसमर्थःश्रोतुमतिक्रान्तान्यपिपरिसंकीर्त्यमानान्यनुभवस २३७
मांवेदनामुपजनयन्तिसुहृज्जनस्यदुःखानितन्नार्हसिकथंकथमपिविधृतानिमानसुलभानसून्पुनःपुनःस्मरणा

शोकानलेन्धनतामुपनेतुमित्येवमुक्त्वा दीर्घमुष्णं च निश्वस्य बाष्पायमाणलोचना सनिर्वेदमवादीत्॥ राजपुत्र
यातस्यामतिदारुणायां हतनिशायामेभिरतिनृशंसैरसुभिर्न परित्यक्ता नेदानीं परित्यज्य इति दूरापेत नूनम
पुण्योपहतायाः पापाया मम भगवान् यमोऽपि परिहरति दर्शनं कुतश्चैव मे कठिनहृदयायाः शोकः सर्वमिदमलीक
मस्य दुरात्मनः शठहृदयस्य सर्वथा हमनेनत्यक्त्रपेण निरपत्रपाणामग्रेसरीकृता यया वाधिगतमस्त यावज्ज नवेद ४
मध्येवेदमनुभूतं तस्याः का गणना कथने प्रति किं वापरमतः कष्टतरमाख्येयमन्यद्भविष्यति यन्नश्यकथने श्रोतुमा
ख्यातुं वा केवलमस्य वज्रपातस्यानन्तरमाश्चर्यं यदभूत्तदावेदयामि आत्मनश्च प्राणधारणकारणं जवइवाव्यक्तो
यः समुत्पन्नस्तं च कथयामि यया दुराशामृगतृष्णिकयाऽऽरोहितात्तहमिदमुपरतकल्पपरकीयमिव भारभूतं अप्रयोज
नमकृतघ्नं च हतशरीरं वहामि तदवधार्यतां ततस्तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया नेत्राहं कुकिल
प्यतरलिकामब्रुवम् अयि उत्तिष्ठ निष्ठुरहृदये किंयदद्यापि काष्ठान्याहृत्य विरचय चितां अनुसरामि जीविते

का०पू०
१३८ ष्वरमित्यत्रान्तरे रू गितिचन्द्रमण्डलाद्विनिर्गतो गगनादवतीर्य केयूरकोटिलग्नममृतफेनपिण्डपाण्डुरं प
वनतरलमंशुकोत्तरीयमाकर्षन्नुभयकर्णान्दोलितकुण्डलमणिप्रभानुरक्तगण्डस्थलः स्थूलमुक्ताफलतया ता
राणामिव ग्रथितमतितारं हारमुरसा दधानो धवलदुकूलपल्लवकल्पितोष्णीषग्रन्थिरलिकुलनीलकुटिलकुन्तलः शिखर
विकटमौलिरुल्लसत्कुमुदकर्णपूरः कामिनीकुचकुङ्कुमपत्रलतालाञ्छितांसदेशः कुमुदधवलदेहो महाप्रमाणः
पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः स्वच्छवारिधवलेन देहप्रभावितानेन क्षालयन्निव दिगन्तराण्यामोदिना
च शरीरतः स्रवता शिशिरेण शीतज्वरमिव जनयता ऽमृतशीकरवर्षिणा तुषारपटलेनेवानुलिम्पन्नङ्गानि चन्दनरस
छटाभिरिवासिञ्चन्नैरावतकरपीवराभ्यां बाहुभ्यां मृणालधवलाङ्गुलिभ्यामतिशीतलस्पर्शाभ्यां तमुपरतमुत्क्षिप्य
दुन्दुभिनादगम्भीरेण स्वरेण वत्से महाश्वेते न परित्याज्यास्त्वया प्राणाः पुनरपि तवानेन सह भविष्यति समागम इत्ये १३८
वमार्द्रतः पितेवाभिधाय सहैवानेन गगनतलमुदपतत्॥ अहं तु तेन व्यतिकरेण सभया सविस्मया सकौतुका चोन्मु

ल त्तर

खीकिमिदमितिकपिंजलमपृच्छम्।। असौतुससंभ्रममदत्त्वैवोत्तरमाःतिष्ठ दुरात्मन्क्वमेवयस्यमपहृ
त्यगच्छसीत्यभिधायोन्मुखःसंजातकोपोबद्धसवेगमुत्तरीयवल्कलेनपरिकरमुत्पतन्तमेवानुसरन्नम्बरमुदगा
त्।।पश्यन्त्याएवचमेसर्वएवतारागणमध्यमविशन्।ममतुतेनद्वितीयेनेवप्रियतममरणेनकपिंजलगमनेनद्विगुणीकृततरशो
कायाःसुतरामदीर्य्यतहृदयम्।किंकर्तव्यतामूढाचतरलिकामब्रुवं।अयि जानासिकथयकिमेतदिति।सातुतदवलोक्यस्त्रीस्वभाव
कातरातस्मिन्क्षणेशोकाभिभाविनाभयेनाभिभूतावेपमानगात्रयष्टिर्मन्मरणशंकियाचवराकीविषण्णहृदयासकरुणमवादीत्।।
भर्तृदारिकेनजानामिपापकारिणी।किंतुमहदिदमाश्चर्यममानुषाकृतिरेषपुरुषःसमाश्वासिताचानेनगच्छतासानुकंपंपित्रेव
भर्तृदारिकाप्रायेणचैवंविधादिव्याःस्वप्नेप्यविसंवादिन्योभवंत्याकृतयः।किमुतसाक्षात्।नचाल्पमपिविचारयंतीकारणमस्यमि
थ्याभिधानेपश्यामि।अतोयुक्तंविचार्यात्मानमस्मात्प्राणपरित्यागव्यवसायान्निवर्तयितुमतिमहत्खल्विदमाश्वासस्थानमस्याम
वस्थायाम्।अपिचतमनुसरन्गतएवकपिंजलस्तस्माच्चकुतोयंकोवायंकिमर्थंवानेनायमपगतासुरुत्क्षिप्यनीतःक्ववानीतःकस्माच्च
संभावनीयेनामुनापुनःसमागमाशाप्रदानेनभर्तृदारिकासमाश्वासितेतिसर्वमुपलभ्यजीवितंवामरणंवासमाचरिष्यसि।।

अदुर्लभो हि मरणमध्यवसितुं पश्चादप्येतद्भविष्यति· नच जीवन्कपिंजलो भर्तृदारिकामदृष्ट्वा स्थास्यतितेन तत्प्रत्या
गमनकालावधयोपि तावद्ध्रियंतांममी प्राणाइत्यभिदधानापादयोर्मेन्यपतत्॥ अहंतु सकललोकदुर्लंघ्यतयाजीवि
ततृष्णायाः क्षुद्रतयाच स्त्रीस्वभावस्य तयाच तद्वचनोपनीतया दुराशामृगतृष्णिकयाकपिंजलप्रत्यागमनकांक्षयातस्मिन्
कालेतदेवयुक्तं मन्यमाना नोत्सृष्टंजीवितमात्रया।हि किमिव न क्रियते· तांचपापकारिणीं कालरात्रिप्रतिमां वर्षसहस्रायमा
णां यातनामयीमिव दुःखमयीमिव नरकमयीमिवाग्निमयीमिवोत्सन्ननिद्रा तथैव क्षितितले विचेष्टमाना रेणुकणधूसरैरलकज
लार्द्रकपोलसंघातिनैर्विमुक्तव्याकुलैः शिरोरुहैरुपरुद्धमुखैर्निर्दयाक्रंदजर्जरस्वरक्षामक्षामेण कंठेन तस्मिन्नेव सरस्ती
रतरलिकाद्वितीया कृपां क्षपितवती॥ प्रत्युषसि च ध्यायतस्मिन्नेव सरसि स्नात्वा कृतनिश्चया तत्प्रीत्या तमेव कमण्डलुमादा
यतान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा बुद्ध्वा निस्सारतां संसारस्य ज्ञात्वा च मन्दपुण्यतामात्मनो निरूप्य चाप्रतीकारदा
रुणतां व्यसनोपनिपातानामाकलय्य दुर्निवारतां शोकस्य दृष्ट्वा च निष्ठुरतां दैवस्य चिन्तयित्वा चातिबहुलदुःखतां स्नेहस्य १३९
भावयित्वा नित्यतां सर्वभावानामवधार्य चाकाण्डभंगुरतां सर्वसुखानामविगणय्य तातमंबां च परित्यज्य सह परिजनेन मनसा

चौ

सकलबंधुवर्गं निवर्त्य विषयसुखेभ्यो मनः संहृत्य संयम्येंद्रियाणि गृहीतब्रह्मचर्या देवं त्रैलोक्यनाथमनाथशरण-
मिमं शरणार्थिनी स्थाणुमाश्रिता॥ अपरेद्युश्च यतः कुतोपि समुपलब्धवृत्तांतस्तातः सहांबया सहबंधुवर्गेणागत्य सुचिरं कृताक्रं-
दस्तैस्तैरुपायैरभ्यर्थनाभिश्च बहुभिरुपदेशैश्चानेकप्रकारैः परिसांत्वनैर्नानाविधैर्गृहागमनाय मम महांतं यत्नमकरोत्। यदा च
नैनमस्मादध्यवसायात्कथंचिदपि शक्तो व्यावर्तयितुमिति निश्चयमधिगतवांस्तदा निराशोपि दुस्त्यजतया दुहितृस्नेहस्य पुनः
पुनर्मया विसृज्यमानोपि बहून्दिवसान्स्थित्वा सशोक एव दह्यमानहृदयो गृहानयासीत्॥ गते च ताते ततः प्रभृति तस्य जन-
स्याश्रुमोक्षमात्रेण किल कृतज्ञतां दर्शयन्ती तदनुरागकृशामिदमपुण्यबहुलमस्तमितलज्जमभाग्यभूतमनेकक्लेशाया-
ससहस्रनिवासं दग्धशरीरकं बहुविधैर्नियमशतैः शोषयन्ती वन्यैश्च फलमूलवारिभिर्वर्तमाना जपव्याजेन तद्गुणगणानिव
गणयन्ती त्रिसंध्यमत्र सरसि स्नात्वोपस्पृशन्ती प्रतिदिनमर्चयन्ती देवं त्र्यंबकमस्यामेव गुहायां तरलिकया सह दीर्घशोक-
मनुभवन्ती न्यवसम्॥ साहमेवंविधा पापकारिणी निर्लज्जा निर्लक्षणा क्रूरा च निःस्नेहा च नृशंसा च गर्हणीया निःप्रयोजनो-
त्पन्ना निःफलजीविता निरवलंबना निःसुखा च किं मया दृष्टया पृष्टया वा कृतब्राह्मणवधमहापातकया करोति महाभाग इ-

निर्नाथा १ कृतज्ञा २

४०

का०सू० ब्धुका पाण्डुनावलुलोपाङ्गेन शशिनमिव शरन्मेघशकलेनाच्छाद्य वदनं दुर्निवारं बाष्पवेगमपारयन्ती निवारयितु
२४० मुन्मुक्तकंठमतिचिरमुच्चैः प्रारोदीत्॥ चन्द्रापीडस्तु प्रथममेव तस्या रूपेण विनयेन दाक्षिण्येन मधुरालापतया निस्पृहत
याचातितपस्विनतया च प्रशान्तत्वेन च निरभिमानतया च महानुभावत्वेन च शुचितया चोपारूढगौरवोभूत्। तदानीं तु तेन ना
परेण दर्शितसद्भावेन स्ववृत्तान्तकथनेन तया च कृतज्ञतया हृतहृदयः सुतरामारोपितप्रीतिरभवत्॥ आर्द्रीकृतहृद
यश्च शनैःशनैरेनामभाषत। भगवति क्लेशभीरुः कृतघ्नः सुखासंगलुब्धो लोकः स्नेहसदृशं कर्मानुष्ठातुमशक्तो निःफलेना
श्रुपातमात्रेण स्नेहमुपदर्शयन्रोदिति। त्वया तु कर्मणैव समाचरन्त्या किमिव न प्रेमाविनमाचरितम्। येन रोदिषि। तद
र्थमाजन्मनः प्रभृति समुपचितपरिचयः श्रेयानसंस्तुत इव परित्यक्तो बान्धवजनः। संनिहिता अपि तृणवदवधीरिता
विभवा विमुक्तान्यतिशायितसुनासीरसम्पर्कान्यैश्वर्यसुखानि। मृणालिनीवातितनीयस्यपि नितरां तनिमानमनुचितैः २४०
संक्लेशैरुपनीता तनुः गृहीतं ब्रह्मचर्यं आयोजितस्तपसि महत्यात्मा। वनिताजनदुष्करमवगाहितमरण्यावस्थानमपि बाला
यासेनैवात्मा दुःखाभिहतो न परित्यज्यते। महाय साधु यत्नेन गरीयसि क्लेशे निक्षिप्यते केवलमेतदनुमरणं नाम तदतिनि:

फलमविद्वज्जनाचरितएषमार्गोमोहविलसितमेतदज्ञानपद्धतिरियंरभसाचरितमिदंक्षुद्रदृष्टिरेषा॰अतिप्रमादोऽयं
मौर्ख्यस्खलितमिदं॰यदुपरतेपितरिभ्रातरिसुहृदिभर्त्तरिवाप्राणाःपरित्यज्यन्तेस्वयंचेन्नजहतिपरित्याज्याः।अत्रहिविचा
र्यमाणेस्वार्थएवप्राणपरित्यागोयमसह्यशोकवेदनाप्रतीकारत्वादात्मनःउपरतस्यतुनकमपिगुणमावहतिनतावत्तस्या
यंप्रत्युज्जीवनोपायोनधर्मोपचयकारणंनशुभलोकोपार्जनहेतुर्ननिरयपातप्रतीकारोनदर्शनोपायोनपरस्परसमागम
निमित्तमन्यामेवस्वकर्मफलपरिपाकोपचितामसाववशोनीयतेकर्मभूमिमसावप्यात्मघाती॰केवलमेनसासंयुज्यते
जीवंस्तुजलाञ्जलिदानादिना बहूपकरोत्युपरतस्यात्मनश्चमृतस्तुनोभयस्यापि॰स्मरतावत्प्रियामेकपत्नींरतिं
भगवतिभर्त्तरिमकरकेतौसकलाबलाजनहृदयहारिणिहरहुतभुग्दग्धेप्यविरहितामसुभिःपृथांचवार्ष्णेयींशूरसेनसुतां
मभिरूपेसावज्ञविजितसकलराजकमौलिकुसुमवासितपादपीठेपत्यावखिलभुवनबलिभागभुजिपाण्डौ॰किन्तुमुनिशा
पानलेन्धनतामुपागतेप्यपरित्यक्तजीविता॰मुत्तरांचविराटदुहितरंबालांबालशशिनिवनयनानन्दहेतौविनयवतिविक्रान्तेर
पवत्यभिमन्यावागतेपिच्छिन्नदेहां॰दुःशलांचधृतराष्ट्रदुहितरंभ्रातृशतोत्संगलालितामतिमनोहरेहरवरप्रदानवर्जि

म१

का·सू· १४१ नमहि त्रिसिंधुराजेन यज्ञ्येऽर्जुनेन लोकान्तरमुपनीतेष्वकृतप्राणपरित्यागा मन्याश्चरन्ध्रः सुरासुरमुनिमनुजसि
द्धगंधर्वकन्यका भर्तृरहिताः श्रूयन्ते सहस्रशो विष्टतजीविताः प्राण्मुच्येनापि जीवितसंदिग्धोप्यस्य समागमो यदि स्यात्:
भगवत्यानुरक्तः पुनः स्वयमेव समागमसरस्वती समाकर्णिता· अनुभवेच को विकल्पः कथं च नादृशानामप्राकृताकृती
नीमहात्मनामवितथगिरां गरीयसापि कारणेन गिरिवेतथ्यमास्पदीकुर्यात् ॥ उपरतेन च सह जीवन्त्याः कीदृशी समा
गतिः· अतो निस्संशयमसावुपजातकारुण्यो महात्मा पुनः प्रत्युज्जीवनार्थमेवैनमुत्क्षिप्य सुरलोकं नीतवान्· अचिन्त्यो
हि महात्मनां प्रभावः बहुप्रकाराश्च संसारवृत्तयः· चित्रं च दैवमाश्चर्यातिशययुक्ताश्च तपस्सिद्धयोऽनेकविधाश्च कर्मणां श
क्तयः॥ अपि च· सुनिपुणमपि विमृशद्भिः किमिवान्यत्तदपहरणे कारणमाशंक्येत· जीवितप्रदानादृतेन चासंभाव्यमिदम
वगन्तव्यं भगवत्या चिरप्रवृत्त एष पंथाः॥ तथा हि॥ विश्वावसुना गंधर्वराजेन मेनकायामुत्पन्नां प्रमद्वरां नाम कन्यामाशी का·३
विषप्रजीवितां स्थूलकेशाश्रमे भार्गवस्य च्यवनस्य नप्ता प्रमतितनयो मुनिकुमारको रुरुर्नाम स्वायुषोऽर्धेन योजितवान्· १४१
अर्जुनश्चाश्वमेधतुरगानुसारिणात्मजेन बभ्रुवाहननाम्ना समरशिरसि शरापहृतप्राणमुलूपी नाम नागकन्यकासं

प्रवि२ सर्वथा३

142

ज्ञासमकरोत्· अभिमन्युतनयमिव परीक्षितमश्वत्थामास्त्रपावकपरिप्लुष्टमुदरादुपरतमेव निर्गतमुत्तराजठरात्कोपोप
जनितकृपो भगवान्वासुदेवो दुर्लभानसून्प्रापितवान्। उज्जयिन्यां च सान्दीपनिर्द्विजतनयमन्तकपुरादपहृत्य त्रिभुवन
वन्दितचरणः स एवानीतवान्। अत्रापि कथंचिदेवमेव भविष्यति· तथापि किं क्रियते कथं वा लभ्यते· प्रभवति हि भगवान्विधि
र्बलवती च नियतिरात्मेच्छया न शक्यमुच्छ्वसितुमपि· अतिपिशुनानि चास्यैकान्तनिष्ठुरस्य दैवहतकस्य विलसितानि· न क्ष
मते दीर्घकालमव्याजरमणीयं प्रेम· प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि सुखानि आयतस्वभावानि दुःखानि·
कथमप्येकस्मिञ्जन्मनि समागमो जन्मान्तरसहस्राणि च विरहः प्राणिनाम् अतो नार्हस्यनिन्द्यमात्मानं निर्वेदितुम् आपतन्ति हि
संसारपथमतिगहनमवतीर्णानामेते वृत्तान्ताः धीरा हि तरन्त्यापदमित्येवंविधैरन्यैश्च मृदुभिरुपायैस्तैस्तैः संस्थाप्य तां पु
नरपि निर्झरजलेनाञ्जलिपुटोपनीतेन निच्छन्तीमपि बलात्प्रक्षालितमुखीमकारयत्॥ ॥अत्रान्तरे च कृतमहाश्वेता
वृत्तान्तोपजातशोक इव समुत्सृष्टदिवसव्यापारो रविरपि भगवानधोमुखतामयासीत्। अथ क्षीणे दिवसे परिणतप्रियङ्गु
मञ्जरीरजोनिभे पिञ्जरिमरज्यमाने बिले विनिमग्ने मण्डले· अविरलकुसुमरसरक्तदुकूलकोमलेन वास्ताम्रेण मुच्यमानेषु

कुसुमर सॉ४

का·सू· दिङ्मुखेषु चकोरनयनतारकाकान्तिना च पिंगलिम्ना विलिप्यमाने तिरोहितनीलिम्नि व्योम्नि कोकिलविलोचनच्छ
१४२ विबभ्रुणि चारुणायति सांध्ये भुवनमर्चिभिर्यथाप्रधानमुन्मिषत्सु ग्रहग्रामणीषु वनमहिषमलीमसवपुषि लोचनमुषि मुषि
ततारकापथप्रथिम्नि कालिमानमातन्वति शार्वरे तमसि अनन्तु तिमिरनिरोहितहरितनासु गहनतां यान्तीषु तरुराजिषु र
जनिजलजालबिन्दुजनितजडिम्नि बहलवनकुसुमपरिमलानुमितगमने चालितलताविटपगहने प्रहृष्टे च पवने निद्रा
निभृतपतत्रिणि त्रियामामुखे महाश्वेता मन्दं मन्दमुत्थाय भगवतीमुपास्य पश्चिमां संध्यां कमण्डलुजलेन प्रक्षालितचरणा वल्क
लशयनीये सखेदमुष्णं निश्वस्य न्यषीदत्॥ चन्द्रापीडोऽप्युत्थाय सकुसुमं प्रस्रवणजलाञ्जलिमिव कीर्य कृतसंध्याप्रणामः
तस्मिन् द्वितीये शिलातले मृदुभिर्लतापल्लवैः शय्यामकल्पयत्॥ उपविष्टश्च तस्यां पुनः पुनस्तमेव मनसा महाश्वेतावृत्ता
न्तमन्वभावयत्। आसीच्चास्य मनस्येवं नामायमप्रतीकारदारुणो दुर्विसहवेगः कष्टः कुसुमायुधो यदनेनाभिभूतामहा १४२
तोप्येवमनपेक्षितकालक्रमाः समुत्सारितधैर्याः सद्योजीवितं जहति। सर्वथा नमो भगवते त्रिभुवनाभ्यर्चितशासनाय म

143

करकेतनायेति पुनः॥ पप्रच्छ चैनां सगर्वा निसातव परिचारिका वनवासव्यसनमित्रं दुःखसब्रह्मचारिणी तरलिकाख्या ग
तेलिः॥ अथ सा कथयत् महाभाग यत्तन्मया कथितमसृतसंभवमप्सरसां कुलं तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्यका भू
त्॥ तस्याश्चासौ सकलगंधर्वकुलमुकुटः कुसुमपीठप्रतिष्ठितचरणो देवश्चित्ररथः पाणिमग्रहीत्॥ अपरिमितगुणगणाकृ
ष्टहृदयश्च वनितादुर्लभेनाधःकृताशेषान्तःपुरेण हेमपट्टलांछनेन छत्रचामरचिह्नेन महादेवीशब्देन परं प्रीतः प्रसादमकरो
त्॥ अन्योन्यप्रेमसंवर्द्धनपरयोश्च तयोर्यौवनसुखानि सेवमानयोः कालेनाश्चर्यभूतमेकमेव जीवितमिव पित्रोरधवासर्वस्येव ग
धर्वकुलस्य जीवलोकस्यवाद्भुतिरत्नमुत्पादि कादंबरीनाम्ना॥ सा च मे जन्मतः प्रभृत्येकाशनशयनयानासनापरस्थान
मखिलविस्रंभधाम द्वितीयमिव हृदयं बालमित्रं कृतं तया मया च नृत्यगीतादिकलासु कृताः परिचयाः शिशुजनोचिताभिश्च
क्रीडाभिरनियंत्रणानिर्भरमपनीतो बालभावः॥ सा च मुनेर्वमदीयेन त्वद्वृत्तांतेन समुपजातशोका निश्चयमकार्षीत्॥ नाहं क
थंचिदपि सशोकायां महाश्वेतायामात्मनः पाणिं ग्राहयिष्यामीति सखीजनस्य पुरतः सशपथमभिहितवती॥ यदि कथमपि मा
निच्छन्तीमपि बलात्तातः कदाचित्कस्मैचिद्दातुमिच्छति तदाहमनशनेन हुताशनेन वा रज्ज्वा वा विषेण वा नियतमात्मानमुत्स्रक्ष्या

ति ५

मासीत् २४

का.उ. २४३ मीति।सर्वंचतदात्मदुहितुःकृतनिश्चयंनिश्चलंभावितंकर्णपरंपरयापरिजनसकाशाद्गंधर्वराजश्चित्ररथःस्वयमशृ
णोत्।गच्छतिचकियत्यपिकालेसमुपारूढनिर्भरयौवनामालोक्यसुतांबलवदुपतापपरवशःक्षणमपिनधृतिमलभत।।
एकापत्यतयाचातिप्रियतयाचनशशाककिंचिदपितामभिधातुमिति।अपश्यंश्चान्यदुपायान्तरमिदमत्रप्राप्तकालमितिमत्वा
तयामहादेव्यामदिरयासहावधार्यक्षीरोदनामानंकंचुकिनंवत्सेमहाश्वेतेत्वद्व्यतिरेकेणदग्धहृदयानामिदमपरमस्माक
मुपस्थितमिदानींतुकादंबरीमनुनेतुंत्वंशरणमितिसंदिश्यमत्समीपमद्यैवप्रत्युषसिप्रेषितवान्।।ततोमयागुरुवचनगौर
वेणसखीप्रेम्णाचक्षीरोदेनसार्द्धं सातरलिकासखिकादंबरिकिंदुःखितमपिजनमतितरांदुःखयसिजीवन्तीमिच्छसि
चेन्मातःकुरुगुरुवचनमवितथमितिसंदिश्यविसर्जिता।नातिचिरंगतायांचतस्यामनन्तरमेवेमांभूमिमनुप्राप्तोमहाभागइत्य
भिधायतूष्णीमभवत्।। ।।अत्रान्तरेचलोचनजलेनविडंबयन्निवशशीकाननदग्धमध्यंमहाश्वेताहृदयमुद्वहन्निवमुनिकु
मारकवधमहापातकंदर्शयन्निवचिरकाललग्नंदक्षशापानलदाहचिह्नमविरलभस्मांगरागधवलःकृष्णमृगाजिनप्रा २४३
वृतार्द्धवामस्तनइवांबिकायाधूर्जटिजटामण्डलचूडामणिर्भगवानुदगात्तारकाराजः।क्रमेणविजृंभेगगनमहापयोधिपुलि

144

निसीतपत्र निद्रामंगलकलशे कुमुदबांधवे विद्वरितकुमुदवनेषवलितदशदिशि शंखश्वेते श्वेतायमाने मानिनी
मानशत्रौ शशांकमंडले शशिकरकलापकलितासु व्रजंतीसुकृशिमानमौडवीक्षुप्रभासु प्रज्ञन्तुचकैलासशशिम
णिशिलानां सर्वतः स्रोतः स्राविषु प्रशान्तवारोक्षुम्रशालकेदलि निचावस्कंदपतितचंद्रकर इव विद्रुतकमलवनशो
भेमात्यच्छोदसरः पयसि समुपोढमोह निद्रे चक्रवाकीयोवाजिविवलितवपुषि विरुवति विरहिणी चक्रवाकचक्रवा
ले निर्ह्रते चचंद्रोदये विद्रुतेरुमैत्रूलउकरागनीहारिणि वियदि हारिणि मनोहारिणि विद्याधराभिसारिकाजनेचं
द्रापीडः सुशामालोक्य महाश्वेतां पल्लवशयने शनैः समुपाविशत्। अस्यां वेलायां किं नु खलु मामंतरेणाचिंत
यति वैशंपायनः किंवावराकी पत्रलेखा किंवा राजपुत्रलोक इति चिंतयन्नेव निद्रां ययौ। अथ क्षीणायां ॥

नयन२ निकर२

च२ ग३ गमन२

काद० पायासुषसि संध्यामुपास्य शिलातलोपविष्टायां पवित्राण्यघमर्षणानि जपंत्यां महाश्वेतायां निर्वर्तितप्रा
१४४ भातिकविधौ चंद्रापीडे तरलिका षोडशवर्षवयसा सावष्टंभाकृतिना मरखेदालसगजराजगुरुणा पद
निक्षिपता पर्युषितचंदनांगरागधूसरोरुदंडद्वयेन कुंकुमरागपिंजरारुणेन चामीकरशृंखलाकलापनिबि
डनियमितकच्छाबंधातिरिक्तप्रेंखत्पल्लवमंबरवासएककेवलेन वसानेन निरुद्धरतयाविभक्तमध्येन विपुल
वक्षःसारीशोनुवृत्तबाहुना वामप्रकोष्ठदोलायमानमणिवलयेन कर्णाभरणमरकतविच्छिकीर्यमाणैमचे
मुखकिशोरोद्गच्छद्युपजालंबतांश्रुकोत्तरीयमिवैकस्कंधविन्यस्तमुद्वहता चूतपल्लवकोमलमनवरततांबूल
बद्धरागं धकारमधरं दधता कर्णांतायतस्य स्वभावधवलस्य धवलिम्ना लोचनयुगलस्य धवलयता १४८

145

वहिर्गतरागिणाकुसुमधवलेनापुंडरीकमयमिव दिवसंकुर्वताकनकपट्टपृथुललाटेनातिकुटिलनीलकु
टिलशिरसिजेनाग्राम्याकृतिनाराजकुलसंपर्कचतुरेणांगधवेशरकेणकेयूरकनाम्नानुगम्यमानाप्रत्युषस्यै
वप्रादुरासीत् ॥ आगत्यचकोयमितिसुपजातकुतूहलाचंद्रापीडंसुचिरमालोक्यमहाश्वेतायाःसमीपमुपसृत्यकृ
तप्रणामासविनयमुपाविशत् । अनंतरंचातिदूरान्तेनोत्तमांगेनप्रणम्यकेयूरकोपिमहाश्वेतादृष्टिनिसृष्टेनाति
समीपवर्तिशिलातलंभेजे । समुपविष्टश्चतंचतमहःसर्वमधःकृतकुसुमायुधमुपहसितसुरासुरगंधर्वविद्याधररूपंरूपाति
शयंचंद्रापीडस्यदृष्ट्वाविस्मयमापेदे । परिसमाप्तजपातुमहाश्वेतापप्रच्छतरलिकां कच्चित्त्वयादृष्टाप्रियसखीकादंबरी
कुशलिनीकरिष्यतिवातद्वस्मद्वचनमिति । अथसातरलिका विनयावनतमौलिरीषदालंबितकर्णपाशमतिमधु

वि१२ सि३

का॰ऌ॰ रयागिराव्यजिज्ञपत्। भर्तृदारिके दृष्टा खलु मया भर्तृदारिका कादंबरी सर्वतःकुशलिनी विज्ञापिता च निखिलं भर्तृदुहि
२४५ तुःसंदेशमाकर्ण्य तया संजातमुच्छस्य लग्नाश्रुबिंदुवर्षं स्थित्वा प्रतिसंदेष्टुं तदेहस्तयैव विसर्जितस्तस्या एव वीणावाद
कः केयूरकः कथयिष्यतीत्युक्त्वा विरराम। विरतवचसि तस्यां केयूरकोऽब्रवीत्। भर्तृदारिके महाश्वेते देवी कादंबरी दृढदत्त
कंठग्रहा त्वां विज्ञापयति। यदियमागत्य मामवस्थापलिकागत्त्व कथय किमयं गुरुजनानुरोधः किमिदं मच्चित्तपरीक्षणं
किं गृहनिवासापराधनिपुणोपालंभः किं प्रेमविच्छेदाभिलापः किं भक्तजनपरित्यागोपायः किं वा प्रकोपः जानास्येव मे स
हजप्रेमनिस्यंदनिर्भरं हृदयमेवमतिनिष्ठुरं संदिशंती कथमसि न लज्जिता तथा मधुरभाषिणी केनासि शिक्षिता वक्तुम
प्रियं परुषमभिधातुं। स्वस्थोऽपि तावत्क इव सन्हृदयः कनीयस्यवसानविरसे कर्मणि मतिमुपसर्पयेत्। किमुत नातिदुःखा
भिहतहृदयोऽस्मद्विधो जनः सुहृद्दुःखखेदिते हि हृदये केव सुखाशा केव निर्वृतिः कीदृशाः संभोगाः कानि वा हसितानि २४५

146

येनेदृशीं दशामुपनीता प्रियसखी कथमतिदारुणं तमहं विषमिव प्रियकारिणं कामं सकामं कुर्यां। दिवसकरास्तमनवि
धुरासु नलिनीषु सहवास   परित्यज्य चक्रवाकयुवतिरपि पतिसमागमसुखानि परित्यजति किन्तु नार्योपि च यत्र
भर्तृविरहविधुरापरिरम्भनपरपुरुषदर्शनादिना निशेनिवसति प्रियसखी कथमिव तन्मम हृदयमपरः प्रविशेदितरो ज
नः यत्र च भर्तृविरहविधुरा तीव्रतनकर्षितांगी प्रियसखी महत्त्वं दुःखमनुभवति तत्र हा हमवगणय्य नात्मसुखार्थिनी
पाणिग्रहविधाभिः कथं वा मम सुखं भविष्यति त्वत्प्रेमणा चास्मिन्वस्तुनि कुमारिकाजनविरुद्धं स्वातन्त्र्यमालम्ब्यांगीकृ
तमयशः। समव धीरितो विनयो गुरुवचनमतिक्रमितं न गणितो लोकापवादो वनिताजनस्य सहजमाभरणमुत्सृ
त्सृष्टा लज्जा सा कथय कथमिव पुनरत्र प्रवर्तते तदयमेंजलिरुपरचितः प्रणामो यमिदं च पादग्रहणमनुगृहाण मां तेन
मितो गनासि मे जीवितेन सह   मा कृथाः स्वप्नेपि पुनरिममर्थं मनसीत्यभिधाय पल्लक्ष्मीमभवत्। महाश्वेता तु तच्छ्रुत्वा सु

का॰पू॰ चिरंविचार्यगछस्वयमेवाहमागत्ययथार्हमाचरिष्यसीत्युक्त्वाकेयूरकंप्राहिणोत्।गतेचकेयूरकेचंद्रापीडस्तुवाच।
१४६ राजपुत्ररमणीयोहेमकूटश्चित्राचविचरथराजधानीबहुकुतूहलःकिंपुरुषविषयःपेशलोगंधर्वलोकःसरलहृदया
महानुभावाचकादंबरीयदिनातिखेदकरमिवगमनंकलयसितदासीरितिवागुरुप्रयोजनमदृष्टचरविषयकुतूहलि
वाचेतोमद्वचनमनुरुध्यतेवाभवन्मतिःसुखदायिवाआश्चर्यदर्शनमर्हसिवाहमिमंप्रणयमिममप्रत्याख्यानयोग्यंवा
जनंमन्यसेसमारूढोवापरिचयलेशोनुग्राह्योवायंजनस्ततोनार्हसिनिष्फलीकर्तुमभ्यर्थनामिमामितोमयैवसहगत्वा
हेमकूटमति रमणीयत्तानिधानंतत्रदृष्ट्वाचमन्निर्विशेषांकादंबरीमपनीयतस्याःकुमतिमनोमोहविलसितमे
कमहोविश्रम्यश्वोभूतेप्रत्यागमिष्यसिसमहिनिष्कारणबांधवंभवंतमालोक्यैवदुःखांधकारभाराक्रांतेन महतःका
लादुच्छ्वसितमिवचेतसाश्रावयित्वास्ववृत्तांतमिमंसत्यतामिवगतःशोकोदुःखिनमपिजनंरमयंतिसज्जनसमागमाः १४६

परसुखोपपादनपराधीनश्चभवादृशांगुणोदयइत्युक्तवतींचैनांचंद्रापीडोब्रवीत।भगवतिदर्शनात्प्रभृतिपरवानयंजनःकर्त्तव्येषु
यथेष्टंशंकितयानियुज्यतामित्यभिधायतयासहैवोदचलत्।क्रमेणचगत्वाहेमकूटमासाद्यगंधर्वराजकुलंसमतीत्यकांचनतोर
णानिसप्तकक्षांतराणिकन्यांतःपुरद्वारमवाप।।महाश्वेतादर्शनप्रधावितेनदूरादेवकृतप्रणामेनकनकवेत्रलताहस्तेनप्रतीहारज
नेनोपदिश्यमानमार्गःप्रविश्यासंख्येयनारीशतसहस्रसंबाधंस्त्रीमयमपरमिवजीवलोकमियत्ताग्रहीतुमेकत्रत्रैलोक्यस्त्रैणमिव
संगृहीतंअपुरुषमिवसर्गांतरमंगनाद्वीपमिवापूर्वमुत्पन्नंपंचममिवनारीयुगावतारमपरमिवपुरुषद्वेषिप्रजापतिनिर्माण
मनेककल्पकल्पनार्थमुत्पाद्यस्थापितमिवांगनाकोशमतिविस्तारिणायुवतिजनलावण्यप्रभाप्रसरेणाप्लावितदिगंतरेणासिं
चतेवाच्छतररसविसरेणादिवसमार्द्रीकुर्वतेवभुवनांतरालंबहलप्रभावर्षिणामरकतमणिमयेनसर्वतःपरिगततयातेजोमय
मिवचंद्रमंडलसहस्रैरिवनिर्मितसंस्थानंज्योत्स्नयेवघटितसंनिवेशमाभरणप्रभाभिरिवनिष्पादितदिगंतरंविभ्रमैरिवकृत

का॰पू॰ सर्वोपकरणांयौवनविलासैरिवोत्पादितावयवं रतिविलसितैरिव विरचितसंचयं मन्मथचरितैरिव कल्पितावकाशमनुरागेणेवानु

१४७. लिप्तसकलजनप्रदेशं शृङ्गारमयमिव सौन्दर्यमयमिव सुरताधिदैवतमयमिव कुतूहलमयमिव प्रेमद्रवमयमिव कुसुममयमिव आ

श्चर्यमयमिव सौकुमार्यमयमिव कुमारः कुमारीपुराभ्यन्तरं ददर्श। अतिबहुलतया च कन्यकाजनस्य समन्तादाननद्युतिभिरिंदुबिंब

वृष्टिमिव पतंतीमपांगविक्षेपैश्चलितकुवलयवनमयीमिव क्रियमाणामवनीमनिभृतभ्रूलताविभ्रमैः कामकार्मुकशतानीव भ्र

चलितानि शिरसिजकलापांधकारैर्बहुलपक्षप्रदोशसार्थानिसंबध्नतः स्मितप्रभाभिरुत्फुल्लकुसुमधवलानिव संचरणैः

श्वसितानिलपरि मलैर्मलयमारुतानिव परिभ्रमतः कपोलमंडलालोकैर्माणिक्यदर्पणसहस्राणीव स्फुरितानि करतल

रागेण रक्तकमलवनवर्षितामिव जीवलोकं कररुहकिरणैः स्फुरणैः कुसुमायुधशरसहस्रैरिव संछादितानि दिगंतरा

णि आभरणकिरणैरिंद्रायुधजालैरुद्धीयमानानीव भवनमयूरवृंदानि यौवनविकारैरुत्पाद्यमानानीव मन्मथसहस्राण्य १४७

नवसंतदिवसा ४

148

द्राक्षीत्।उचितव्यापारव्यपदेशेनचकुमारिकाणांसखीहस्तावलंबेषुपाणिग्रहणानिवेणुवाद्येषुचुंबनव्यतिकरान्वी
णासुकररुहव्यापारान्कंदुकक्रीडासुकरतलप्रहारान्भवनलतासेककलशकंठेषुभुजलतापरिष्वंगान्सखीष्वादे
लासुनितंबस्थलेअंरिवितानितांबूलवीटिकावखंडनेषुदशनोपचारान्बकुलविटपेषुमधुगंडूषप्रचारान्अशोकतरु
ताडनेषुचरणाभिघातान्उपहारकुसुमस्खलनेषुसीत्कारान्इतिरिक्तसुरतमिवाभ्यस्यंतीनामपश्यत्।यत्रचकन्यकाज
नस्यकपोलतलालोकएवमुखप्रक्षालनं।लोचनान्येवकर्णोत्पलानिहसितछवयएवांगरागाःनिश्वासाएवाधिवासां
बंधुकायःअधरद्युतिरेवकुंकुमसुखानुलेपनंआलापाएववंतंत्रीविनोदाःभुजलताएवचंपकवैकक्षकमालाःकरतलान्येवली
लाकमलानिस्तनाएवदर्पणाःनिजदेहप्रभैवांशुकावगुंठनंजघनस्थलान्येवविलासमणिशिलातलानिकोमलांगुलिदलैर्
वचरणालक्तकरसोनखमणिमरीचयएवकुट्टिमोपहारकुसुमप्रकाराःयत्रचालक्तकरसोपिचरणानिनारोबकुलमालि

व३ परिपल२ पि२

का॰पू॰ कामेखलाकलनमपिगमनेविघ्नकरं अंगरागगौरवमपि विकश्वासनिमित्तं मंशुकभारोपिग्लानिकारणं मंगलप्रतिसरवलयविहति
२५८ रपिकरतलविधुतिहेतुः अवतंसकुसुमधारणमपिश्रमः कर्णोत्पलकमलांतरलमधुकरपक्षपवनोप्यायासकरः तथा च यत्र सखी
दर्शनेष्वकृतहस्तावलंबनमुत्थानमतिसाहसं प्रसाधनेषु हारभारसहिष्णुता स्तनकार्कश्यप्रभावः कुसुमावचयेषु द्वितीयकुसुम
ग्रहणमपि युवतिजनोचितं कन्यकाविज्ञानेषु माल्यग्रथनमसुकुमारजनव्यापारो देवताप्रणामेषु मध्यभागभंगो नातिविस्म
यकरः तस्यैवंविधस्य किंचिदस्यांतरमतिक्रम्येतस्येतस्य परिभ्रमतः कादंबरीप्रत्यासन्नस्य परिजनस्य शुश्राव तांस्तांनालापान् तथाहि
लवलिके कल्पयकेतकीधूलिभिर्लवलीलतालवालमंडलानि सागरिके गंधोदककनकदीर्घिकासु विकिर रत्नवालुकाः मृणालिके
कृत्रिमकमलिनीषु कुंकुमरेणुमुष्टिभिः स्फुरयंत्रचक्रवाकमिथुनानि मकरिके कर्पूरपल्लवरसेनाधिवासय गंधपात्राणि रजनि
केतमालवीथिकांधकारेषु निधेहि मणिप्रदीपान् कुमुदिके स्थगय शकुनिकुलरक्षणाय मुक्ताजालैर्दाडिमीफलानि निपुणिके २५८

नतिमनोहरा४

149

लिख मणिशालभंजिकास्तनेषु कुंकुमरसपत्रभंगान्। उत्पलिके परामृश कनकसंमार्जनीभिः कदलीगृहमरकतवेदिकाः। के
सरिके सिंच मदिरारसेन बकुलकुसुममालागृहाणि। मालतिके पाटलय सिंदूररेणुना कामदेवगृहदंतवलभिकाः। नलिनिके पा
यय कमलमधुरसं भवनकलहंसान्। कदलिके नय धारागृहं गृहमयूरान्। कमलिनिके प्रयच्छ चक्रवाकशावकेभ्यो मृणालक्षीररसं।
चूतलतिके देहि पंजरपुंस्कोकिलेभ्यः सहकारकलिकांकुरान्। पल्लविके भोजय मरिचायपल्लवदलानि भवनहारीतान्। लवंगिके विक्षि
प चकोरपंजरेषु पिप्पलीतंडुलशकलानि। मधुकरिके विरचय कुसुमाभरणकानि। मयूरिके संगीतशालायां विसर्जय किंनरमिथुनानि।
कदलिके समारोहय क्रीडापर्वतशिखरं जीवंजीवमिथुनानि। हरिणिके देहि पंजरशुकसारिकोपदेशमित्येनान्यानि च परिहासजल्
पितान्यश्रौषीत्। चामरिके मिथ्यासुगृहीतामकरं यंतीकमपि सेवातु मिच्छसि। अयि यौवनविलासैरुन्मत्ते कृतविज्ञानासि यात्वं स्तनक
लशभरावनम्यमाने सूत्तिमणिस्तंभममरुखानवलंबसे। परिहासकांछि मणिरत्नभित्तिपतितमात्मप्रतिबिंबमालपसि। पवनहृतोत्तरी

तथाहि २

हरिणपोतकेभ्यो मृदूनयवांकुराञ्छकुनिके देहि २

यांशुके हारप्रभामायासितकरतला संकलयसि। मणिकुट्टिमे रूपहारकमलस्खलनभीते निजमुखप्रतिबिंबकानि परिहरसि।
 जाल वातायनपतितपद्मरागालोकं प्रतिबालातपशंकया करतलमातपत्रीकरोषि स्वेदस्रस्तहस्तगलितचामरा नखमणिमयूखकलाप
माधुनोषीत्येतान्यन्यानि च शृण्वन्नेव कादंबरीभवनसमीपमुपययौ। पुलिनायमानसुपवनलतागलितकुसुमरेणुपटलैर्दुर्दिना
यमानम ... निभृतपरभृतनखक्षततोगण सहकारफलरसवर्षैः बालासारायमाणमविरलविप्रकीर्णवकुलसेकसीधुधाराच्छलि
भिः कांचनदीपायमानं चंपककलिकोपहारैर्लीलाशोकचलनायमानं कुसुमशकरपतितमधुकरवृंदान्धकारैस्तथा च संचरतः स्त्रीजनस्य रा
गसागरायमाणं चरणालक्तकरसविसरैरमृतोत्पत्तिदिवसायमानमभ्ररागामोदैः श्रृंगारलोकायमानं दंतपत्रमंडलैः प्रियंगुवनाय
मानं रोचनातिलकमलिनीलायमानं कृष्णागुरुपत्रभंगैर्लोहितायमानं कर्पूरराशोकपल्लवैर्धवलायमानं चंदनरसविले
पनैः हरितायमानं शिरीषकुसुमाभरणैः रथसेवार्थमागतेनोभयतश्चोर्ध्वस्थितेन स्त्रीजनेन प्राकारे रोमवलवरायमये न कृतदीर्घरथ्या १४८

150

मुखाकारं मार्गमद्राक्षीत् । तेन चातिर्निपतता मसरणा किरणालोकेसंपिंडितं नदीवेणिकाजलप्रवाहमिव वहंतमपश्यत् । तन्मध्ये च
प्रतिस्रोत इव गत्वा प्रतीहारीमंडलाधिष्ठितपुरोभागं श्रीमंडपं ददर्श । तत्र च मध्यभागे पर्यंतरचितमंडलेनोर्ध्वोपविष्टेनानेकसहस्रसंख्ये
न परिस्फुरद्भ्रमरणा प्रभासमूहेन कल्पितानिबद्धेनेव कन्यकाजनेन परिवृतां नीलांशुकप्रच्छदपट शाकृतस्य महतः पर्यंकस्योपाश्र
येयवलोपधानन्यस्तदक्षिणभुजलतावष्टंभेनावस्थितां महावराहदंष्ट्रावलंबिनीमिव महीं विस्तारिणि दृढप्रभाजालोज्ज्वलकुमुजलता विस्रि
पपरिभ्रमैः प्रतारती मिरिवचामरग्राहिणीभिरुपवीज्यमानां निपतितप्रतिबिंबतया भस्लान्मणिकुट्टिमेषु नागेरिवापद्धिप मारण भुवं
तैरत्नभित्तिषु दिक्पालैरिवनीयमानामुपरिमणिमंडपेषु अमरैरिवोत्क्षिप्यनीयमानां हृदयमिव प्रवेशितां महामणिस्तंभैरापीता
मिव दर्पणोरगैः सुखेन श्रीमंडपमध्योत्कीर्णेन विद्याधरलोकेन गगनतलमिवारोप्यमाणां चित्रकर्म च्छलेनावलोकनकुतू
हलसंपुंजितेन त्रिभुवनेनेव परिवृतां भूषणरवप्रनृत्तशिखिशतदित्ततचित्रचंद्रकेण भवनेनापि कौतुकोत्पादित लोचनसहस्रेण

भवन२

वक्ष्यमाणामात्मपरिजनेनापि स्पर्शनलोभादुपार्जितदिव्यचक्षुषेवानिमिषनयनेन निर्वर्ण्यमानांऽङ्गैरपि रागाविष्टै
रिवाधिष्ठितसर्वांगामकृतपुण्यमिव वंचयंतीं बाल्यभावमदृष्टामपि मन्मथावेशपरवशेनेव गृह्यमाणां यौवनेनापि चलित
चरणरागमरीचिभिरिव निर्गताभिरलक्तकरसपाटलितलावण्यजलवेणिकाभिरिव गलिताभिर्निवसितरक्तांशुकस्या
शिखाभिरिवावलंबिताभिः पादाभरणरत्नांशुरेखासंदेहदायिनीभिरतिकोमलांगुल्यानखविवरेणावमंतीभिरिव रुधि
रधारावर्षमंगुलिभिरुपेतामाश्लिष्टनितंतलतारागणमिव नखमणिमंडलच्छलेनोद्वहंतीं विद्रुमरसनदीमिव चरणाभ्यां प्रव
र्तयंतीं नूपुरमणिकिरणावकुचालेन गुरुनितंबभरखिन्नां ऊरुयुगलसहायतामिव कर्तुमुपगच्छता स्पृश्यमानजघनभागां
प्रजापतिकरद्वन्द्वनिःपीडितजघनशिलातलप्रतिघाताद्धावण्यजलस्रोतइव द्विधागतमूरुद्वयं दधानां सर्वतःप्रसारितदीर्घ
मयूखमंडलेनेर्ष्यया परपुरुषदर्शनमिव रुंधता कुतूहलेन विस्तारमिव नयता स्पर्शसुखेन रोमांचमिव मुंचता कांचीदा १५०

151

स्तनितंबबिंबस्य विरचितपरिवेषां निपतितसकललोकहृदयभरेणेवातिगुरुनितंबामुन्नतकुचांतरितसुखदर्शनदुःखेनेव क्षी
यमाणमध्यभागां प्रजापतेः स्पृशतः सौकुमार्यादंगुलिमुद्रामिव निमग्नां नाभिमंडलीमादर्शिनीष्ठु दहंतीं त्रिभुवनविजयप्रशस्ति
वर्णावलीमिव लिखितां मन्मथेन रोमराजिमंजरीं बिभ्राणां मंत्रप्रविष्टकर्णपल्लवप्रतिबिंबेन भररविद्धमानहृदयकरतलप्रे
र्यमाणेनेव निष्पतता मकरकेतुपादपीठेन स्तनभरेण भूषितामधोमुखकर्णाभरणमयूखाभ्यामिव प्रस्तताभ्यामभमरलावण्यपङ्क
लम्बरालकाण्डाभ्यामिव बाहुभ्यां नखकिरणविसरवर्षिणा च माणिक्यवलयगौरवश्रमवशात्स्वेदजलधाराजालकमिव मुंचता क
रयुगलेन समुद्भासितां स्तनभारावनम्यमानमाननमिवोन्नमयता हारेणोच्चैः करैर्गृहीतचिबुकदेशामभिनवयौवनपवनक्षोभितस्य
रागसागरस्य तरंगाभ्यामिवोद्गताभ्यां विद्रुमलताताम्रलोहिताभ्यामधराभ्यां रक्षावदातस्वच्छकांतिना मदिरारससम्पूर्णमाणिक्यशुक्तिसं
पुटच्छविना कपोलयुगलेन रतिपरिवादिनीरत्नकोणचारुणा नासावंशेन च विराजमानां गतिप्रसरनिरोधिश्रवणकोपादिव

का॰ १९ किंचित्तिरस्कारापांगेन निजमुखलक्ष्मीनिवासद्युग्मोरविंदालोचनयुगलेन लोचनमयमिव जीवलोकं कर्तुमुद्यताभ्युन्मदयौ
१५१ वनकुंजरमदराजिभ्यां भ्रूलताभ्यां मनःशिलापंकलिखितेन च रागाविष्टमन्मथहृदयेनेव वदनलग्नेन तिलकबिंदुना वि
द्योतितललाटपट्टासूत्कृष्टहेमतालीपुटाभरणा मासुक्तकर्णोत्पलच्युतमधुधारासंदेहकारिणा कर्णपाशंदोलायमा
नपद्मरागकरभामणिक्यकुंडलं दधती पांडलीकृतललाटेन सीमंतचुंबिना चूडामणेः स्फुरतांशुजालेन मदिरारसेनेव प्रक्षा
ल्यमानदीर्घकेशकलापा रुद्धप्रविष्टहरगर्वितगौरीविजिगीषयेव सर्वांगानुप्रविष्टमन्मथदर्शितसौभाग्यविशेषानु
रःसमारोपितैकलक्ष्मीमुद्रितनारायणावलेपहरणाय प्रतिबिंबके निजहृदयतोलक्ष्मीशतानीव सृजंती स्तनभागनिहितैक
पंकविस्मितहराभिमाननाशाय विलासस्मितैश्चन्द्रसहस्राणीव सृजन्ती विक्षिपंती निर्दयरोषैकप्रमथनाय रोषेणेव प्रतिद्व
दयं मन्मथायुतान्युत्पादयंती रजनिजागरखिन्नस्य चक्रवाकमिथुनस्य स्वप्नसुखक्रीडानदिकासु कमलधूलिवालुकाभिर्वा १५१

परिदित१ मन्मथ२

नभि २ कचा १ पे ५ रथसर्पद्भि ५

152

लपुटिकानांनिकारयंतीपरिजननूपुररवसंस्थितंबद्धमेखलंहंसमिथुनंमृणालनिगडकेनबध्नयंतीहंसपालीमादिशंतीमाभरणम
रक्तमयूरबालैःहतेभवनहरिणशावकायसखीस्तवणादयंतीयवांकुरप्रसवंप्रयच्छंतीआत्मसंवर्द्धितलताप्रथमकुसुमं
निवेदनागतामुद्यानपालीमशेषाभरणदानेनसम्मानयंतीउपनीतविविधवनकुसुमफलपूर्णपत्रपुटामविज्ञायमानालोपते
याहासहेतुंपुनःपुनःक्रीडापर्वतकपातृशबरीमालापयंतीकरतलनिहतैर्मुहुर्मुहुरुपसर्प्पद्भिःश्रवणोत्खपरिमलांधैर्नीलकंठकैरिवम
धुकरैःक्रीडंतीपंजरसारीनकुलरुतश्रवणाकुलंकुट्टमितांचामरग्राहिणींविहस्यंतीलीलाकमलेनशिरसिविघट्टयंतीशुक्राफरड
खचितचंद्रकेशिरिवकौमतिमेस्वेदजलबिंदुजालवितनखपदाभिप्रायेणतांबूलकरंकवाहिनींपयोधरेयटवासमुष्टिनाताडयंतीरक्त
कुंडलप्रति बिंबसांद्रदशन खपदमंडलाशंकयाचामरग्राहिणींविहस्यकपोलेप्रसारयाजरत्नेनात्मकर्णपूरपल्लवेनाच्छादयं
तीपृथिवीमिवसमुत्तारितमहाकुलभूभृद्दितिकरांशेयमोगेसुनिपत्तांमधुमासलक्ष्मीमिवषट्चरणपरलापछिद्यमाणकुसुमरजो

संक्रांत ३ रच्या १

का·पू· कुसुमपरागांशरदमिवोत्पादितमानसजन्म पह्लिरवापनीतनीलकंठमहां गौरीमिवश्वेतांशुकरवित्तोत्तमांगामरण्यामुदधिवेला
१५२ वनलेखामिवमधुकरकुलनील तमालकानना उडुस्पर्शमिवोद्दाममन्मथविलासगृहीतगुरुकलत्रांवनराजिमिवपांडुश्यामल
वल्लीलतालंकृतमध्यांदिनमुखलक्ष्मीमिवभास्वन्मुक्तांशुभिन्नपद्मरागप्रसाधनामाकाशकमलिनीमिवस्वच्छांबरदृश्यमानमृणा
लकोमलोरुमूलांमयूरावलीमिवनितंबतुंबिशिखंडभारविस्फुरच्चंद्रकांतांकल्याणरूलतामिवकामफलप्रदांपुरःसमीपेसमुपवि
विष्टेकोसौकस्यचापत्यंकिमभिधानोवाकीदृशंतस्यरूपंकियद्वावयःकिमयमत्रागमिष्यतीतिमुहुर्मुहुश्चंद्रापीडसंबद्धमेवालापंत
रूपवर्णनामुखरकेयूरकेपृच्छंतीकादंबरीददर्श।तस्यतुदृष्ट्वाकादंबरीवदनलेखालक्ष्मीकस्यसागरस्येवामृतमुल्लासहृदयं।
आसीच्चास्यमनसिरोसेह्रियाएयपिमेवेधसाकिमितिलोचनमपात्तेयवनकृतानि।किंवानेनकृतमवदातकर्मचक्षुषायदनिवारि
तमेनांपश्यत्यहोचित्रमेतदुत्पादितावेधसासर्वरमणीयानामेकंधामकृताएतेरूपातिशयपरमाणवःसमासादितास्तन्नूनमेतां १५२
किमभिधत्तेभवत्ताचकिमभिहितः कियच्चिरंदृष्टस्त्वयाकथंचास्यमहाश्वेतयासहपरिचयउपजातः ४

तं ४ स २

153

मुत्पादयतो विधेः करतलपरामर्शक्लेशेनेव विगलितालोचनयुगलाम्बुजलबिंदवस्तेभ्य एता निर्जगति कुमुदकमलकुवलयसौगं
धिकवनान्युत्पन्नानि इत्येवं चिंतयत एवास्य तस्या नयनयुगले निपपात चक्षुः। तदा तस्या अपि नूनमयं केरूपकेणावेहितइति चिंतयंत्या
रूपातिशयविलोकनविस्मयस्मेरं निश्चलनिबद्धलक्ष्यं चक्षुस्तस्मिन्सुचिरं पपात। लोचनप्रभाधवलितास्तु कादंबरीदर्शनविह्वलो वलइ
वतलक्ष्मणमराज्ञत्तचंद्रापीडः। दृष्ट्वा च प्रथमं रोमोद्गमस्ततो भूषणरवस्ततस्तु कादंबरी समुत्तस्थौ। अथ तस्याः कुसुमायुध एव स्वेदमज्ज
नयत्। ससंभ्रमाभ्युत्थानश्रमो व्यपदेशोऽभवत्। ऊरुकंप एव गतिं रुरोध नूपुररवाकृष्टहंसमंडलमपयशो लेभे। निश्वासप्रवृत्तिरेवो
त्तरीयांशुकचलनकारचामरानिलो निमित्ततां ययौ। अंतःप्रविष्टचंद्रापीडस्पर्शलोभेनेव निपपात हृदये हस्तस्तद्धुवस्तनावरणव्या
जो बभूव। आनंद एवाश्रुजलमपातयन्नचलितकर्णावतंसकुसुमरजो व्यपदेशतामयासीत्। लज्जैव वक्त्रं न ददौ मुखकमलपरिमला
गतालिवृंददद्वारतामगात्। मदनशरप्रथमप्रहारवेदनैव सीत्कारमजनयत् कुसुमप्रकरकेतकीकंटकक्षतिः साधारणतामवाप। वेपथु

तिं ३

का॰पू॰ रेवकरतलमकंपयन्निवेदनोद्यतप्रतीहारीनिवारणं कथयरमभूत्। तस्याश्च कादंबरी विशतो मन्मथस्यापि मन्मथइवाभूत् द्वितीय
१५३ स्तयासहरूपो विवेश चंद्रापीडहृदयं। तथाहि सा व्यपितस्यारत्नाभरणद्युतिमपि तिरोधानममंस्त। हृदयप्रवेशमपि परिग्रहमगणयत्।
स्वप्नारवमपि संभाषणममन्यत। सर्वेंद्रियाहरणमप्यनिप्रसादमचिंतयत्। देहप्रभासंपर्कमपि सुरतसमागमसुखमकल्पयत्।
कादंबरी तु कष्टादिव स्वकृतिपयपदानि महाश्वेतां स्नेहनिर्भरं चिरदर्शनजातोत्कंठं सोत्कंठं कंठे जग्राह। महाश्वेतापि दृढतरदत्तकं
ठग्रहतामवादीत्। सखि कादंबरि भारते वर्षे राजाऽनेकवरतुरगखुरक्षुरखोत्क्षेरवरसचतुःसमुद्रमुद्रारक्षितप्रजस्तारापी
डोनाम। तस्यायं निजभुजशिलास्तंभविश्रांतविश्वविश्वंभरापीडश्चंद्रापीडोनामसूनुर्दिग्विजयप्रसंगेनानुगतो भूमिमिमामेव
चदर्शनात्प्रभृति प्रकृत्या मे निष्कारणबंधुतां गतः परित्यक्तसकलासंगनिष्ठुरामपि मे स विशेषस्वभावसरलैर्गुणैराकृष्य चित्तवृत्तिं
वर्त्तते दुर्लभो हि सहिरण्यपरवशो निर्निमित्तमित्रमकृत्रिमहृदयो विदग्धजनो यतोऽदृष्टमभमहमिवत्वमपि निर्माणकौशलं प्रजापतेः १५३

154

निःसपत्नतां च रूपस्य स्थानतामिनिवेशितत्वं च लक्ष्म्याः सङ्गततां सुखं पृथिव्याः सुरलोकातिरिक्ततां च मर्त्यलोकस्य सफल
तां च मानुषीलोचनानामेकस्थानसमागमं च सर्वकलानामैश्वर्यं च सौभाग्यस्याशाम्यतां च मनुष्याणां ज्ञास्यसीति मया बला
दानीतोयं कथिता चास्य मया बहुप्रकारं प्रियसखी तत्पूर्वदर्शनोपमिति विसृष्टलज्जा मनुष्यजातपरिचयदुःस्थलत्न्या विस्रंभ
तामविज्ञातशीलइत्यपहाय शंकां यथा मयि तथाऽपि वर्त्तितव्यमेष ते मित्रं च बांधवश्च परिजनश्चेत्यादेदिते तया चंद्रापीडः प्रणा
ममकरोत्। कृतप्रणामं च तं तदाकारदर्शनास्तिर्यग्विलोकयंत्याः सस्नेहमतिदीर्घत्वेलोचनापागमार्गं गच्छत्तस्तारतारकस्य लोच
नस्य श्रमसलिलविसंडवानंदबाष्पजलबिंदुनिकरो निपपात। त्वरितमभिप्रस्थितस्य हृदयस्य प्रकूलिरिव सुधाधवलास्मि
तज्योत्स्ना विससार। संमान्यतामयं हृदयरुचितो जनः प्रतिप्रणाम इति शिरो वक्रुमिवैकाभूलता संबुन्ननाम। अंगुलि
विवर विनिःसृत मरकतांगुलीयकमयूखलेखा विभ्रमगृहीततांबूलवीटिकइव करो जृंभारंभमेथस्तु रखसुत्पसर्प। स्वद

२३

कान्रू· त्येद्दज्ञत्वधौतलावण्यनिर्मलेषुचास्याः संक्रांतप्रतिबिंबतया संचरन्मूर्तिर्मकरकेतुरिवावयवेष्वदृश्यतचंद्रापीडः। तथाहि।
१५४ सिंजन्मणिनूपुरपुरेनमणिकुट्टिमालिखितांगुष्ठेनाहूतइवचरणेन खेषु निपपात। दर्शनातिरभसप्रधावितेन गत्वा हृदयेनानी
तइवस्तनाभ्यंतरे समदृश्यत। विकचकुवलयदामदीर्घयाचदृष्ट्या निपीतइवकपोलतले समदृश्यत। सर्वासामेवचतदा तासां
कन्यकानां तिर्यक्पश्यंतीनां तत्कुतूहलादपांगगतुं बिन्यो निर्गंतुकामाइवकर्णोत्पलमधुकरैः समंवधश्रुस्तरलास्तारकाः कादंबरीतु
सविभ्रमकृतप्रणामा महाश्वेतया सहपर्यंकेनिषसाद। ससंभ्रमपरिजनोपनीतायांच शयनशिरोभागनिवेशितायां धवलांशुक
प्रच्छदपटायां हेमपादांकितायां मसूरिकायां चंद्रापीडः समुपाविशत्। महाश्वेतानुरोधेनच विदितकादंबरीचित्ताभिप्रायाः संहतमु
खन्यस्तहस्तदत्तशब्दनिवारणासंज्ञाः प्रतीहार्योविणुरवानुवीणाघोषानुगीतध्वनीन् मागधीजयशब्दांश्चसर्वतोनिवारयांचक्रुः। त्व
रितपरिजनोपनीतेनच सलिलेन कादंबरी स्वयमुत्थाय महाश्वेतायाश्चरणौ प्रक्षाल्योत्तरीयांशुकेनापमृज्यपुनः पर्यंकमा १५४

रुरोह। चंद्रापीडस्यापि कादंबर्याः सखी रूपानुरूपा जीवितनिर्विशेषा सर्वविस्रंभभूमिर्मदलेखेति नाम्नावलंबनिष्ठ्यूतोपि जरत्याति
तवती चरणो। महाश्वेतानुकर्णाभरणाप्रभावधिरयं सदृशे सप्रेमपाणिना स्पृशंती मधुकरभरपर्यस्तं चकर्णाभरणमुत्क्षिपंती चामरप
वनविधुतिपर्यस्तां चालकवल्लरीमनुवध्नमाना कादंबरीमनामयं पप्रछ। सा तु सखीप्रेम्णा गृहनिवासेन कृतापराधेवानामयेनैव लज्ज
माना कृच्छ्रादिव कुशलमाचचक्षे। सतु पद्मानशोकोपि चैतस्मिन्काले महाश्वेतामुखनिरीक्षणात्स्य रापि मुहुर्मुहुरपांगविक्षेपप्रचलित
तरलतरतारकाशेखरं चक्षुर्मंडलितचापेन भगवता कुसुमधन्वना बलान्नीयमानं चंद्रापीडपीडनमेवं न शशाक निवारयितुं तेनैव क्षणे
न तेनासन्नसखीकपोलसंक्रांतेनेर्ष्यारोमांचो घमानकुचतटेन श्यामत्तिविवेन विरहव्यथां स्वेदश्रवक्षःस्थलघटितशालभंजिकाप्रति
मेन सपत्नीरोषनिमिषतारैर्म्रयशोकमानेंदुजलतिरोहितेनोपगतादुःखमभजैसा। मुहूर्तापगमे चतो हृलखनोधनां महाश्वेता तामभा
षत। सखि कादंबरि सर्वाभिरेवास्माभिरयमभिनवागतश्चंद्रापीड आराधनीयस्तदस्मै तावद्दीयतामित्युक्ते च किंचिद्विवर्तितावनमित

द्वि३

अथ२ ३ंजति४२

त२

का॰ पू॰ सुरवीशनैरव्यक्तमिवप्रियसखिलज्जेहमनुपजातपरिचयाप्रागल्भ्येनानेनगृहाणत्वमेवास्मैप्रयच्छेत्युवाचतां।पुनःपुनरभिधीय
२५५ मानावतयाकथमपिग्राम्येवचिराद्दानाभिमुखंमनश्चक्रे।महाश्वेतानुरवादनाकृष्टदृष्टिरेववेपमानांगयष्टिरसुकु[illegible]लितलोचना
स्थूलस्थूलंनिःश्वसंती निजशरप्रहारमूर्छितामन्मथेनस्नपितेवस्वेदजलविसरैःस्वेदजलविसरनिमज्जनभयेनरहस्तावलंबन
मिवयाचमानासाध्वसपरवशापतामीतिरुङ्गितुमिवकृतप्रयत्नाप्रसारयामासताहूलगर्भेहस्तापल्लवं।चंद्रापीडस्तुजयकुंजरकुंभ
स्थलास्फालनसंक्रांतसिंदूरमिवस्वभावपाटलंधनुर्गुणाकर्षणकृतश्यामकिणांकचयहारच्छिन्दिताशिलक्ष्मीलोचनपरागम
सप्रांजनबिंदुमिवविसर्पन्नखकिरणतयातिरभसेनशंखाविनातिरिवविवर्द्धिताभिरिवप्रहसिताभिरिवांगुलीभिरुपेतंस्पर्शलो
भाद्वतत्कालकृतसंनिवेशाःसरागाःपंचापीन्द्रियवृत्तीरपराइवांगुलीरुद्वहंतंप्रसारितवान्यांगितवचसातत्कालसुलभविलासद
र्शनकुतूहलिभिरिवकुतोप्यागत्यसर्वरसैरधिष्ठितात्तेनातिबहुलच्छ्रूनप्रसारितेनचंद्रापीडहस्तान्तेपणायेवपुरःप्रवर्त्तितेन २५५

156

रवांश्रुनिवहेनवेपथुचलितवलयावलीवाचालेनसंभाषणमिवकुर्वताहस्तेनरचेरसलिलपानपूर्वकंस्पृशतामयंमन्म
थेनदत्तोदासजनइत्यात्मानमिवप्रतिग्राहयंतीअद्यप्रभृतिभवतोहस्तेवर्तेइतिजीवितमिवस्थापयंतीतांहत्त्वमहानु।आकर्णयं
तीचकरकिसलयंभुजलतानुसारेणस्पर्शलोभागतमनंगशरभिन्नमध्यंहृदयमिवपातितमपरितलवलयेनाह्रासीहा।गृ
हीत्वाचापरंताहूलंमहाश्वेतायैप्रायच्छत्।अथसहसैवत्वरितगतिस्त्वरमाणरागमिंद्रायुधमिवकुंडलीकृतकंठनोदहनाविद्रुमां
कुरानुकारिचंचुपुटेनमरकतद्युतिपक्षतिनामंथरगतेनशुकेनानुवध्यमानाकुमुदकेसरपिंजरतयाचरणयुगलस्यचं
पककलिकाकारतयाचंचुपुटस्यकुवलयदलनीलतयाचपक्षद्युतीनांकुसुममयीवागत्यसारिकासकोपमवादीत्।भर्तृ
दारिकेकादंबरिकस्मान्ननिवारयस्येनमलीकसुभगाभिमानिनमतिदुर्विनीतंमामनुबध्नंतंविहंगापसदंयदिमामनेनपरि
भूयमानामुपेक्षसेततोहंनियतमात्मानमुत्सृजामिसत्येनशापितासिपादपंकजस्पर्शेनेत्यभिहितावतयाकादंबरीस्मितमक

का-सू रीत्।अविदितवृत्तांतातुमहाश्वेता किमियंवदतीतिमदलेखांपप्रच्छ।साचाकथयत् एषाभर्तृदुहितुःसखी कादंबर्याः कालिं
२५६ दीतिनाम्नासारिकेतिपरिहासनाम्नःशुकस्यभर्तृदारिकयैवपाणिग्रहणपूर्वकंजायापदेग्राहिता।अद्यचायमनयाप्रत्युषसिका
दंबर्यास्तांबूलकरंकवाहिनीमिमांतँ लिकामेकाकिनींकिमपिपाठयन्दृष्टोयतस्ततःप्रभृतिसंजातेर्ष्यापराङ्मुखीनैनमुपसर्पति।
नालपतिनस्पृशतिनविलोकयतिसर्वाभिरस्माभिःप्रसाद्यमानापिनप्रसीदतीत्येतदाकर्ण्यस्फुटस्फुरितकपोलोदरस्मितपीडो
मंदमंदंविहस्याब्रवीत्।अस्त्येषाकथाश्रूयतएवैतद्राजकुलेकर्णपरंपरयापरिजनोप्येवंमंत्रयतेबहिरपिजनाःकथयंत्येवंकिंत
रेषप्रणयमालापोवर्ततएवास्माभिरप्येतदाकर्णितमेवयथाकिलदेव्याःकादंबर्यास्तांबूलदायिनीतँ लिकांकामयमानःपरिहा
सनामास्तुकोमदनपरवशोगतान्यपिदिनानिनवेत्तीति।तत्स्वयमास्तांतावदत्रवामाचारःपरित्यक्तनिजकलत्रोतित्रपोनयासह
देव्याःकादंबर्याःकथमेतद्युक्तंयन्ननिवारयतीमांचपक्षोदुस्सहासीमथवारेपापिकस्थितेवनिस्नेहताप्रथममेवमिमांवराकी २५६

कालिंदीमीदृशाय दुर्विनीताय विहंगाय प्रयच्छंत्याः किमिदमनीप्सितं करोतु यदेतत्सापत्न्यकरणं नारीणां प्रधानं कोपकारणमथरागी
157 विरागहेतुः परं परिभवस्थानमप्रियमेवं केवलमतिधीरायस्त्वनयानेन दौर्भाग्यगरिम्णा जनितवैराग्यया विषयवानास्वादितमनलोकाना
सा हि तोऽनशनं वा नांगीकृतं नस्येवं विधमपरमस्मिपेषितालभिन्नः कारणं यदिचेयमीदृशेष्यापराधेनुनीयमानेनैवं प्रत्यासन्नमेष्यति
तदाविगिमामलमनयाहृत्वेव वर्जनीयमिमवनिरस्यां करनांपुनरालापयिष्यति को वा वलोकयिष्यति को वास्या नामग्रहीष्य
तीत्येवमभिहितवति तस्मिन्सर्वास्ताः सहकारवर्णोक्रीडालापभाषिताजहसुरंगनाः। परिहासस्तु तस्य नर्मभाषितमाकर्ण्य जगाद।
२ धूर्तराजपुत्र निपुणोयं त्वयान्येन वा लोलाविप्रतारयितुं न शक्यते एषा पिबुध्यत एवैतावक्रोक्तीरियमपि जानात्येव परिहासज
ल्पितानि अस्याश्च परिजकुलसंपर्कचतुरा मतिः विरमत अमुभिरेषा भुजंगमभंगिभाषितानामियमेव हि वेत्तिमंतुभाषिणीकाके
वकाराणां प्रमाणं च विषयं च प्रस्तावं च कोपप्रसादयो हि ति। अत्रांतरे चागत्य कंचुकी महाश्वेतामवदत्। आयुष्मति देवश्चित्ररथो देवी

ऊसौ तु
पंक्ति १

चमंदिरात्त्वां द्रष्टुमाकूयतिइत्येवमभिहिताच्च गंतुकामासखिचंद्रापीडः क्कास्मामिति कादंबरीमपृच्छत् । ननु पौ मेवानेकस्त्रीसहस्र
हृदयावस्थानेनेतिमनसा विहस्यप्रकाशमवदत् । सखि महाश्वेते किंत्वमभिदधासि दर्शनादारभ्य शरीरस्याप्ययमेवप्रभुः किंतुतम
वनस्यपरिजनस्यवा यत्रास्मै रोचते प्रियसखीहृदयायवा तत्रायमास्तांत छुत्वा महाश्वेतावदत् । अत्रैव त्वत्प्रासादसमीपवर्त्तिनि प्रमदवने
क्रीडापर्वतमणिवेश्मन्यास्तामि त्यभिप्रायगंधर्वराजदुहितुः पयो चंद्रापीडोपि तथैव सह निर्गत्य विनोदनार्थं वीणावादिनीभिश्चवे
णुवादननिपुणाभिश्च गीतकलाकुशलाभिश्च दुरोदरक्रीडारागिणीभिश्चाष्टापदचतुराभिः चित्रकर्मकृतश्रमाभिश्चस्तुभाषितपाठिका
भिश्चकादंबरीसमादिष्टप्रतीहारीभिश्चकामिनीभिरनुगम्यमानः स्वर्वेष्टितकेयूरकेनोपदिश्यमानमार्गः क्रीडापर्वतमणिमंदिरमगा
त् । गतेचतस्मिन्नांधर्वराजपुत्री विसर्ज्य सकलंसखीजनंपरिजनंचपरिमितपरिचारिकाभिरनुगम्यमाना प्रासादमारुरोह । तत्रश
यनीयेनिपत्यदूरस्थिताभिर्विनयनिभृताभिः परिचारिकाभिर्विनोद्यमानाक्रुत्नोपि प्रत्यागतचेतनाचैकाकिनी तस्मिन्कालेचपलेकि २५१

158

ले३

मास्त्वमिति निगृहीतेव लज्जया गंधर्वराजपुत्रि कथमेतद्युक्तमित्युपालब्धेव विनयेनायमसावुत्पन्नो बालभावः क्व गत इत्युपहसितेव मु
ग्धतया स्वैरिणि मा कुरु स्वयं प्रेषणमेकाकिन्यविनयमित्यामंत्रितेव कुमारभावेन भीरु नायं कुलकन्यकानां क्रम इति गर्हितेव महत्त्वेन दुर्वि
नीते रक्षाविनयमिति तर्जितेवाचारेणामूढे निगृह्यतां मदनलघुतां नीतासीत्यनुशासितेवाभिजात्येन कुतस्तवेयं तरलहृदयतेति धिक्कृते
व धैर्येणास्वच्छंदचारिणि न प्रमाणीकृताहं त्वयेति निंदितेव कुलस्थित्येति गुर्वीं ह्रियमुवाह । समचिंतयच्चैवमगणितसर्वशंकया त
रलहृदयता दर्शयंत्या कृतं किं मया मोहांधया तथा त्वरः छत्रनीयमिति साहसिकया न शंकितं लघुहृदयो मां कल्पयिष्यतीति निर्ह्रीकया
नाकलितं कास्य चित्तवृत्तिरिति मूढया न परीक्षितं दर्शनानुकूलोऽहमस्य नेति वा तरलतया न कृतो विचारक्रमः । अन्याख्यानवेलायां नमी
तं गुरुजनात्रस्तं लो कापवादान्नोद्विग्नं तथा च मया श्वेताङ्गः खितेति निर्द्दोषि प्यपानापेक्षितमासन्नवर्ति सखीजनोऽप्युपलक्ष
यतीत्यविज्ञाय न लक्षितं पार्श्वस्थितः परिजनः पश्यतीति न च चेतनया न दृष्टं । स्थूलबुद्धयोऽपि तादृशीं विनयच्युतिं विभावयेयुः किन्तु

चक्रण१ ऊति१ तावद्१ वा४

का॰पू॰ तान्तुभूतमदनज्वरांतामहमश्वेतासकलकलाकुशलाःसख्योवाराजकुलसंचारचतुरोवानित्यमिंगितज्ञःपरिजनः ईदृशेष्वतिनिपुण
१५८ तरहृदयोंतःपुरदास्यःसर्वथाहतास्मिमंदपुण्यामरणमेवश्रेयोनलज्जाकरंजीवितंश्रुत्वेववृत्तांतंकिंवक्ष्यत्यंबाताततोवागंधर्वलोकोवा
किंकरोमिकोत्रप्रतीकारःकेनोपायेनस्खलितमिदंप्रछादयामिकस्यवाचापलमिदमेतेषांदुर्विनीतानामिंद्रियाणांकथयामिकचा
नेनदग्धहृदयेनपंचबाणेनवानखल्वजानामिगृहीतागछामितयामहाश्वेताव्यतिकरेणप्रतिज्ञाकृतातथा प्रियसखीनांपुरोमंत्रि
तंतथाचकेसूरकस्यहस्तेसंदिष्टंनखल्वजानामिमंदभागिनीशठविधिनोत्सन्नमन्मथेनवाप्रकृतापुण्यसंचयेनमृत्युहतकेनवाकेना पा ५
न्येनवाप्ययमानीतोमममविप्रलंभकश्चंद्रापीडःकोपिवानकदाचिद्दृष्टोनानुभूतोनचश्रुतोनचिंतितोनोत्प्रेक्षितोमांविडंबयितुमुप
नतोयस्यदर्शनमात्रेणैवसंयम्यदत्तेवेंद्रियैःशरपंजरेनिक्षिप्यसमर्पितेवमन्मथेनदासीकृत्योपनीतेवानुरागेणानियोंतितेवगृहीत
मूल्येनगुणगणेनविक्रीतेवहृदयेनोपकरणीभूतास्मिनमेकार्यंतेनचपलेनेतिस्फुरामिवसंकल्पमकरोत्।कृतसंकल्पाचांतर्ग २५८

तेनमिथ्याविनीतेयंदिनेमयाकृत्यमेषगच्छामिइतित्वद्दयोत्कंपचालितेनपरिहसितेवचंद्रापीडेनतत्परित्यागसंकल्पसम
कालप्रस्थितेनकंठलग्नेनाप्येवजीवितेनविशेषदृढपुनरपिप्रक्षालितलोचनयादृश्यतामसौजनःप्रत्याख्यानयोग्योनवेतित
त्कालागतेनसिहितेवबाष्पेणपनयामिंतेनसहासुलिंदूर्यविरसेप्रमितिनिर्मत्स्मितेवमनोभुवापुनरपितथैवचंद्रापीडाभिमुखहृ
दयाबभूव।तदेवमस्तमितप्रतिसमाधानैबलात्प्रेमावेशेनास्वतंत्रीकृतापरवशैवोत्थायउद्गाहृवातायनेनतमेवक्रीडापर्वतकाम
वलोकयन्त्यतिष्ठत्।तत्रस्थाचसातेमानेर्जलद्यावधानोहिमेवस्मत्याददर्शनचकुमा।अंगुलिंगलितस्वेदपरामर्षमलितेवचिंत
यालिखितेवतचित्रन्तूलिकयारोमांचतिरोधानशंकितेवहृदयेनालिंगितेवकुसमसातत्संगमकालातिपातासहेवमनोगमागमा
यनियुक्तवतीनपरिजनंचंद्रापीडोपिपत्रदिशप्रत्यंकाद्वरीत्हृदयमिवद्वितीयंमणिगृहंशिलातलास्तीर्णायासुश्रयतउपर्युपरि
निवेशितबहूपधानायांकुथायांनिपत्यकेयूरकेनोत्संगेगृहीतचरणयुगलस्तास्तैर्यथादिष्टेषुभूमिभागेषूपविष्टाभिःकन्यका

का॰पू॰ १५८ निःपरिरतोरोलायमानेनचेतसाचिंतांविवेश।किंतावदस्यागंधर्वराजदुहितुःसहजुवएतेविलासा ___ एवंहशौआहोस्विदन
रचितप्रसन्नेनभगवतामकरकेतुनामयिनियुक्ताःयेनमांसाश्रेणसरागेणाकूणितत्रिभागेनहृदयांतःपतत्स्मरशरकुसुमरजो
रूषितेनेवचक्षुषातिर्यग्विलोकयति।मद्विलोकिताचधवलेनस्मितालोकितेनदुकूलेनेवलज्जयात्मानमावृणोतिसलज्जाविव
र्त्तमानवदनाचयतिबिंबप्रदेशलोभेनेवकपोलदर्पणमर्पयति।मदवकाशदायिनोहृदयस्यप्रथमाविनयरेखामिवकररुहेणाशय
नांकेलिखति।मत्तांबूलवीटिकोपनयनखेदविधुतेनरक्तोत्पलशोभसंक्रांतभ्रमद्भ्रमरहंसेनकरतलेनस्विन्नंमुखमिवगृहीतत
मालपल्लवेनेववीजयतिपुनश्चाचिंतयत्।प्रायेणमानुष्यसुलभासुलघुतामिथ्यासंकल्पसहस्रैरेवंमांविप्रलभतेलुप्तविवेकोयौवन
मदोमदयतिमत्तावायतस्त्रिमिरोपहतेवपश्यतांदृष्टिरल्पमपिकलुषंमहत्पश्यतिस्नेहलवोपिवारिणेवयौवनमदेनदूरंविस्ता
र्यते।स्वयमुत्पादितानेकचिंताशताकुलाकविमतिरिवतूलतानकिंचिन्नोत्प्रेक्षतेनिपुणामन्मथगृहीतानांलिकेवतरुणचित्त १५८

वृत्ति [illegible] र्त्रे किंचिन्नालिखति संजातरूपाभिमानाकुलेवा
त्यसंभावनीयं किं चिन्तान्मानमर्पयति स्वप्न इवाननुभूतमपि मनोरथो दर्शयति। इंद्रजालपिच्छिकेवासंभाव्यमपि प्रत्याशा पुरःस्था
पयति। भूयश्च चिंतितवान् किमनेन वृथैव मनःखेदहेतुना यदि सत्यमेवेयं धवलेक्षणा मय्येवं जातवृत्तिस्तदा न चिरात्स एवैनामभिप्रा
यानुकूलो मन्मथः प्रकटीकरिष्यति। स एवास्य संशयस्य छेत्ता भविष्यति इत्यवधार्योत्थायोपविश्य च ताभिः कन्यकाभिः सह गे
गेयैश्च विपंचीवीणावाद्यैश्च पाणविकैश्च स्वरसंदेहविवादैश्च सुभाषितगोष्ठीभिश्चान्यैस्तैस्तैरालापैः सुकुमारैः कलाविलासैः क्री
डन्नासांचक्रे। मुहूर्तमिव स्थित्वा निर्गम्योपवनालोकनकुतूहलाक्षिप्तचित्तः क्रीडापर्वतशिखरमारुरोह। कादंबर्यपि तं दृष्ट्वा विरचित
तिमहार्हालंकारा किंतरलमालोकयितुं विमुच्य तं गता हेमनगरश्रिम विन्नासो धर्मंडपस्योपरितनं शिखरमारुरोह। तत्र विरल
परिजना सकलशशिमंडलपांडुरेणातपत्रेण हेमदंडेन निवार्यमाणातपा चतुर्भिर्वालव्यजनैश्च फेनशुचिभिरुद्धूयमाने रुपवीज्य

वलोकयष्ट स्रुका१

का-पू- मानाशिरसिकुसुमगंधलुब्धेनधमताभ्रमरकुलेनद्विगुणितनीलांशुकावगुंठनेनेवचंद्रापीडाभिसरणावेषाभ्यासंकुर्वतीमुहुर्भ्र
१६० मरशिखांसमासज्यमुहुःकचदंडमवलंब्यमुहुस्तमालिकास्कंधेकरौविन्यस्यमुहुर्मदलेखांपरिष्वज्यमुहुःपरिजनांतरित
सकलदेहनेत्रविभागैर्मुहुरावलितत्रिवलीवलयापरिवृत्यमुहुःप्रतीहारीवेत्रलताशिखरेकपोलेनिधायमुहुर्निश्चलकरवि
धृतामधरपल्लवेवीटिकांविनिवेशयमुहुर्लीलाकर्णोत्पलप्रहारपलायमानपरिजनानुसरणाद्दत्तकतिपयपदाविहस्यतंविलो
कयंतीतेनचविलोक्यमानामहांतमपिकालमतिक्रांतंनाज्ञासीत्।आरुह्यचप्रतीहार्यानिवेदितमहाश्वेताप्रत्यागमनातस्मादव
ततार।स्नानादिपुमंडपरामहाश्वेतानुरोधेनदिवसव्यापारमकरोत्।चंद्रापीडोपितस्मादवतीर्यप्रथमविसर्जितेनैवकादंबरीप
रिजनेननिर्वर्तितस्नानविधिर्विरूपहतशिलांमि मताचितदेवतःक्रीडापर्वतकएवसर्व माहारादिकमहःकर्मचक्रेक्रमेण
कृताहारःक्रीडापर्वतप्राग्भागभाजिमनोहारिणिहारीतकशिलाहरिणारोमंथफेनशीकरासारसीरप्रुषहरितलमयनिश्चल १५०

क१ धिन्यस्मा२

14

नेर न२ रम४

कालिंदीजलक्षिपितरुणीचरणालक्तकशोणाशोत्तिविकुसुमरजःसिक्ततिलकलताकेलिमंडपोपगूढे शिखंडिताण्ड
वसंगीतगृहे मरकतशिलातले समुपविष्टो दृष्टवान् सहसैवातिबहलधाम्ना धवलेनालोकेनोत्कूलेनेव निर्वाप्यमाणं दिवसं मृणा
लवनेनेव पीयमानमातपं क्षीरोदेनेव प्लाव्यमानां महीं चंदनरसवर्षेणेव सिच्यमानं दिगंतरं सुधयेव विलिप्यमानमंबरतलं आ
सीत्रास्यमतसिकिमुरवतु भगवानोषधिपतिरकांड एव शीतांशुरुदितो भवेत्कृतयंत्रविक्षेपविशीर्यमाणपारदंधारासहस्राणि
धारागृहाणि मुक्तान्याहोस्विदनिलविकीर्यमाणशीकरप्रवर्षितभुवनांबरसिंधुर्वेशातलमवतीर्णो तिकुतूहलम्बालोकानुसार
प्रहितवत्सुरश्चक्षीतला अन ल्पकन्यकाकदंबपरिवृता ध्रियमाणधवलातपत्रा मुद्धूयमानचामद्वयां कादंबरी प्रतीहार्या वामपाणि
नावेत्रलतागर्भेणार्द्रबद्धशकलावच्छन्नमुखचंदनानुलेपनसनाथं नारिकेलसमुद्गकमुद्वहंत्या दक्षिणाकरेणदत्तहस्तावलंबा
केयूरकेणाचूतनिर्मोकसुविनीधौतकल्पलतादुकूलरचितानिदेयमानमार्गा मालतीकुसुमदामाचिंछितकरलतया वतमादि

निश्वासहार्ये १ २४ २३ त१

जंलधि४

मिवशशिनः२

२२ कौ१

का॰पू॰ कयानुगम्यमानामागच्छंतीमद्राक्षं तस्याश्च समीपे तरलिकांतयाचसितांशुकोपधानप्रच्छदपटेनोद्गृहीतंधवलताकारगा
१६१ मिव क्षीरोदस्य सहस्रधवं मृणालदंडमिव नारायणनाभिपुंडरीकस्य मंदरक्षोभविक्षिप्तमिवामृतफेनपिंडनिकरं वासुकिनि
र्मोकमिव मथनश्रमोज्झितं हासमिव श्रियः कुलगृहवियोगगलितं मंदरमथनविखंडिताशेषशशिकलाखंडसंचयमिव सं
हृतं प्रतिमातारागणमिव जलादुद्धृतं दिग्गजकरशीकरासारमिव पुंजीभूतं नक्षत्रमालामरणमिव मदनद्विपस्य शरन्मेघशकले
रिव कल्पितं कादंबरीरूपवशीकृतमुनिजनहृदयैरिव निर्मितं गुरुमिव सर्वरत्नानां यशोराशिमिवैकत्र वर्तितं जातिपक्षमिव चं
द्रमसः जीवितमिव ज्योत्स्नायाः स्वच्छमाहृदयमिव नलिनीहलगलज्जलबिंदुविलासतरलमुत्कंठितं मृणालवलयधवलं मिव३
करं शरच्छशिनमिव घनमुक्तं स्तुतिलहयवलितदिङ्मुखं मंदाकिनीप्रवाहमिव सुरयुवतिकुचपरिमलवाहिनं भ्रमावर्तिता
मतिताहारं हरहस्ताचामरस्य चंद्रापीडस्य कृतप्रथुतिमु धौतधवलितं ःकारणमितिमनसानिश्चित्य दूरादेव प्रत्युत्थानादिना १६२

सर्वसागराणां४

समुचितेनोपचारक्रमेण मरलेस्वामापतंतीं जग्राह। सा तु तस्मिन्नेव मरकतग्रावणि मुहूर्त्तमुपविश्य स्वयमुत्थाय तेन
चंदनांगरागेणानुलिंपंतीद्वे दुकूलेपरिधापयंतीस्वमालतीकुसुमदामसिरारचितशेखरं कृत्वा तं हारमाहाय चंद्रापीडस्तु चा
चा।कुमारतदैयमयहस्तितहंकारकांतापेशलतानीति परवशं जनं केमिव न कारयति। प्रश्रय एव ददात्यवकाशमेवंवि
धानामनयाचाकृत्याकस्यासि न जीवितस्वामी) अनेन चाकारेणाविष्कृतवात्सल्येन कस्य न बंधुत्वमध्यारोपयसि एषा ते
प्रकृतिमधुरा व्यवहृतिः कस्य न वयस्यतामुत्पादयति के वा न समाश्वासयंत्यमी स्वभावसुकुमारवृत्तयो भवद्गुणाः त्वन्मूर्त्तिरे
वाज्ञोपालंभमर्हति या प्रथमदर्शन एव विस्रंभमुपजनयति इतरथा हि त्वद्विधेसकलभुवनप्रथितमहिम्नि प्रयुज्यमानं सर्वमे
वानुचितमिवाभाति संभाषणमप्यर्थः करणामिवापतति आदरोपि प्रभुतामिनाननमिवानुमापयति स्तुतिरप्यालीकमिव स्त
वयति उपचारोपि चापलतामिव प्रकाशयति प्रीतिरप्यनभिज्ञतामिव ख्यापयति विज्ञापनापि प्रागल्भ्यमिव जायते

पं४

का॰सू॰ १६२ सेवापिचापलमिवदृश्यते दानमपि परिभवइवभवति अपिचस्वयंगृहीतहृदयाय किंदीयते जीवितेश्वराय किं प्रतिपा
द्यते प्रथमकृतागमनमहोपकारस्य काते प्रत्युपक्रियादर्शनस्तजीवितफलस्य सफलमागमनं केनते क्रियते भ्रणापि
तांचानेनव्यपदेशेन दर्शयति कादंबरीनविभवमपेति याध्याहि परस्वता सज्जनविभवानामास्तांताव द्विभवोमवादृशस्य
दास्यमंगीकुर्वाणानाकार्यकारिणीति निमुज्यते स्वात्मानमपि ददतानभवति जीवितमर्पयित्वानपश्चात्तप्यते श्रणापि
जनप्रत्याख्यानपराङ्मुखीवदाक्षिण्यपरवतीत्वमहत्तासतांनचतादृशी भवति याचमानानां यादृशी ददतां लज्जा। यस्तु
सत्यममुनाव्यतिकरेण कृतापराधमिवलप्यात्मानमवगच्छति कादंबरी तद्यमस्तु तथैत समुद्भूतानां सर्वरत्नानामेकः शेषः
तिशेषतामाहारोयमस्तुनैवकेतुनाबहुमतो भगवतामसांपत्यागृह्णनुपगतोयप्रचेतसेस्तः प्रचेतसापि गंधर्वराजायगं १६२
धर्वराजेनापि कादंबर्यैतयापि त्वद्रूपस्यानुरूपमाभरणास्येति विभावयत्या नभःस्थलमेवोचितं सुधासूतो धामनवरेत्य

मं२

वधार्थमनुप्रेषितो यद्यपि निजगुणगणाभरणभूषितांगयष्टयो भवादृशाः क्लेशहेतुमितरजनबहुमतमाभरणभार
मंगेषु नारोपयंति तथापि कादंबरीप्रीतिरत्र कारणं किं न कृतमुरसि शिलाशकलं कौस्तुभाभिधानं लक्ष्म्याः सहजन्मे
ति बहुमानमाविष्कुर्वता भगवता शार्ङ्गपाणिना न च नारायणोऽत्र भवंतमतिरिच्यते नापि कौस्तुभमणिरगुणाधिगुणत्वेन
शेषमणिशेते न चापि कादंबरी माकारान्तु कीर्तिकलयाऽल्पलक्ष्मीरतु गेहं तु मन्ये मतो हेतीयं बहुमानं त्वयोन यामभूमिरेषा प्रीति
नु स्मरस्य नियतं भवता भगवत्या या महाश्वेतामुपालंभस्य हेतोः खेदयित्वा त्वात्मानमुत्स्रक्ष्यति। अत एव महाश्वेतांतरलिका
मपीमें हारमादाय त्वत्सकाशं प्रेषितवती। नयापि कुमारस्य संदिष्टमेवं न खलु महाभागेन मनसापि कादंबर्याः कार्यः प्रश्र
मप्रणयप्रसरभंग इत्युक्त्वा तारा चक्रमिव चामीकराचलस्य तटे तस्य न क्षः स्थले बबंध। चंद्रापीडस्तु विस्मयमानः प्र
त्यवादीत्। मदलेखे किमुच्यते निपुणासि जानासि ग्राहयितुमुत्तरावकाशमपहरंत्या कृतं वचसि कौशलं। अपि तु गे

गत ४ मपि २

का-सू केवयमात्मनःकेवावयंग्रहणास्यग्रहणस्यवागतारवस्थियसमस्तंकथासौजन्यशालिनीभिर्भवतीभिरुपकरणीकृतो
१६३ यंजनो यथेष्टमिष्टेष्वनभीष्टेषुवाव्यापारेषुविनियुज्यतामतिदक्षिणायाःखलुदेव्याःकादंबर्यानिर्दाक्षिण्यागुणान
केचिन्नदासीकुर्वतीत्युक्त्वाचकादंबरीसंबद्धाभिरेवकथाभिःसुचिरंस्थित्वाविसर्जयांबभूवमदलेखांअनतिदूरंगतायांत च३
स्यांक्रीडापर्वतकमुदयगिरिगतमिवचंद्रमसंचंदनदुकूलहारधवलंचंद्रापीडंद्रष्टुंसमुत्सारितवेत्रच्छत्रचामरचिह्नानि
षिद्धाशेषपरिजनानतमालिकाद्वितीयाचित्ररथसुतातथैवसौधशिखरमारुरोह।तत्रस्याचतथैवविविध [illegible] विलो
सतरंगितैर्ईहारस्यमनःतथाहिमुहुर्नितंबबिंबविन्यस्तवामहस्तपल्लवासधाहृतांशुकान्तुसारप्रसारितदक्षिणक
रनिश्चलतारकालिखितेवमुहुर्जृंभिकारंभदत्तोत्तानकरतलतयानङ्गोत्रस्तवल्लतामियाजिरूढवदनेवमुहुरंशुकप
ल्लवताडितनिश्वासामोदमुग्धमधुकरमुखरतयाप्रस्तुताह्वानेवमुहुरनिलच्यालितांशुकसंभ्रमद्विगुणीकृतभुजयुग १६३

विकारितविलोकितै ३ ऊता १

164

ल कावृत पयोधरतया दत्तालिंगनसंज्ञेव मुहुः केशपाशाकृष्टकुसुमस्फुरिताञ्जलिसमाघ्राणलीलया कृतनमस्कारेव
मुहुरुन्मयन्तर्जनीभ्रमितमुक्ताप्रालंबतया निवेदितहृदयोत्कलिकेव मुहुरुपहारकुसुमस्खलनविधुतकरतलतया कथि
तकुसुमायुधशरप्रहारवेदनेव मुहुर्गलितरसनानिगडनियमितचरणतया संयम्यार्पितेव मन्मथेन मुहुरुच्छलितोरुवेष्टित
शिथिलदुकूलाश्लिष्टतलदोलायमानांशुकैकदेशाच्छादितकुचा चकितपरिवर्तनत्रुटितत्रिवलीलतोल्लसत्सविकुरकलाप
संकलनाकुलकरकमलाकराक्षेपधवलीकृतकर्णोत्पलविलसत्स्मितसुधाहसितकपोले साचीकृतवदनमनेकरस
संगभंगुरं विलोकयन्ती तावद्वदस्थया वधूपसंहतालोको लोहितो दिवसो बभूव। अथ हृदयस्थितकमलिनीरागेणेव रञ्जयमा
नेराजीवजीवितेश्वरे सकलचक्रवालचक्रवर्त्तिनि भगव...न्युष्णकिरणे चरादिनपरिलंबनरोषरक्ताभिः कामिनीदृष्टिभिरिव
संक्रमितशोणिम्नि व्योम्नि संध्यारागे विपिजाते जरठहारीतहरितवासिनि रविविरहमीलितसरोजसहितषुहरितायमानेषु कम

वाक२ दीपिता २

का॰पू॰ त्ववनेषु श्वेतायमानेषु कुमुदषंडेषु लोहितायमानेषु दिङ्मुखेषु नीलायमाने शर्वरीमुखे शनैः शनैश्च पुनर्दिनश्रीसमागमा
१६४ शामिरिवानुरागिणीभिः सह दीधितिभिरदर्शनतामुपगते भगवति गभस्तिमालिनि तत्कालविजृंभितेन च कादंबरीहृदय
रागरससागरेणेवाप्लावितेसंध्यारागेण जीवलोके कुसुमायुधानलदह्यमानचक्रवाकहृदयसहस्रधूम इव जनितमानिनी
नयनवारिणि विस्तीर्णेनारोत्तरुणात्तमालत्विषि तिमिरे दिक्कटिकराकीर्णे शीकरासार इव श्वेतायमानतारागणे गगने ज्ञाते ज्ञा
तायां चादर्शनसमाधौ वेलायां सौधशिखरादवततार कादंबरी। क्रीडापर्वतकनितंबाच्चंद्रापीडः। ततोतिविशदविगृहीतपादः
ग्रसायमान इव कुमुदिनीभिः कंटुयमुखीः कुपिता इव प्रसादयन्नाशाः प्रबोधाशंकयेव परिहरन्मुग्धाः कमलिनीर्लंघितन
शैलेतिशामिव समुद्धरन्रोहिणीचरणालाउतलग्नमलक्तकरसमिवोद्वहन्रागं दधानस्तिमिरनीलांबरां दिवसमभिसारिका
मिवोपसर्पन्नतिबद्धमतया विकिरन्निव सौभाग्यमुद्गाङ्गवानीव्हणोत्सवः सुधासूतिः। उद्भिन्ने च कुसुमायुधाधिराज्ये १६४

कुलव१

165

कातपत्रेकुमुदिनीवधूवरेविभावरीवि लासदंतपत्रेध्वांतमानौघवलितदशदिशिदंतादिवोत्कीर्णेभुवनेचंद्रापीडश्चंद्रातपनि
रंतरतयैवकुमुदमय्याइवगृहकुमुदिन्याःकल्लोलधौतेधवलसोपानेनतनुतरंगतालूनवातनाहिनिसुमहसमिथुनेविरहवाचा
लचक्रवाकमुखलेतीरेकुमुददलावलीभिःपर्यंतविरचितपत्रलतमवदातसिंदुवारदामोपहारंहरिचंदनरसैःप्रक्षालितंकादंबरीप
रिजनोपदिष्टंमुक्ताशिलापट्टंदृशीतलमधिशिश्ये।तत्रस्थस्यचास्यागत्याकथयत्केयूरकोदेवीकादंबरीद्रष्टुमागतेति।
अथससंभ्रममुत्थायागच्छंतीमल्पसखीजनपरिवृतामपनीताशेषराजचिह्नाभिनवामिवेकावलीमात्राभरणामच्छाच्छेनचंदनरसे
नधवलीकृततनुलतामेककर्णावसक्तदंतपत्रामिंदुकलाकलिकाकोमलंकर्णपूरीकृतकेत दलंदधानांज्योत्स्नाशुचिनीक
त्यस्तुमदुकूलेविभ्रतीतत्कालरमणीयेनवेषेणसास्यादिवचंद्रोदयदेवतांमदलेखादत्तहस्तावलंबांकादंबरीमपश्यत्।आग
त्यचभ्रमीतिपेशलं तांदर्शयंतीआकृतेवपरिजनोचितेभूतलेसमुपाविशत्।चंद्रापीडोपिकुमाराद्यास्यतोशिलातलमेवेत्यसह

नैर पात

का॰सू॰ दत्तुबध्यमानोपिमदलेखयाभूमिमेवाभजत। सर्वासुचासीनासुमुहूर्तमिवस्थित्वाचवक्तुमुपचक्रमे चंद्रापीडः। देवि दृष्टिमात्र
१६५ प्रीतेस्मिंजने संभाषणादिकस्यापिप्रसादस्य नास्त्यवकाशः। किंतुतावतोनुग्रहस्यनखलुचिंतयन्नपिनिपुणतमात्मनोगुण
लवमवलोकयामि। यस्यायमनुरूपोनुग्रहातिरेकोतिसरलातवेयमपगताभिमानमधुरासुजनतायदभिनवसेवकजने
प्येवमनुरुध्यते। प्रायेणामानुपचारहार्यमदक्षिणां देवीमन्यते धन्यं खलुपरिजनस्तेयस्योपरिनियंत्रणा स्यात्। आज्ञासंविभा
गकरणे। विते भृत्यजनेकइवादरः। परोपकारोपकरणंशरीरंतृणलवलघुचजीवितमत्रजिहेत्वप्रतिपत्तिरुपायनीकर्तुमागतास्मि ४ मि
स्तेवयमेतेशरीरमिदमेतज्जीवितमेतानींद्रियाणि। एतेषामन्यतरदारोपयपरिग्रहेणानुगृहाणेति। अथैवंवादिनोस्यवचनमाक्षिप्य
मदलेखासस्मितमवादीत्। कुमारभवत्वतियंत्रणया। खिद्यतेसखीखलुकादंबरीकिमर्थंचैवमुच्यते। सर्वमिदमंतरेणापिवचनमत
याप्रतिगृहीतंकिंपुनरस्तुनोपचारफल्गुनावचसासंदेहदोलामारोप्यतेइतिस्थितत्वाच्चकेचित्कालंकृतप्रस्तावाकथैराजगामतारापी १६५

प३

ङःकथंदेवीविलासवतीकथमार्यःशुकनासःकीदृशीचोज्जयिनीकियत्यध्वनिसाकीदृग्भारतंवर्षंरमणीयोवामर्त्यलोकइत्यशेषंपप्रच्छ
एवंविधाभिश्चकथाभिःसुचिरंस्थित्वोत्थायकादंबरीकेयूरकौचंद्रापीडसमीपशायिनंसमादिश्यपरिजनंचशयनसौधशिखरमारुरोह।
तत्रचसितदुकूलवितानास्तीर्णशयनीयमलंचकार।चंद्रापीडोपितस्मिन्नेवशिलातलेनिरभिमानतांमतिगंभीरतांकादंबर्यानिःकारणव
त्सलतांचमहाश्वेतायाःसुजनतांचमदलेखायामहानुभावतांचपरिजनस्यातिसमृद्धिंचगंधर्वराजलोकस्यरम्यतांचकिंपुरुषदेशस्यमनसा
भावयन्केयूरकेणसंवाह्यमानचरणःक्षणादिव[illegible]स्वपितवान्।अथक्रमेणकादंबरीदर्शनप्रजागरखिन्नःस्वप्तुमिवतालीकदली
कंदलिनीप्रविरलकल्लोलानिलशीतलांवेलावनराजिमवततारतारापतिः।अभ्यर्णविरहविधुरस्यचकामिनीजनस्यनिश्वासविभ्रमैरि
वोष्मैर्म्लानिमनीयतचंद्रिका।चंद्रापीडविलोकनासुखमदनेवकुमुदसरलोहरनीतनिशापंकजेषुनिपपातलक्ष्मीः।क्षणदापगमेचस्म
त्वाकामिनीकर्णोत्पलप्रहाराणामुत्कंठितेष्विवक्षामतांव्रजत्सुपांडुतनुषुवासगृहप्रदीपेषुअनवरतशरक्षेपखिन्नानंगनिश्वासवि

अं॰ १ चंद्रापीडः ३

का॰पू॰ प्रेमेषुप्रवहत्सुलताकुसुमपरिमलेषुप्रभातमातरिश्वसुमंदरगिरिलतागृहगह्वराणीवजयमियेवद्रौतीषुअरुणोदयोपप्लुतविनीलतारका

१६६ सुकुमेणाघ्रसमुद्गतेचक्रवाकद्वयनिवासलग्नानुरागमिवलोहितमंडलमुद्वहतिसवितरिशिलातलादुत्थायप्रक्षालितमुखकमलःकृ

तसंध्यानमस्कृतिर्गृहीतताम्बूलःकेयूरकविलोकयदेवीकादंबरीप्रबुद्धानवाक्ववातिष्ठतीत्येवोक्तवान्।गत्वाप्रतिनिवृत्तेनचतेनदेवप्रासा

